Shri Raghunath Temple MSS. Library,
JAMMU

No. २८२६ 'महाभारते,

Title भगवद्गीता षट्टीकासहिता
१६ शोडष्यायः

Author श्रीधर स्वामी क्रमशः टीकानुसारं,

Extent ९६ Age ८

Subject वेदान्त शास्त्रं

2726
P. 14965 97
complete

षोडशोध्यायः

शंकरभाष्यं
आनंदगिरिकृतटीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवशम्मी
परमार्थप्रपा
वनमाली
उत्कर्षवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषानुवाद ॥

प्रथम भाग

श्रीभगवानुवाच अभयंसत्वसंशुद्धिर्ज्ञानयो
गव्यवस्थितिः दानंदमश्चयज्ञश्चस्वाध्याय
स्तपआर्जवम् १ ॥ शाङ्करभाष्य

दैव्यासुरी राक्षसी चेति प्राणिनां प्रकृतयोनवमेध्याये सूचि
तास्तासां विस्तारप्रदर्शनायाभयं सत्त्वसंशुद्धिरित्यादिरध्याय
आरभ्यते तत्रसंसारमोक्षाय दैवीप्रकृतिर्निबंधनायासुरी रा
क्षसीचेति दैव्यादानायप्रदर्शनं क्रियते इतरयोः परिवर्जनाय
श्रीभगवानुवाच अभयमिति अभयमभीरुता सत्त्वसंशुद्धिः
सत्त्वस्यान्तःकरणस्य संव्यवहारेषु परवञ्चनमायानृतादिपरि
वर्जनं शुद्धभावेन व्यवहार इत्यर्थः ज्ञानयोगव्यवस्थितिः ज्ञानंशा
स्त्रतआचार्यतश्चात्मादिपदार्थानामवगमोऽवगतानामिन्द्रियाद्यु
पसंहारेणैकाग्रतयास्वात्मसंवेद्यतापादनं योगस्तयोर्ज्ञानयोगयो
र्व्यवस्थितिः व्यवस्थानं तन्निष्ठता एषा प्रधाना दैवी सात्विकीसंपत्
यत्रच येषामधिकृतानां या प्रकृतिः संभवति सात्विकी सोच्यते
दानं यथाशक्ति संविभागोऽन्नादीनां दमश्च बाह्यकरणानां उपश
मोऽन्तःकरणस्योपशमं शान्तिं वक्ष्यति यज्ञश्च श्रौतोऽग्निहोत्रादिः
स्मार्तश्च देवयज्ञादिः स्वाध्याय ऋग्वेदाद्यध्ययनमदृष्टार्थं तपोव
क्ष्यमाणं शारीरादि आर्जवमृजुत्वं सर्वदा १ ॥

आनन्दगिरिकृतटीका २

ववहितेन संबंधं वदन्नध्यायान्तरमवतारयति दैवीति दैवी सू
चिता राक्षसीमासुरीं चैव प्रकृतिं मोहिनीमित्यादाविति शेषः । प्रकृ
तीनां विस्तरेण दर्शनं कुत्रोपयोगीत्याशंक्य विभज्योपयोगमाह
संसारेति । अतीते चाध्याये कर्मानुबंधीन्यधश्च मूलान्यनुसन्तता
नीत्यत्र कर्मानुरूपा वासनाः संसारस्यावान्तरमूलत्वेनोक्तास्तासामनु
च्छेदेह प्राग्भवीयकर्मानुसारेणाभिव्यज्यमानाः सात्विकादिभेदेन ।

श्री
गी॰ टी॰
षो॰

दैव्यादिप्रकृतित्रयत्वेन विभक्ता आविश्चिकीर्षुर्भगवानुक्तवानित्याह
भगवानिति। अभीरुता शास्त्रोपदिष्टेऽर्थे सन्देहं हित्वानुष्ठाननिष्ठत्वं
परवञ्चना परस्य व्याजेन वशीकरणं माया हृदयेऽन्यथा कृत्वा बहिर
न्यथा व्यवहरणं अनृतमयथार्थं कथनमादिपदेन विप्रलम्भवि
भ्रमादिग्रहः। उक्तमर्थं संक्षिप्याह शङ्केति। एषु त्वभयादयो ज्ञानादि
स्थित्यन्ता त्रियोक्तेति यावत् तामेव सात्त्विकीं प्रकृतिं प्रकटयति यत्रे
ति ज्ञानेकर्मणि वाधिकृतानामभीरुताद्या या प्रकृतिः सा तेषां तत्र
सात्त्विकी सम्पदित्यर्थः। महाभाग्यानामनुत्तमा दैवीसम्पदुक्ता सम्प्र
ति सर्वेषां यथासंभवं सम्पदं उपदिशति दानमिति। बाह्यकरण
विशेषणे कारणमाह अन्तःकरणस्येति। देवयज्ञादित्यादिशब्दे
न पितृयज्ञो भूतयज्ञो मनुष्ययज्ञश्चेति त्रयमुक्तम् १ ॥

स्वामिकृतटीका ३

पूर्वाध्यायान्ते यतद्बुद्धिमान्स्यात्कृतकृत्यश्च भारतेत्युक्तं तत्र क
यतत्वं बुध्यते को वानबुध्यत इत्यपेक्षायां तत्वज्ञानेऽधिकारिणोऽ
नधिकारिणश्च विवेकार्थं षोडशाध्यायारम्भः निरूपिते हि कार्येऽ
धिकारिजिज्ञासा संभवतीति तदुक्तं भट्टैः भारो योयेन वोढव्यः सम्प्र
गांदोलितो यदा तदा कस्तस्य वोढेति शाक्यं कर्तृनिरूपणमिति त
त्राधिकारिविशेषणभूतां दैवीं सम्पदमाह अभयमिति त्रिभिः अभ
यं भयाभावः सत्वस्य चित्तस्य संशुद्धिः सुप्रसन्नता ज्ञानयोगे आत्म
ज्ञानोपाये व्यवस्थितिः परिनिष्ठानं स्वभोज्यस्यान्नादेर्यथा विभागः सं
विभागः दमः बाह्येन्द्रियसंयमः यज्ञो यथाधिकारं दर्शपूर्णमासा
दिः स्वाध्यायो ब्रह्मयज्ञादिर्जपयज्ञस्तपः उत्तराध्याये वक्ष्यमाणं शा
रीरादि आर्जवं अवक्रता १॥

पिपाठभाष्यम ४

नवमेऽध्याये दैवी आसुरी राक्षसी चेति प्राणिनां प्रकृतय उक्ताः
विस्तरेण प्रतिपादयितुमध्यायमारभ्यते श्रीभ॰ अभयमभीरुता
सत्वसंशुद्धिः अवंचनं ज्ञानयोगेतयोर्व्यवस्थितिः दानमर्थिभ्यः स्व
द्रव्यसमर्पणं दमः अंतःकरणोपरतिः यज्ञास्मार्तापंचमहायज्ञाः

ष्टोमाग्निष्टोमादयः स्वाध्यायोवेदाभ्यासः तपस्त्रिविधं कायकंवा
चिकंमानसंचेति आर्जवं अवक्रता १ ॥

रामानुजभाष्यंटी॰

अतीतेनाध्यायत्रयेणप्रकृतिपुरुषयोर्विभक्तयोःसंसृष्टयोश्च
याथात्म्यंतत्संसर्गवियोगयोश्च गुणसंगतद्विपर्ययहेतुकत्वंसर्वप्र
कारेणावस्थितयोःप्रकृतिपुरुषयोर्भगवद्विभूतित्वंविभूतिम
तोभगवतोविभूतिभूतादचिद्वस्तुनःचिद्वस्तुनश्चबद्धमुक्तोभ
यरूपादव्ययत्वव्यापनभरणस्वाम्यैरर्थांतरतयापुरुषोत्तमत्वे
न याथात्म्यंचवर्णितं अनंतरमुक्तस्यार्थस्यशास्त्रवश्यतामु
क्तशास्त्रवश्यतद्विपरीतयोर्देवासुरसर्गयोर्विभागं श्रीभग
वानुवाच अभयमिति अहिंसेति तेजइति इष्टवियोगसंयोग
रूपस्य दुःखस्यहेतुदर्शनजंदुःखंभयंतन्निवृत्तिरभयं सत्वसं
शुद्धिःसत्वमंतःकरणस्यरजस्तमोभ्यामस्पृष्टत्वं ज्ञानयोग
व्यवस्थितिःप्रकृतिविविक्तात्मस्वरूपविवेकनिष्ठा दानंन्या
यार्जितधनस्यपात्रेप्रतिपादनं दमोमनसोविषयेभ्योन्मुख्य
निवर्तनसंशीलनं यज्ञःफलाभिसंधिरहितभगवदाराधन
प्रकारस्यचप्रतिपादकःकृत्स्नो वेदइत्यत्र स्वाध्यायवेदाभ्या
सनिष्ठातपः कृच्छ्रचांद्रायणद्वादश्युपवासादेर्भगवत्प्री
णनकर्मयोग्यतापादनस्यकरणं आर्जवंमनोवाक्कायक
र्मवृत्तीनामेकनिष्ठता १ ॥

अभिनवगुप्तकृतटीका

एतदुद्देशकं बोधस्वनाममुक्तिमयज्ञानांतरमिदमित्यभिसे
वेतत्युक्तिचिंतामयज्ञानांतरमिदमित्यर्थ इत्येवंभूतयुक्तिचिं
तामयज्ञानोदयेनविचारविमर्शपरामर्शादिरूपेणविजा
तीयप्रत्ययाकारविरहिततद्भावनामयस्वभ्यस्ताकारविज्ञा॰
नलाभेसतिभवति नतुद्वयते विमर्शपेवमशेषेणयथोक्त॰
सितथाकरिति तत्रमुक्तिमयेज्ञानेउपदेशापेक्षैवप्रथमान्ये
नप्रभवतः युक्तिचिंताभावनामयेतुविमर्शस्समनासाधा

हणशिष्यत्वेन संपन्नप्रधानभूता अतोर्जुनस्यास्त्येवासावित्यभिप्रा
येण वक्ष्यमाणं विमृश्यैतद्धितिवाक्यं सविषयैकर्तृपरिकरं वैधेया
ज्ञानाभिप्रायेणाह भगवानुत्तरः पंचभिः आसुरभागसत्त्वविद्यात्व
मसीकिलाविद्यास्याप्रहङ्ग्यादिद्धोशाग्राहिण्याविद्ययावध्यते इति
वस्तुस्वभावएव त्वं च विद्यात्मानं दैवमंशं सात्त्विकमभिप्रपन्नस्तस्मा
दांतरीमोहलक्षणमविद्यांविहाय वाह्यविद्यात्मशत्रुहननलः
त्वं शास्त्रीयव्यापारमनुतिष्ठस्व माध्यायाविभः तथाहि दिव्यांशे
स्यमानि विज्ञानिना निस्फुटमेवाभिलक्ष्यंते इंद्रियजयः चापले
पूर्वापरमविमृश्य यत्करणं तदाभावोचापलं तेजआत्मस्तुत्या
ह्यग्रहणेनमितत्वापकरणं दैवीसंपदेषासा च तव मोक्षाय का
मनापरिहारात् अतस्त्वं शोकमाप्राप: यथाअत्राहं दीनत्वा
कथंस्थावमस्तुवीयेति शिक्षस्वेष्ठे १

परमार्थप्रपा टीका

पूर्वाध्यायांते पतद्बुद्धाबुद्धिमान्स्यात् कृतकृत्यश्चभारते ।
तर्हि क पतद्बुद्धाकृतकृत्यो भवति अवधावकः संसारी भव
तीतिविवेकं दैवासुरसंपत्तिकथनाय षोडशाध्याय प्रहृत्ति
स्तत्र प्रथमं तत्त्वज्ञानाधिकारिणे निरूपयितुं भगवान्दैवी
संपत्तिमाह अभयमितित्रिभिः अभयं भयराहित्यं सत्त्वस्य ।
चित्तस्य शुद्धिः स्वप्रसन्नता ज्ञानयोगे आत्मज्ञाने व्यवस्थितिः
परिनिष्ठा दानं स्वभोज्यस्यान्नादेर्यथोचितं संविभागः दमो
वाह्येंद्रियसंयमः यज्ञो यथाधिकारं दर्शपौर्णमासादिः ।
स्वाध्यायो ब्रह्मयज्ञादिभिर्जपयज्ञाः तपः शारीरादित्रिवि
धं वक्ष्यमाणं आर्जवमवक्रता १ ॥

माहात्म्यं नेदृग्युक्तस्य प्रमाणैः प्रतिपादितं शङ्कवंति न सोऽहं
येते त्वयं नरके गताः दैवासुरस्वभावौ यौ निमित्तैर्वंधमोक्ष
योः अपृष्टः कृपयाहैतौ षोडशे रमापतिः पूर्वाध्याये
धश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके इत
त्र मनुष्यदेहे प्राचीनकर्मानुसारेणोत्पद्यमाना वासनाः सं
सारस्य वर्धिकास्ताश्च दैवासुरी राक्षसी चेति प्राणिनां प्रकृ
तयो नवमे सूचिताः ज्ञानसाधनानुष्ठानार्थं निर्मीनेत्व
नेन दैवस्वभावोऽर्थत उक्तः यततोऽप्यकृतात्मानो इत्यासु
रश्च तत्र वेदवोधितकर्मात्मज्ञानोपायानुष्ठाने प्रवृत्तिहे
तुः सात्त्विकी शुभवासना दैवी प्रकृतिरित्युच्यते एवं वै
दिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिस
र्वानर्थहेतुप्रवृत्तिहेतु भूता राजसी तामसी चाशुभवा
सना आसुरी राक्षसी च प्रकृतिरुच्यते तत्र च विषयभोगप्रा
धान्येन रागप्राबल्यादासुरीत्वं हिंसाप्राधान्येन द्वेषप्राव
ल्याद्राक्षसीत्वमिति विवेकः संप्रति तु शास्त्रानुसारेण
तद्धितप्रवृत्तिहेतुभूता सात्त्विकी शुभवासना दैवी संप
त् शास्त्रातिक्रमेण तन्निषिद्धप्रवृत्तिहेतुभूता राजसी ता
मसी चाशुभवासना राक्षस्या आसुर्यैकीकरणेनासुरीसं
पदिति द्वैराश्येन प्रतिपादयितुं षोडशोऽध्याय आरभ्यते
तत्रादौ ज्ञानसाधनत्वेनाभ्यर्हितत्वात्ताभ्यर्हितत्वाद्दैवीसं
पदमाह अभयमित्यादि आगाम्यनिष्टधीजन्यं दुःखं भ
येन तदभावो अभयं सत्त्वस्य चित्तस्य संशुद्धिः कामक्रोधलो

श्री॰
गी॰टी॰
षो

3

भदंभकपटादिराहित्यं ज्ञानंशास्त्रादात्मतत्त्वस्यावगमः चि
त्तैकाग्रतयातस्यसाक्षादनुभवाद्रूपत्वंयोगः तयोर्व्यवस्थितिः स
र्वदातन्निष्ठताज्ञानयोगव्यवस्थितिः भगवद्भक्तिं विनांतः
करणसंशुद्धेरयोगादर्थात्सापिकथिता महात्मानस्तुमां
पार्थदैवींप्रकृतिमाश्रिता महात्मानस्तुमांपार्थदैवींप्रकृ
तिमाश्रिताः भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययमितिनव
मेदैव्यांसंपदिहरिभक्तेरुक्तत्वाच्च हरिभक्तेरतिश्रेष्ठत्वादभ
यादिभिः सहपाठोनकृत इतिद्रष्टव्यं दानंस्वस्वत्वास्पदा
नामन्नादीनांयथाशक्तिशास्त्रोक्तसंविभागः दमोबाह्येंद्रिय
संयमः ऋतुकालाद्यतिरिक्तकालेमैथुनाद्यभावः यज्ञश्चाग्नि
होत्रादिः स्वाध्यायोब्रह्मयज्ञोदृष्टार्थमृग्वेदाद्यध्यापनंतपः
तपस्त्रिविधंशारीरादिभेदेनवक्ष्यमाणम् आर्जवमवक्रत्व
श्रद्दधानेषुस्वज्ञातार्थासंगोपनम् १ ॥

नस्तमैवेजयतीटीका १ ॥

षोडशेसंपदंदैवीमासुरींचाब्रवीद्धरिः तयोर्ग्राह्यत्वहेयत्वबो
धयन्त्वपेवक्रमात | एवंत्रयोदशेनसंसृष्टयोःप्रकृतिपुरुष संसृष्टयोः१
योर्विद्यात्मस्वरूपकथनं सर्वकर्मीश्वरेणसहसामानाधि
करण्यंचतुर्दशेनापितयोः संयोगवियोगयोर्विपरीतस्वभा
वस्य चसत्त्वादिगुणसंगः कारणत्वंपंचदशेनापिचतयोःसं
योगादुत्पन्नस्यसंसाराख्याश्वत्थतरोर्ज्ञानानैर्ज्ञानः पुरुषस्यय तरं१
स्त्वेवेदसवेदविदित्यादिवेदवेदित्वंयोमामेवमसंमूढइत्या
दिनापुरुषोत्तमत्वंज्ञानादपिसर्वशास्त्रवेदित्वंप्रोक्तं अथ
षोडशेन इतिगुह्यतमंशास्त्रमितिपंचदशाध्यायोक्तशा

स्तस्याधिकारिणं वक्तुं च तत्र वर्णानामाश्रमाणां च शास्त्रानुकूलप्र
तिकूलाचारत्वेन दैवासुरसंपद्विभागं प्रतिपादयति तस्मात्तत्रादौ ते
षां श्लोकत्रयेण दैवीसंपद्वर्ण्यते प्रथममेकेनाश्रमधर्मान्याटक्र
मेणैव श्रीभगवानुवाच अभयमिति प्रियाप्रियवस्तुवियोगसं
योगरूपनिमित्तजं दुःखं भयं तन्निवृत्तिरभयं यद्वा निरूपमः क
थमेकाकी जीविष्यामीति भयमूल्पात्वं सत्त्वसंशुद्धिः सत्त्वस्यांतःकर
णस्य सम्यक्कृत्वाश्रमोचितधर्मानुष्ठानपूर्वकेण मदाराधनेन शुद्धि
र्निर्मलता यद्वा सत्त्वस्य गुणस्य संशुद्धिः रजस्तमोभ्यामस्पृष्टत्व
केवलसत्त्वगुणाश्रयत्वमित्यर्थः ज्ञानयोगव्यवस्थिति ज्ञानयो
गेनात्मोपायेनास्त्रश्रवणादौ व्यवस्थितिः परिनिष्ठा यद्वा प्रकृतिवि
विक्तात्मस्वरूपनिष्ठेति त्रयं संन्यासिनो धर्माः दानं न्यायोपार्जितस्य
स्वभोग्यस्यान्नादेः सत्पात्रे यथायोग्यं समर्पणं दमो बाह्याभ्यांतरेंद्रि
यवर्गस्य विषयाद्यथायोगं संयमः यज्ञः फलानुसंधानरहितभ
गवदाराधनरूपं पंचयज्ञाद्यनुष्ठानमिति त्रयं गृहस्थानां स्वाध्यायः
सैषर्थं भगवन्मत्तदाराधनप्रकारस्य च प्रतिपादकोऽयं सर्ववेदस्त
स्यानुसंधाय वेदाभ्यास इति शुनैषको ब्रह्मचारिणां तपोष्टदशेवक्ष्य
माणशारीरादित्रिभेदमित्येको वानप्रस्थानां आर्यवर्णेषु विप्राणां थ
मीनाह आर्जवं मनोवाक्कायव्यापारवृत्तीनामेकभावेन सारल्यम् १

मधुसूदनीटीका १० ॥

ॐ अनेनराध्यायेन प्रथम[illegible] मूलान्यनुसंततानि कर्मानुबंधीनि मनु
ष्यलोके इत्यत्र मनुष्यदेहप्राग्भवीयकर्मानुसारेण व्यज्यमाना वासनाः
संसारस्यावांतरमूलत्वेनोक्तानाश्च दैवी आसुरी राक्षसी चेति प्राणि
नां प्रकृतयो नवमेध्याये सूचिताः तत्र वेदबोधितकर्माज्ञानोपाय
नुष्ठानप्रवृत्तिहेतुः सात्त्विकी शुभवासना दैवीप्रकृतिरुच्यते एवं वैदि
कनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारि सर्वानर्थहेतुः प्रवृ

सदा सदानंदपदे निमग्नं मनो मनोभावमपाकरोति गतागतायांसमुपास्य सद्यः
परापरातीतमुपैति तत्त्वं श्लोकाः सौराष्ट्रगाणपत्याश्चैश्वशाक्तिकपूजकाः भवंतिय
मविज्ञाय सोहमस्मि परः शिवः ॥

त्तिहेतुभूताराजसीतामसीचाशुभवासना आसुरीराक्षसीचप्रकृति
रुच्यते तत्रच विषयभोगप्राधान्येन रागबाहुल्यादासुरीत्वं हिंसा
प्राधान्येन द्वेषबाहुल्याद्राक्षसीत्वमिति विवेकः संप्रति तु शास्त्रा
नुसारेण तद्विहितप्रवृत्तिहेतुभूता सात्त्विकी शुभवासना दैवीसं
पत् शास्त्रातिक्रमेण तन्निषिद्धविषयप्रवृत्तिहेतुभूता राजसीताम
सीचाशुभवासना राक्षस्यासुर्योरेकीकरणेनासुरीसंपदिति निर्द्धा
रणेन शुभाशुभवासनाभेदद्वयाह प्राजापत्यादेवाश्चासुराश्चेत्यादि
श्रुतिप्रसिद्धं शुभानामादानायाशुभानां हानाय च प्रतिपादयितुं
षोडशोध्याय आरभ्यते तत्रादौ श्लोकत्रयेण दैवीं संपदमाह श्रीभगवानु शास्त्रो
पदिष्टेर्थे संदेहं विनानुष्ठाननिष्ठत्वं एकाकी सर्वपरिग्रहशून्यः
कथं जीविष्यामीति भयराहित्यं वा अभयं सत्वस्यान्तःकरणस्य शुद्धि
र्निर्मलता तस्याः सम्यक्‌भगवत्तत्वस्फूर्तियोग्यता सत्वसंशुद्धिः
परवंचनमायानृतादिपरिवर्जनं वा परस्पर्द्धजनवशीकरणेन पर
वंचनेन स्वयं यथाकृत्वा बहिरन्यथा व्यवहरणं माया अन्यथाक
थनमनृतमित्यादि ज्ञानं शास्त्राचार्योपदेशात्तत्वस्यावगमः विवेकायतन
यानस्य स्वानुभवारूढत्वं योगः तयोर्व्यवस्थितिः सर्वदा तन्निष्ठता
ज्ञानयोगव्यवस्थितिः यद्वा तु अभयं सर्वभूताभयदानं संकल्पपा
लनं एतच्चान्येषामपि परमहंसधर्माणामुपलक्षणं सत्वसंशुद्धिः
श्रवणादिपरिपाकेणान्तःकरणस्यासंभावनाविपरीतभावनादि
मलराहित्यं ज्ञानमात्मसाक्षात्कारः योगो मनोनाशवासनाक्षयानु
कूलः पुरुषप्रयत्नः ताभ्यां विशिष्टा संसारविलक्षणा व्यवस्थितिः
जीवन्मुक्तिः ज्ञानयोगव्यवस्थितिरित्येवं व्याख्यायते तदा फलभू
तैव दैवी संपदियं द्रष्टव्या भगवद्भक्तिं विना अन्तःकरणसंशुद्धेर
योगात् तथा सापि कथिता महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रि
ताः भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययमिति दैवीसंपदि नवेम

भगवद्भक्तेःकृतत्वाच्चभगवद्भक्तेरतिश्रेष्ठत्वाद्भयादिभिःसह
पाठोनकृतइतिद्रष्टव्यं महाभारणानांपरमहंसानांफलभूता
दैवीसम्पदुक्तेतरेषांगृहस्थादीनांसाधनभूतामाह ॥
दानंस्वस्वत्वास्पदानामन्नादीनांयथाशक्तिपात्रेभ्यःसंविभागः
दमोबाह्येंद्रियसंयमः ऋतुकालाद्यतिरिक्तकालेमैथुनाद्यभावः
चकारःअनुक्तानामखिलानांधर्माणांसमुच्चयार्थः यज्ञश्च
श्रौतःअग्निहोत्रदर्शपूर्णमासादिःस्मार्तोदेवयज्ञःपितृयज्ञः
भूतयज्ञःमनुष्ययज्ञइतिचतुर्विधःब्रह्मयज्ञस्यस्वाध्यायपदे
५ नपृथगुक्तेःचकारेणानुक्तानामप्यखिलधर्माणांसमुच्चयार्थः
एतच्चयंगृहस्थस्यस्वाध्यायोब्रह्मयज्ञःअदृष्टार्थमृग्वेदाध्ययन
रूपःयज्ञशब्देनपंचविधमहायज्ञोक्तिःसंभवेप्यसाधारणेनब्र
ह्मचारिधर्मत्वकथनार्थंपृथगुक्तिस्तपस्त्रिविधंशारीरादिसप्त
दशेवक्ष्यमाणं वानप्रस्थस्यासाधारणोधर्मःएवंचतुर्णामाश्र
माणामसाधारणान्धर्मानुक्त्वाचतुर्णांवर्णानामाह आर्ज
वमवक्रत्वंश्रद्दधानेषुश्रोतृष्वज्ञातार्थासंगोपनं १ ॥

सदानंदीटीका ॥ ॥

रताःकेचिद्योगैर्विजितकरणाःसंयतधियः क्रियाजालेके ।
चित्तुखलवरसास्वादनपराःरताःशास्त्राभ्यासेविशदमतयः
केचिज्जडाःवयंतुश्रीकांताननवचनमासाद्यकृतिनः १ नवि
द्यायेषांश्रीर्नशरणमपीषन्नगुणाः परित्यक्तालोकैरपिहजि
नयुक्ताःकलिजडाः शरण्यंयेनैषिप्रसृतगुणमाश्रित्यसुजना
विमुक्तास्तंवंदेयदुपतिमहंकस्समममलं २ अथश्रमूलानांगा
दिनाध्यायेनंतरेन्द्रणार्थक्रमानुसारेणव्रजामाश्रितसुजना
विमुक्तास्तंवंदेयदुपतिमहंनाहिवासनाः ३ अवांतराणिमू
लानिसंसारेनेतिर्मदीतिं दैव्यासुरीराक्षसीचप्राणिप्रकृतयः३रा ४

श्री॰
गी॰ टी॰
षो॰

बंधमोक्षादिकारिण्यः सूचितानवमे किल वेदबोधितकार्मात्मज्ञा
नेपायायघनुष्ठितौ ५ प्रवृत्तिहेतुः प्रकृतिर्दैवी साशुभवासना निष
याशास्त्रमूलैव्यरागद्वेषानुसारतः सर्वानर्थनिबंधिन्या प्रवृत्तेर्या
प्रवर्तिनी राजसीतामसी साचराक्षसीचासुरीस्मृता ७ तत्रापिप्रा
बल्यात्प्रोगप्राधान्यमात्रहात् यया साक्षात्प्रवृत्तिर्ज्ञेया हिंसायां प्रा
णिनोहृया ८ साभवेद्वेषप्राबल्यात् यथासा राक्षसीरिता इदानीं वे
दविहितप्रवृत्तिजनकाशुभा ९ सात्विकीसंपदा दैवी मोक्षहेतु
ना रिहोच्यते याशास्त्रानिक्रमेणैव तन्निषिद्धैकगोचरे १० प्रवृत्तिहेतु
भूतासाराजसीतामसीत्वतो द्वयोश्चराक्षस्यासुर्योरेकीकृतैव
वसंपदः ११ आसुरीत्वेन कथनं क्रियतेहृयसाम्यतः आदाना
यशुभानांचाशुभानांहानसिद्धये १२ हरिणा षोडशोध्याययआ
रभ्यतेऽश्लोकमः तत्रश्लोकत्रयेणादावुपादेयां सुवासनां १३ दै
त् वीमाहकृपासिंधुर्भगवान्शुभसंपदं गुरुशास्त्रोपदिष्टेर्थे
विनासंदेहमादरात् १४ तदनुष्ठाननिष्ठत्वमभयं भयवर्जितं
अकिंचनोऽहमेकाकी जीविष्याम्यधुनाकथं १५ इतिवासभ
यंतेनराहित्यमभयं स्मृतं सत्वस्यांतःकरणस्य शुद्धिर्निर्मल
तेरिता १६ वस्तिकासत्रतियोगपतेंशुद्धौसम्यक्पदमीरितं परवंच स
नमायादिपरिवर्जनमेवता १७ व्याजेनैवबशीकारः परस्यवंचनं पर
हृदयेचान्यथाकृत्वाव्यवहारोन्यथाबहिः मायानृतंतुकथित
मयथाहष्टभाषणं एतेषां वर्जनं सत्वसंशुद्धिरण्यवासना १९
तत्वस्यावगमः शास्त्राज्ञानंतस्ययथार्थतः विशेषकाग्रतयास्वा
नुभावत्रफलमेवच २० योगस्तस्यैवनिष्ठत्वं ज्ञानयोगव्यवस्थितिः
आत्मसमासकृतिनामित्रंसंपदुदीरिता २१ विनाभगवतोभक्तिं
नोदेतीयं कदाचन अतिश्रेष्ठतयाभक्तेर्नपाठोऽत्रामयादिषु २२
प्रधानांसंपदंदैवीमुक्त्वात्यंतविवेकतः आहेदानीं गृहस्थादेरपि

साधारणोहरिः २३ दानंस्वत्वास्पदाद्व्यादेर्यथाशक्तियथावि
धि संविभागोदमोवाह्येंद्रियसंयमईरितः २४ अनुक्रांता
स्वधर्माणंचकारैस्तुःसमुच्चये यज्ञःश्रौतोग्निहोत्रादिःस्मा
र्तोदैवादिकोध्वरः स्वाध्यायोब्रह्मयज्ञाख्यविधिनाध्ययना
त्मकः ऋगादीनांचवेदानांवक्ष्यमाणंतपस्तथा २५ त्रिधा
सप्तदशेध्यायेशारीरादिहृशोधकं आर्जवंश्रद्धयानेषुस्वत्वा
र्थप्रकाशनं २६॥१॥

नीलकंठीटीका १२॥

नवमाध्यायेराक्षसीमासुरीदैवीचेतित्रिस्रः संपदउक्तास्तासुरा
क्षसीमासुरीमेवांतर्भाव्यद्वेएवसंपदावत्राध्यायेद्वयाहप्राजा
पत्यादेवाश्चासुराश्चेतिश्रुतेः अभयसत्वसंशुद्ध्यादिधीवृत्तयोदे
वाः दंभदर्पादिधीवृत्तयोसुराइतिहैराण्यस्यैवदर्शनात् पूर्वाध्या
येनेदंसम्यक्क्रमयानचेन्मजेनंसंबोधयतः नचतत्वंदैवसंपन्निमंत्व
नद्विपर्ययस्त्वासुरीसंपदितिदर्शयितुंश्रीभगवानुवाच अभय
मिति अभयंसोऽक्लेदवुद्ध्यभावः सत्वसंशुद्धिःचित्तनैर्मल्यंज्ञा
नेश्रवणादिजंयोगोज्ञानेथेचित्तप्रणिधानंतयोर्व्यवस्थितिर्नि
ष्ठा एषामुख्यादैवीसंपत् दानंयथाशक्तिसंविभागोन्नादीनां
दमोवाह्येंद्रियनियमः यज्ञःश्रौतस्मार्तादिः स्वाध्यायोवेदाध्य
यनं तपोवक्ष्यमाणलक्षणंशारीरादित्रिविधं आर्जवंऋजुत्वं
सर्वदा॥१॥

आनंदीटीका १३

अथयअयमलक्षितयोर्दैवासुरप्रकृत्योः परीक्षार्थंश्रीभगवा
नुवाच अभयं नविभेतियदाचायंयदास्माच्चनविभ्यति।
यदानेच्छतिनद्वेष्टिब्रह्मसंपद्यते तदेति मोक्षधर्मेष्वलादि

नम् सत्वस्यप्रकाशस्यपरमार्थज्ञानहेतोःशुद्धिः रजस्तमोभ्यां
विमुक्तिः सत्वसंशुद्धिः प्रक्रोधःप्रतिपातनरिक्तोथाभावः १॥

एवमस्मिंपंचदशाध्यायपर्यंतशास्त्रोपनिषद्भूतस्यज्ञानस्यसर्वं
महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः भजंत्यनन्यमनसोज्ञा
त्वाभूतादिमव्ययमित्यादि तथा मोघाशामोघकर्माणोमोघ
ज्ञानाविचेतसः आसुरीराक्षसींचैवप्रकृतिंमोहनींश्रिताइतिच
विषयाविषयविवेचनादियसूचिते तदिदानींसर्गद्वयोपाद्व्या
नेनानेनध्यायेनविस्तरनिर्णेतुंभगवानाह। इहप्रथमाध्यायो
पोद्घातप्रदर्शितविभागेनदैवस्यासुरस्यचसर्गस्यावान्तरभेदपरि
कल्पनयायद्यपिवहवः प्रकाराउक्तास्तथाप्यत्रनामोद्रेकनिष्ट
ताभिव्यंजकगुणसामग्रीसंपन्नस्योत्तमस्यदैवसर्गस्यपरापरभे
देनद्विप्रकारत्वंतावत्प्रतिपाद्यते तत्राभयादयोनातिमानितां
ताःसप्तविंशतिर्गुणाःसामान्येनदैवींसंपदंदेवसर्गसंपत्ति
मभिनदाभिमुखेनतांस्वीकर्तुंजातस्यकर्मभूमौलब्धजन्मनः
पुरुषस्यभवंतीतियद्यप्युक्तास्तथाप्यभयादयःप्रथमेचत्वारो
गुणाःपरांदैवींसंपदमभिजातस्यभवंति दानादयस्तुविशेषा
अपरामभिजातस्यभवंतीतिविशेषोत्रविवक्षितः सतथैवव्या
ख्यायते तत्राभयंसर्वतःकुतःचित्चेतनाचेतनरूपाशेषजाता
यथोक्ताद्वयज्ञानप्रतिष्ठितबुद्धित्वसत्यात्माभेदेनप्रतिपद्यमा
नाद्वयस्यात्मव्यतिरिक्तपदार्थाश्रयस्यप्रेप्सितविषयप्राप्तिविघा
तादिहेतोःसर्वस्याभावः तत्रपरमात्मस्वरूपसमापन्नकल्पस्य
योगिनोभवति यदुक्तं योविकल्पमिदमर्थमंडलंपश्यती
शनिखिलंभवद्वपुः। स्वात्मपक्षपरिपूरितेजगत्यस्यनित्यसु
खिनःकुतोभयमिति तथातस्यकारणभूतासत्वशुद्धिः सत्वगु

णप्रधानत्वात्सत्त्वशब्दवाच्यस्य चित्तस्य शुद्धिर्भेदमलप्रक्षालनाभ्या
सान्नैर्मल्यं तथा तस्या अपि कारणभूते ज्ञाने यथोक्तशास्त्रार्थबोधे
व्यवस्थितिर्निरूपणं वा प्रतिष्ठा तथा तद्धेतौ योगे शास्त्रचोदितस्व
कर्मानुष्ठानलक्षणे परस्मिन्समाधौ व्यवस्थितिस्तथैव निर्विघ्नवा
प्रतिष्ठितत्वेन परां दैवीं संपदमभिजातस्य योगिनो धर्माः संभवन्ति ।
सद्यान्नूफदशाभामः अण्यदानं स्वद्रव्यस्य परत्वापादनं तच्च द्विप्रका
रं करुणामात्रहेतुकं दीनाद्यर्थिजनविषयत्वेनाविशेषप्रवृत्तिकमे
कम् शास्त्रचोदितविधिविशेषसंपन्नयेविशिष्टेतिकर्तव्यतासं
युक्तं पात्रदेशकालादिविशेषमपरं तथा दमः शास्त्रविरुद्धेभ्यो
र्थेभ्य इंद्रियाणां बाह्याभ्यंतराणां निग्रहस्तथा यज्ञः । वर्णाश्रम
क्रमविभक्तो नित्यनैमित्तिकभेदेन द्विविधः स्विष्टदेवतायागस्तथा स्वाध्यायः
स्वमध्येयत्वेनोपदिष्टस्य शास्त्रस्य मंत्रवेदाध्ययनमभ्यासेन बोधस्त
था तपस्तथैव नित्यनैमित्तिकभेदेन शास्त्रीयनियमश्चर्वत्तुत्र
स्नादिसहिष्णुतया शारीरतपनं तथार्जवमस्तुत्वं प्रकृतिसरल
त्वलाभकालश्चरस्तनत्वात्समस्तकायवाक्चित्तसाध्यक्रियावि
शेषदर्शितस्वसाफल्यैककारणमकौटिल्यम् १ ॥

[illegible]टीका १५

ॐ अथश्रीगीताया अर्थावबोधने अधिकार्यनधिकारिणोर्निर्णया
य षोडशोध्यायः प्रसूयते निरूपिते हि कार्यार्थेधिकारिजिज्ञासा भ
वति तत्रकं भाहे: भोरायोयेनवोध्व्यः सभागातेतालितायदा तदा
कस्तस्यबोद्धेतिशंकाकर्तं निरूपणमिति तत्र दैवः सर्गः उक्ता
र्थानुष्ठाने उपपन्नतयाधिकारी आसुरः सर्गस्त्वनुपपन्नतयाधि
कारी आसुरः सर्गस्त्वनुपपन्नत्वादनधिकारीत्येवं सविस्तरं वर्ण
यितुं अभयं सर्वत्र स्वात्मस्फूर्त्याद्वैताभावेन भयाभावः तथा च
श्रुतिः द्वितीयाद्वै भयं भवतीति सत्त्वसंशुद्धिः सत्त्वस्याहंतायाः
सम्यं निरवशेषतयाशुद्धिर्मायीयकालुष्याभावः ज्ञानयोगेदेत

लक्षणेऽवस्थितिर्विशेषेण निष्ठा एतेन धर्मोऽयमाधिकारिणः पुरु
षस्य भवंतीति दानेन वित्तसंशुद्धिः देयशोधने दमो बाह्येंद्रियसंयमः
यज्ञोऽकामानां यज्ञानामध्यात्माधिकारानुसारेणानुष्ठानम यज्ञानु
ष्ठानम् स्वाध्यायं ब्रह्मयज्ञादिर्जपयज्ञः तपउत्तराध्याये वक्ष्यमा
णं शारीरादि आर्जवं चित्तप्रसादकारणमृजुत्वमकौटिल्यम्
एतेन धर्मा मध्यमाधिकारिणः गृहस्थस्य भवंतीति [illegible] ॥१॥

पंवोले टीका

नवमेऽध्याये दैवी चासुरी राक्षसी चेति प्राणिनां प्रकृतयः सूचिता
स्तासां विस्तरेण प्रदर्शनाय आत्मतत्त्वनिरूपणानंतरं अधिकारि
णां दर्शयितुं दैवी मोक्षहेतुः इतरे च बंधहेतुः इति विवेचयन् दैवी सं
पद्युक्तो अधिकारी इतरसंपद्युक्तो नधिकारी इति दर्शयन् अधि
कारिविषयभूतां दैवीं संपदमाह भगवान् अभयमिति त्रिभिः
अभये अभीतता परवंचनमायाअनृतादिवर्जनेन सत्त्वसंशुद्धिः शा
स्त्राचार्याभ्यामात्मादिपदार्थानामवगमो ज्ञानं अवगतानामात्मा
दीनामिंद्रियादिजयपूर्वकमेकाग्रतया प्रत्यक्षकरणं योगः तयो
र्ज्ञानयोगयोः विषये व्यवस्थितिः तन्निष्ठता दानं यथाशक्ति अन्नादि
दानं बाह्येंद्रियाणां निग्रहो दमः यज्ञः श्रौतः अग्निहोत्रादिः स्मार्तः
पंचमहायज्ञादिः ऋग्वेदाद्यध्ययनं धर्मार्थं स्वाध्यायः तपः शारी
रादि वक्ष्यमाणं ऋजुत्वं सर्वदा आर्जवम् ॥ १ ॥

गावीरसंविद्बोधिनी ॥

श्रीकार्तवीर्यार्जुनाय नमः । रामामरप्रतापोऽयं संपत्यात्र स्वयंभू
भुजः अध्याये षोडशे व्याख्यां करोम्यहं विलापकः ॥ १ अथ पूर्वेण
पंचमाध्यायोक्तो दैवासुरप्रविभागः संपदोर्यास्ता हि विस्तरप्रदर्शनार्थं षो
डशोऽध्याय आरभ्यते तत्र दैव्याः संपदो महत्त्वप्रदर्शनार्थं इदं तत्त्वेनोपा
देयतामन्यस्या हेयतां च विक्षेपकारणत्वेन हेयतां च प्रदर्शयन्

श्रीभगवानुवाच । अभयमिति अभयमभीरुता सत्वस्यांतःकर
णस्य शुद्धिर्निर्मलता सत्वसंशुद्धिः ज्ञानयोगव्यवस्थितिरिति
ज्ञानं स्वधर्मनिश्चयो योगस्तदनुष्ठानोपायस्तयोर्व्यवस्थितिः
सर्वदा तन्निष्ठता यद्वा अभयं शरणागतानामभयदानसंकल्पपालनं
सत्वसंशुद्धिः सत्वस्य धैर्यस्य संशुद्धिर्निर्विक्षेपतेति यावत् ज्ञानं
स्वस्वत्वास्पदानां यथाशक्ति पात्रेभ्यः संविभागः दमो बाह्येंद्रि
यसंयमः यज्ञ इति यज्ञो द्विविधः श्रौतः स्मार्तश्च तत्र श्रौतोऽग्निहो
त्रदर्शपौर्णमासादिः स्मार्तश्च तद्विधः देवमनुष्यपितृभूतयज्ञ
भेदात्तत्रापि पंचमो ब्रह्मयज्ञः तस्य स्वाध्यायपदेन पृथगुक्तेः व
कायेंद्रियाणां प्रहृतिलक्षणधर्माणां सम्यक्त्वयार्थः तप इति
तपस्त्रिविधं शारीरादि सप्तदशेऽध्याये वक्ष्यमाणमार्जवमवक्र
त्वमिति ॥ १ ॥

मधुभाष्य ॥

अमर्षसाधनविरोधीन्यनेनाध्यायेन दर्शयति
तपो ब्रह्मचर्यादि ब्रह्मचर्यादिकं तप इत्यभिधानं पैशु
न्यं परोपद्रवनिमित्तदोषारोपणं राजादेः कथनं परोपद्रव
हेतूनां दोषाणां पैशुन्यं वचः राजादेस्तु मदह्रीते वदति दि
प उच्यत इत्यभिधानं लोलुप्त्वं रागः रागो लोलुप्त्वं तथा शक्ति
रित्यभिधानात् अचापलं स्थैर्यं चपलस्व चलोऽस्थिर
इति अभिधानात् क्षमा तत्क्रोधाभावेन सहायकर्तृत्वेन
पकृतिः अक्रोधरोषक्लेशयोः क्षमावान्सनिगद्यत इति
अभिधानात् दैवीं संपदमभिजातः प्रतिजातः जगतः
सत्यं प्रतिष्ठार्थं सर्वस्वविप्लुः नहैषपरीत्येनाहुः तस्योप
निषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्य इति
द्विश्रुतिः द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च स्थितं च यच्च
सच्च त्यच्चेति तस्योपनिषत्सत्यस्य सत्यमिति पश्चिवे

6

षनत्साय प्रतियामपति चेनीति प्राचीनपत्रलस्मृतिः प
रस्परसंभवो ह्युक्तः अन्नाद्भवंति भूतानीत्यादिना उष्मरो
मादि ल्लेप्रयेससदेतिहिमोद्यर्मे १। २ ३ ४ ५

१०॥१७॥

भाषा अनुवाद

अब इस अध्यायका तात्पर्य कहते हैं कि आसुरी सम्पत्
त्याग करके दैवी सम्पत्के आश्रय लेनेवाले मनुष्य मुक्त
होते हैं इसीकी निर्णय करनेके अर्थ सोरहें अध्याय मे उसका
विस्तार करते हैं कि हे अर्जुन सकल शास्त्रके अनुरूप मेरे क
हे इस वृत्तान्त के जानने से लोग सम्यक ज्ञानी और कृता
र्थ होते हैं यह भगवानने पन्द्रहें अध्यायके अन्त मे कहा है
तो कौन मनुष्य वह तत्व समझ सकते हैं और कौन नही इस
अपेक्षापर तत्व ज्ञानके अधिकारी औ अनधिकारीकी निर्णय
करनेके लिये सोरहें अध्याय का आरम्भ होता है क्यों कि जि
समे जिसका अधिकार है वह उसीसे फल पावता है इससे अ
व तत्वके अधिकारी पुरुषका गुण स्वरूप सम्पूर्ण दैवी संप
त को इस श्लोक से लेकर तीन श्लोक से कहते है कि अभय
औ सत्व संशुद्धि कहे बुद्धिकी प्रसन्नता औ ज्ञानयोग जो आ
त्मज्ञान की उपाय मे अवस्थिति कहे परिनिष्ठा औ दान कहे
अपने भोजन की वस्तु अन्न आदिका भी यथा उचित देना त
था दम अर्थात् बाह्य इंद्रियोंका संयम करना और यज्ञ कहे
यथाविधि से दर्श पौर्णमास आदि याग करना औ स्वाध्याय
कहे ब्रह्मयज्ञ और तप जो सत्रहें अध्यायके चौदहें श्लोक
मे कहेंगे देव द्विज गुरू पंडित ज्ञानी का पूजन तथा शौच
सीधापन कोमलताई ब्रह्मचर्य अहिंसा इनको शारीर तप
कहते हैं सो औ आर्जव कहे सीधा स्वभाव ॥ १ ॥

दोहा

निर्भय सत्व संशुद्धि अरु ज्ञानयोग स्थिति जोय दान दम रु स्वाध्या
य यज्ञ तप आर्जव कह सोय १॥

अहिंसासत्यमक्रोधस्त्यागःशान्तिरपैशुनं दया
भूतेष्वलोलुप्त्वंमार्दवंह्रीरचापलं २॥

शाङ्करभाष्य १

किंच अहिंसेति। अहिंसा अहिंसनं प्राणिनांपीडावर्जनं सत्यम
प्रियानृतवर्जनं यथाभूतार्थवचनं अक्रोधः परैराक्रुष्टस्याभिह
तस्यवा प्राप्तस्य क्रोधस्योपशमनं त्यागः संन्यासः पूर्वं दान
स्योक्तत्वात् शांतिरन्तःकरणस्योपशमः अपैशुनमपिशुनता
परस्मै पररंध्रप्रकटीकरणं पैशुनंतदभावोपैशुनं दया भूते
षुसतिप्रयोजने वाक्पाणिपादादीनामव्यापारश्चिरत्वं २॥

आनंदगिरिकृतटीका २

ब्रह्मयज्ञस्य स्वाध्यायेन पृथक्करणाद्दैवी सम्पदमभिजातस्य
विशेषणान्तराणि दर्शयति किंचेति। त्यागशब्देनयागदानं
कस्मान्नोच्यते तत्राह पूर्वमिति। लज्जाकार्यनिवृत्तिहेतुगर्हानिमि
त्तामनोवृत्तिः २॥ स्वामिकृतटीका ३॥

किंचाहिंसेति अहिंसापरपीडावर्जनं सत्यंयथादृष्टार्थभाषणं
अक्रोधस्ताडितस्यापिचित्तेक्षोभानुत्पत्तिः त्यागऔदार्यंशांतिःचित्तो
परतिः पैशुनंपरोक्षेपरदोषप्रकाशनं तद्वर्जनमपैशुनंभूतेषु
दीनेषुदयाअलोलत्वमलोलुपत्वमवणीलोपश्चार्षःमार्दवंमृदुत्व
अक्रूरता ह्रीरकार्यप्रवृत्तौलोकलज्जाअचापलंव्यर्थक्रियाराहि
त्यं २॥ पिशाचभाष्यटीका ४

किंच अहिंसाप्राणिनामपीडा अक्रोधः प्रसक्तस्यक्रोधस्य
त्यागः शांतिर्वाह्येंद्रियोपरतिः अपैशुनंपररंध्रप्रच्छादनं दया
भूतेषुरक्षणबुद्धिः अलोलुपत्वमिंद्रियाणांविषयसन्निधावपि
विक्रिया मार्दवमक्रौर्यं अचापलंव्यर्थचेष्टावर्जनं २॥

रामानुजभाष्यटीका ५॥

~~आर्जवं मनोवाक्कायवर्तनानामेकनिष्ठता~~ परेषु अहिंसा परपीडाव
र्जनं सत्यं यथादृष्टार्थगोचरभूतहितवाक्यं अक्रोधः परपीडाफल
कचित्तविकाररहितत्वं त्यागः आत्महितप्रत्यनीकपरिग्रहविमोच
नं शान्तिः इन्द्रियाणां विषयप्रावण्यनिरोधसंशीलनं अपैशुनं परा
नर्थकरवाक्यानिवेदनाकरणं दया भूतेषु सर्वेषु दुःखासहिष्णुत्वं
अलोलत्वमितिपाठः विषयेषु निःस्पृहत्वमित्यर्थः मार्दवं अका
ठिन्यं साधुजनविश्लेषानर्हतेत्यर्थः ह्रीः अकार्यकरणे लज्जा अचाप
लं स्पृहणीयविषयसन्निधावचपलत्वं २ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥ २ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अहिंसेति अहिंसा परपीडानिवृत्तिः सत्यं यथार्थभाषणं अक्रोधस्ता
डितस्यापि चित्तेक्षोभः ॥ तदुक्तं ॥ क्रुद्धे स्मेरमुखावधारणमथावि
ष्टप्रसादक्रमो नाक्रोशे विनयोक्तिरात्मदुरितोच्छेदोत्सवस्ताडने इति
त्यागश्चौदार्यं शान्तिश्चित्तोपरतिः अपैशुन्यं परापवादवर्जनं दीनेषु भू
तेषु दया अलोलत्वं अत्र वर्णलोपः छान्दसः अलोलुपत्वं मार्दवं
मृदुत्वमक्रूरता । ह्रीः अकार्यप्रवृत्तौ लोकलज्जा ॥ अचापलं व्यर्थ
क्रियाराहित्यं एकत्रावस्थितिर्वा ॥ २ ॥ श्रीमते रामानुजाय
नमः ॥ ॥ ॥ ॥

वनमालीटीका ८

कायवाङ्मनोभिः प्राणिपीडनं हिंसा तद्राहित्यं सत्यं भूतदुःखाहे
तुः यथार्थभाषणं परैराक्रोशे ताडने वा सति [illegible] यः क्रोधस्त
स्य तत्कालमुपशमनमक्रोधः त्यागः संन्यासः शान्तिरन्तःकरणस्यो
पशमः परस्मै परदोषप्रकाशनं पैशुनं तदभावोऽपैशुनं दया भूते
ष्वनुकंपा अलोलत्वं इन्द्रियाणां विषयसन्निधावप्यविक्रियत्वं मार्द

वमक्रूरत्वं ह्रीरकार्यप्रवृत्त्यारंभेतन्निवर्तिकालोकलज्जा अचा
पलंप्रयोजनंविनापिवाक्पाणिपादादिव्यापारयितृत्वंचापलंतदभावः २

हनुमद्वैजयंतीटीका १

किंच अहिंसेतिप्राणिजीवनानुच्छेदकतापरपीडावर्जनंवासत्यंय
थार्थ अननुवंधियथार्थस्पष्टार्थविषयहितवाक्यं अक्रोधः परकृतेस्व
तिरस्कारेप्युत्पन्नस्यकोपस्यनिरोधः त्यागः उदारतास्वहितप्रत्यनी
कपरिग्रह विमोचनंवा शांतिरिंद्रियाणांविषयप्रावण्यनिरोधसं
शीलनं अपैशुन्यंपरोक्षेपरानर्थकारिवाक्याप्रकाशनंदयाभूतेषु
सर्वेषुभूतेषुप्राणिमात्रेषुदयानुदुःखासहिष्णुता अलोलुप्त्वंविषये
षुनिर्लोभता अलोलुपत्वमितिवक्तव्येयकारलोपस्त्वार्षः मार्दवं
सज्जनवियोगासहनरूपकोमलताह्रीः कुत्सितकर्मकरणेलज्जा
अचापलंव्यर्थक्रियाविरहतास्पृहणीयविषयसन्निधावप्यचंच
लतावेतिद्वादशविधधर्माः २ ॥

मधुसूदनीटीका १

प्राणिवृत्तिच्छेदः हिंसातद्रहितत्वमहिंसा सत्यमनर्थानन्वंधिप्रियंयथाभू
तार्थवचनं परैराक्रोशेताडनेवाकृतेसतिप्राप्तस्यक्रोधस्यत
त्कालमुपशमनमक्रोधः दानस्यप्रागुक्तेस्त्यागः संन्यासः दमस्य
प्रागुक्तेःशांतिरंतःकरणस्योपशमः परस्मैपरोक्षेपरदोषप्रका
शनंपैशुन्यं दयाभूतेषुदुःखितेष्वनुकंपा अलोलत्वमलोलुपत्व
मिंद्रियाणांविषयसन्निधानेप्यविक्रियत्वं मार्दवमक्रूरत्वंह्रणाद्र
वृपत्नादिकाविषयशिष्यादिष्वप्रियभाषणादिव्यतिरेकेणबोध
यितृत्वं ह्रीः अकार्यप्रवृत्त्यारंभेतन्निवर्तिकालोकलज्जा अचाप
लंप्रयोजनंविनापिवाक्पाणिपादादिव्यापारयितृत्वंचापलं तदभा
वः आर्जवादयः अचापलांताब्राह्मणस्यासाधारणधर्माः

॥ २ ॥

पैशुनंतदभावो
अपैशुनं

श्री·
गी·टी·
षा

सदानंदीटीका ११

अहिंसाप्राणिपीडादिवर्जनंसर्वथैविना यथाभूतार्थवचनंसत्यंदो
षविवर्जितं १ आक्रोशताडनेवान्यैःकृतेक्रोधोयआगतः तस्यापश
मनंसम्यगक्रोधोविक्रियाधियः २ त्यागः संन्यासइत्युक्तः शांति
स्त्वापशमोधियः अपैशुनंपरस्मैयत्पररंध्रप्रकाशनं दुःखिते
ष्वनुकंपास्याद्दयालोलुत्वमत्र इंद्रियाणांस्वविषयसंनिधा
नेप्यविक्रिया ४ मार्दवंमृदुताक्रौर्यंप्रियवाक्यादिशीलता ह्रीरका
र्यप्रहत्याभैनत्यनिवंधिकात्रपा ५ अचापलंवाक्पाण्यादेर्हेयाचे
ष्टाविवर्जनं पैनेसाधारणधर्माश्चात्मेस्यार्जवादयः ६ ॥ २ ॥

नीलकंठीटीका १२

किंच अहिंसाप्राणिपीडावर्जनं सत्यमप्रियानृतवर्जनंयथाभू
तार्थभाषणं अक्रोधः परैराकृष्टस्याभिहतस्यवाप्राप्तस्यक्रोधस्यो
पशमनं त्यागः सर्वकर्मसंन्यासः पूर्वदानस्योक्तत्वात् शांतिरंतः
करणस्योपरमः अपैशुनंपरदोषप्रकाशनंपैशुनंतद्वर्जनं दया
दुःखितेषुभूतेषुकृपा अलोलत्वंइंद्रियाणांविषयसंनिधावप्य
विक्रिया मार्दवंमृदुता ह्रीर्लज्जा अचापलंअसतिप्रयोजनेवाक्पा
णिपादादीनामव्यापारयितृत्वं ॥ २ ॥

आनंदीटीका १३

अहिंसाप्राणिनामपीडनम् सत्यंभूतहितं त्यागः कर्मफलेच्छावि
रहः असक्तिर्विषयवैतृष्ण्यम् अपैशुनंपरोक्षंपरस्यदोषाविष्क
रणंपैशुनंतदभावः ॥ २ ॥

रामकंठीटीका १४

तथाहिंसाशास्त्रनिषिद्धायाःप्राणिवधादिक्रियायाःकामक्रो
धलोभहेतुकायाःकृतकारितानुमोदितादिविशेषपरिशून्यप
रिवर्जनं। तथासत्यमात्यंतिकभूतहितसंपादनाभिसंधिपरिशु

द्वयथादृष्टानुमितार्थकथनमक्रोधोहिंसानिष्पत्तिहेतोर्वि
वेकज्ञानिनः कोपाख्यस्यचित्तक्षोभस्याभावः त्यागोदानेस्या
क्तत्वात् ततः क्रियाफलाभिसंधेः परिहारोऽसक्तिः शास्त्रवि
हितेसेव्येषुनिमग्नचित्तत्वं । अपैशुनंपिशुनः परदोषसूच
कस्तस्यभावः पैशुनंतदभावोराजादिविषयेद्वेषात्परावद्यावि
ष्करणाभावः तथादयाभूतेषुसर्वप्राणिषुक्लेशापन्नेषुतज्जि
हीर्षयाकरुणा तथालोल्पंनिषिद्धविषयेषुलम्पटत्वंलो
ल्पंतदभावोलोल्पं निषिद्धविषयेषुप्रवृत्तौसत्यामपिरागद्वे
षरहितत्वेनभावः तथामार्दवं मृदुचनिखिलेषुभूतव्रातेषु
स्वात्मन्इवेष्वरत्वभावनयातिकोमलान्तंतस्यभावोमार्दवं.
तथाह्रीर्लज्जास्मिन्निषेव्यमानेसाधुजनोमाविगर्हीदित्याश
ड४ कयाकुत्सितंतिनकुर्वचनश्चेष्टितेषुजुगुप्सेतियावत् तथाचा
पलंचपलः सत्कार्येष्वस्थिरस्तस्यभावश्चापलंतदभावोव्यग्र
करणीयेष्वप्रमत्ततेनेत्यर्थः ।२ ॥

लासिकी [illegible]टीका १५

किंच अहिंसापरपीडावर्जनम् सत्यंभूतहितयथादृष्टार्थभाषणं
अक्रोधश्चित्तक्षोभकारणकोपपरिवर्जनम् त्यागः स्वकीय
स्यद्रव्यस्यपरकीयत्वापादनम् शान्तिश्चित्तविक्षेपपरिवर्ज
नं अपैशुनंपरदोषानाविष्करणम् भूतेषुदया अलोलुत्वम
लोलुपत्वम् वर्णलोपआर्षः मार्दवंमृदुत्वमक्रूरता ह्रीर
कार्यमहत्त्वैलोकलज्जा अचापलंव्यर्थक्रियाराहित्यम् एतेप्र
धर्माः प्रायशोब्राह्मणस्यैव [illegible]
[illegible] २ ॥

गी·
बो·टी·

पंचोली टीका

अहिंसेति प्राणपीडनमहिंसनं अनृतवर्जितयथाभूता
र्थवचनं सत्यमक्रोधः उपशमनमक्रोधः त्यागः सर्वक
र्मसंन्यासः अंतःकरणनिग्रहः शांतिः परोक्षप्रकटीकरणा
भावः अपैशुनं दुःखितेषु कृपा दया विषयसन्निधोऽपीन्द्रिया
णामविक्रिया अलोलत्वं मार्दवं अचापलं अलोलत्वं वर्ण
लोपः आर्षः अक्रौर्यं ह्रीः कार्यकरणलज्जा असति प्रयोज
नेवाक्पाणिपादादीनामचंचलत्वं २

रणवीरसमित्बोधिनी ॥

अहिंसेति प्राणाहतिच्छेदो हिंसा तदभावोऽहिंसा सत्यं यथास्थि
तार्थवचनं परकृताक्रोशनानंतरं प्राप्तो विकारः क्रोधस्तस्य
तत्कालमुपशमनमक्रोधः त्यागो दानं शांतिरंतःकरणस्यो
पशमः परदोषप्रकाशनं पैशुनं तदभावोऽपैशुनं दया दुःखि
तेषु भूतेष्वनुकंपा अलोलत्वमिंद्रियाणां विषयसन्निधानेऽपि
विकारित्वं मार्दवमक्रूरत्वं ह्रीरकार्यप्राप्तौ तत्प्रतिबंधकलोक
लज्जा निष्प्रयोजनं वाक्पाण्यादीनां व्यापारयितृत्वं चापलं तद
भावोऽचापलमिति २ ॥

मधुभाष्य

२॥

भाषा अनुवाद

और अहिंसा कहे परपीड़ा का त्याग औरसत्य अर्थात् देखा
सुना ज्यों का त्यों कहना औरअक्रोध कहे कोई मारै या कुवा
च्य कहै तो भी चित्त क्रोधवश न होने देना तथा त्याग कहे
प्रिय अप्रिय से उदासीनता और शांति अर्थात् विषयों
से चित्तकी निवृत्ति औरअपैशुन्य कहे परनिन्दा वर्जन पीठि
पीछे निंदा करने को पैशुन्य कहते है और दीन दरिद्र पर
दया तथा अलोलुपत्व कहे निर्लोभता औरमार्दव कोमलता
औरह्री कहे कुकर्म करने मे लोकलज्जा तथा अचापल अ
र्थात् वृथा बोलना यावृथाकछु करना चञ्चलताई जो सो
न होय ॥२॥

दोहा

अहिंसा सत्य अक्रोधहि त्याग शांति अपैशुन भूतदया अलो
लता मृदु लज्जा अचापल गुन २॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता
भवंति सम्पदं दैवीमभिजातस्य भारत ३ ॥

शंकरभाष्यटीका २

किंच तेजइति तेजः प्रागल्भ्यं न त्वग्गता दीप्तिः क्षमाः आक्रुष्टस्य ताडितस्य वान्तर्विक्रियानुत्पत्तिः उत्पन्नायां विक्रियायां प्रशमन अक्रोधः इत्यवोचाम इत्थं क्षमाया अक्रोधस्य च विशेषः धृतिर्देहेंद्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्तःकरणवृत्तिविशेषो येनोत्तम्भितानि करणानि देहश्च नावसीदंति शौचं द्विविधं मृज्जलाभ्यां कृतं बाह्यमाभ्यंतरं च मनोबुद्ध्योर्नैर्मल्यं मायारागादिकालुष्याभावः एवं द्विविधं शौचं अद्रोहः परजिघांसाभावोऽहिंसनं नातिमानितात्यर्थं मानोऽतिमानः स यस्य विद्यते सोतिज्ञानस्य किं विशिष्टां सम्पदं दैवीं देवानां सम्पदं तामभिलक्ष्य जातस्य दैवीविभूत्यर्हस्य भाविकल्याणस्येत्यर्थो हे भारत ३

आनन्दगिरिकृतटीका २

दैवीं सम्पदं यामस्य विशेषणान्तराण्यपि संतीत्याह किंचेति । त्वाचमर्थं कीर्तयति नेति । अध्यात्माधिकारादिति शेषः । क्षमाक्रोधयोरेकार्थत्वेन पौनरुक्त्यमाशंक्य परिहरति उत्पन्नायामिति तयोरेव विशेषात्र पौनरुक्त्यं फलितमाह इत्थमिति वृत्तिविशेषमेव विशदयति येनेति । शौचस्य द्वैविध्यमेव प्रकटयति मृज्जलेत्यादिना । नैर्मल्यमेव स्फोरयति मायेति । उक्तमुपसंहरति एवमिति । अतिमानित्वभावमेव व्यनक्ति आत्मन इति । अस्यैतानि विशेषणानीत्यपेक्षायामाह भवन्तीति । साधकस्य मनुष्यदेहस्यैवैवकये दैवी सम्पदमभिलक्ष्य जातत्वमित्याशंक्याह दैवीमिति ३ ॥

स्वामिकृतटीका ३ ॥

किंच तेज इति तेजः प्रागल्भ्यं क्षमा परिभवादिषु उत्पद्यमानेषु क्रोधस्य निवंधः धृतिर्दुःखादिभिरवसीदतस्तस्य स्थिरीकरणं शौचं बाह्य

मानी तद्भावो नातिमानिता आत्मनः +
पूज्यतातिशयभावना भाव इत्यर्थः ×+
भवंत्यभयादीनि एतदंतानि सम्पदमभि

श्री· गी·टी· षो·

भ्यंतरशुद्धिः अद्रोहो जिघांसाराहित्यं अतिमानिता आत्मन्यति
पूज्यत्वाभिमानस्तदभावो नातिमानिता एतान्यभयादीनि षड्विंश
तिर्दैवीं संपदमभिजातस्य भवंति देवयोग्यां सात्त्विकीं संपदम
भिलक्ष्य तदाभिमुख्येन जातस्य भाविकल्याणस्य पुंसो भवंती
त्यर्थः ३ ॥

प्रकाशित

पिशाचभाष्यटीका ४

तेजः प्रतापः क्षमा क्रोधकारणेषु सत्स्वपि चित्तस्याविक्रिया
धृतिर्दुःखपिपासादिसहनं शौचं मलप्रोपनं अद्रोहः परजि
घांसाभावः नातिमानिता आत्मनः पूज्यताप्रतिपत्तिः एते भया
दयो भवंति जायंते संपदं लाभं देवानामियं दैवी तामभिलक्ष्य
जातस्य पार्थ संपदं लब्धुं जातस्येत्यर्थः ३ ॥

रामानुजभाष्यटीका ५

तेजः तर्जितैः अनभिभवनीयत्वं क्षमा परनिमित्तपीडानुभवे
पि तं प्रति चित्तविकाररहितता धृतिः महत्यामप्यापदि कृ
त्यकर्तव्यतावधारणं शौचं बाह्यांतःकरणानां कृत्ययोग्यता शा
स्त्रीया अद्रोहः परेष्वनुपरोधः परेषु स्वच्छंदवृत्तिनिरोधरहि
तत्वमित्यर्थः नातिमानिता स्थाने गर्वः निमानित्वं तद्रहितता
एते गुणाः दैवीं संपदमभिजातस्य भवंति देवसंबंधिनी दैवी दे
वा भगवदाज्ञानुवृत्तिशीलाः तेषां संपत्सा च भगवदाज्ञानुवृ
त्तिरेव तामभिजातस्य तामभिमुखीकृत्य जातस्य तामभिवी
यते जातस्य ~~तामभिवीक्ष्य जातस्य~~ भवंतीत्यर्थः ३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३ ॥

परमार्थप्रपाटीका ७

~~[illegible]~~ तेज इति तेजः प्रागल्भ्यं क्षमा परिभवादिषु क्रोध
प्रतिबंधः धृतिश्चित्तस्थिरीकरणं शौचं बाह्यांतरशुद्धिः अ
द्रोहो द्वेषराहित्यं नातिमानितास्वस्मिन् पूज्यताभिमानराहित्यं

एतान्यभयादीनि षड्विंशति लक्षणानि दैवीं संपदमभिलक्ष्य
जातस्य निष्पन्नस्य भवंति ॥३॥

वनमालीटीका ८

तेजः प्रागल्भ्यं स्त्रीवालकादिमूढैरभिभाव्यत्वं क्षमा सत्यपि
सामर्थ्ये पराधसहनं धृतिर्देहेंद्रियेष्ववसादं प्राप्तेष्वपि तदुत्तं
भकः प्रयत्नविशेषः शौचं दंभादिराहित्यमांतरं मृज्जलादि
नावाह्यं अद्रोहः परजिघांसा तदभावोऽद्रोहः अतिमानितात्मनि
पूज्यत्वातिशयधीस्तदभावेनातिमानिता तमेतं वेदानु
वचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादि
श्रुत्या विविदिषोपयिकतया विनियुक्तोऽसाधारणसा
धारणः स्ववर्णाश्रमधर्मो इहोपलक्ष्यते एते धर्मा भवंति
निष्पन्नं ते दैवीं संपदं वासनासंततिं देहारंभकाले पुण्यक
र्माभिव्यक्तामभिलक्ष्य जातस्य पुरुषस्य ते विद्युः ॥ कर्मणी
समवायेनेशर्वप्रजाच पुण्यः पुण्येन कर्मणा भवति पापः पापेनेत्यादिश्रु
तिभ्यः ३ ॥

उत्तमवैजयन्तीटीका ९ ॥

किंचाथ क्षत्रियाणां धर्मानाह तेजः क्षमेति तेजोऽदुर्जनाभिभवनीयत्वम्
क्षमा सामर्थ्ये सत्यपि स्वासमानेन परिभावके प्रतिकोपानुदयता धृतिः मह
त्यामप्यापदि स्वकार्यकर्मव्यग्रतेनिने धार्थ्यः स्युः अथ वैश्यानाह शौचं
बाह्याभ्यंतरशुद्धिः स्वकार्ये वाणिज्यादौ मायानृतादिराहित्यं वा अद्रोहः
परजिघांसया स्वाद्यग्रहणमिति द्वे अथ शूद्राणामाह नातिमानिता आ
त्मनि पूज्यत्वभावना मूल्यनया विप्रादिषु त्रिषु नम्रतेत्येको धर्मस्तेषामिति
षड्विंशतिः हे भारत तत्र तत्र प्रधानभूता अनुक्तानामप्युपलक्षणार्था ए
ते गुणाः देहारंभकाले नृणां विभगवद्वचनसहकृतैः पुण्यपुंजैरभिव्यक्तां दे
वीं देवनक्षत्रेण दत्तां देवसंबंधिनीं वासनाभाग्यभवां वासनारूपां संपदमभिल
क्षीकृत्य जातस्य पुरुषस्य भवः सदयनेन पुण्यः पुण्येन कर्मणा भवति पा

श्री·
गी·टी·
पो·

पः पापेनेतिश्रुतेः देवाः खलु परेशानुवृत्तिशीलास्तेषामियं संपत् तया तत्प्रापकज्ञानभक्तिसंभवात्संसारनिवृत्तिरूपफलमेतदित्यभिप्रायः राजर्षि वंशोद्भवत्वान्नवाप्येते गुणा मत्कृपया भवन्तीति संबोधनाशयः ३ ॥

मधुसूदनीटीका १०

तेजः प्रागल्भ्यं स्त्रीबालकादिभिर्मूढैरनभिभावितत्वं क्षमा सत्यपि सामर्थ्ये परिभव हेतुं प्रति क्रोधस्यानुत्पत्तिः धृतिर्देहेन्द्रियेष्ववसादं प्राप्तेषु तदुत्तम्भकः प्रयत्नविशेषः येनोत्तम्भितानि करणानि शरीरं च नावसीदन्ति एतत्त्रयं क्षत्रियस्यासाधारणं शौचं बाह्यमाभ्यन्तरं अर्थप्रयोगादौ मायानृतादिराहित्यं तत्र मृज्जलादिजनितं बाह्यम् अभ्यन्तरं तु मनःशरीरशुद्धिरूपं तथा बाह्यत्वेनान्तःकरणवासनात्मभावात् मदासनानामेव सात्त्विकादिभेदभिन्नानां देवासुरादिसंपद्रूपत्वेनात्र प्रतिपादयिषितत्वात् स्वाध्यायादिवत् केनचिद्रूपेण वासनारूपत्वेन दृष्टादेयमेव द्रोहः परजिघांसया शस्त्रग्रहणादि तदभावः अद्रोहः एतद्द्वयं वैश्यस्यासाधारणं अत्यर्थं मानिता मानित्वं अतिशयमानिता तदभावो नातिमानिता पूज्येष्वनम्रता अयं शूद्रस्यासाधारणो धर्मः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुत्या विविदिषोपयिकतया विनियुक्ता असाधारणाः साधारणाश्च वर्णाश्रमधर्मा इहोपलक्ष्यन्ते एते धर्मा भवन्ति निष्पद्यन्ते दैवीं शुद्धसत्त्वमयीं संपदं देवानां संपत्तिं शरीरारंभकाले पुण्यकर्मभिरभिव्यक्तामभिलक्ष्य जातस्य पुरुषस्य तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च पुण्यः पुण्येन कर्मणा भवति पापः पापेनेत्यादिश्रुतिभ्यः हे भारतेति संबोधयन् शुद्धवंशोद्भवत्वेन त्वं तादृश एव धर्मयोग्योसीति सूचयति [illegible]

[illegible] ॥

सदानंदीटीका ११ ॥

तेजः प्रागल्भ्यं अबालैर्मूढैरनभिभाव्यता क्षमा सत्यपि सामर्थ्ये परापराधसहिष्णुता १
धृतिर्देहेन्द्रियेष्ववसादं गतेष्वपि तदुत्तम्भकयत्नोस्ति येन देहेन्द्रियाणि च २
उत्तम्भितानि यत्नेन नावसीदन्तीति दैहिकी एतत्त्रयं क्षत्रियस्यासाधारणमितीरितं ३
मायानृतादिराहित्यमर्थेषु शौचमान्तरं एतन्मात्रं वपुषो गात्राणां बाह्यं तन्मृज्जलादिजं
योऽर्थेषु शुचिः स शुचिः न मृद्वारिशुचिः शुचिः अद्रोहोऽपजिघांसा यावज्जीवं चेति तत्
द्वयं विशामसाधारणं प्रोक्तं पूज्येष्वनम्रता नातिमानिता आत्मनो मनसः श्रमत्वबुद्ध्यभावरतीर्यते
शुद्धसत्त्वमयीं दैवीं संपदमभिलक्ष्य हि उत्पन्नस्य प्राक्पुण्यैः परेशेति धर्मा भवन्त्यपि ८

१ पुण्यं २ त + पापः

तेविद्याकर्मणी पुण्यं कर्मणा पापेनवेत्यादिश्रुतिभ्यामपिविनिश्चितं ८
सुहृद्वसोऽरवत्वेतेवधर्मानीहशांशुभान् आमेयोग्योनिष्ठत्वाज्जारेतेनिपदस्थनिः

नीलकंठीटीका १२

किंच तेजःप्रागल्भ्यंनत्वग्गता क्षमाआक्रुष्टस्यताडितस्यवांतर्विक्रियानुत्प
त्तिः उत्पन्नायाविक्रियायाःप्रशमनमक्रोधइत्युक्तं धृतिर्देहेंद्रियेष्ववसादंप्रा
प्तेषुतस्यप्रतिषेधकोंतःकरणवृत्तिविशेषोयेनोत्तंभितानिदेहादीनिनावसी
दंति शौचंद्विविधंमृज्जलाभ्यांबाह्यं आंतरंमनोबुद्ध्योर्नैर्मल्यंमायारागादिका
लुष्याभावः अद्रोहः परजिघांसायाअभावः नातिमानिताअत्यंतमानराहित्यं
एतानिअभयादीनिदैवींसत्वप्रधानांसंपदंअभिलक्ष्यजातस्यसत्वभावेनाभवं
तिहेभारत ॥३॥

आनंदीटीका १३

तेजोयथापरेनाभिभवेयुः क्षमापरापराधसहनंधृतिः प्राप्तस्येंद्रि
यक्षोभस्यनिरोधः तुष्टिर्यथालाभंसंतोषः अद्रोहः परापचिकी
र्षायाअभावः ३ ॥

रामकंठीटीका १४

तेजः परानाभिभवनीयत्वकारणंस्वाभाविकमोजः तथाक्षमा ते
जस्वित्वेसत्यपिपरापराधसहिष्णुता धृतिरवसादहेतौसन्निहिते
पिस्वपरिस्पंदाप्रवणलक्षणंधैर्यं तथातुष्टिःसर्वथासर्वदाविषा
ददोषानाक्रांतचित्तत्वं तथाद्रोहः प्राणिनांहननविषयायाइच्छाया
अप्यभावस्तथानातिमानिता मानोदेहादिषुनित्येष्वहंकारस्तथा
परतंत्रेषुभोगेषुममकारः ससर्वदानिश्चलत्वादतिशयवानतिमा
नस्तदभिभवोनातिमानः सचमुमुक्षूणामेवसंभवति तेह्ययथो
क्ताभिमानमहादोषोच्छेदनित्योद्यताभवन्त्यतएवैतस्मिन्सतिदा
नादयोधर्मादैवसम्पदभिव्यक्तिहेतवः संपन्नाइतिसर्वेषांसं
स्कारकत्वेनतस्यपर्यंतेनिर्देशःकृतः एवंमुमुक्षुजनाव्यभिचारि
णीदैवसर्गाभिव्यंजिकांपरां परांगुणसामग्रीप्रतिपाद्येदानींत
द्वैवद्विप्रकारस्यतद्विपरीतस्यासुरसर्गस्यानुक्रमेणप्रतिपादय
ति दैवसर्गवत्परापरभेदेनासुरोपिसर्गोद्विप्रकारोविवक्षितः ।
तत्रतमोगुणप्रधानोनरकतिर्यग्योनिपातनतत्कर्माधिकृतपुरु
षात्मकोऽपरस्तस्याग्रेविस्तरेणविशेषणानिवक्ष्यति संप्रतितस्या

श्री॰ गी॰ टी॰ षो॰

+अधुनात्त्रियादीनां ज्ञानाधिकारिणं धर्मजातमाह॥

मानगुणोद्देशद्वारेणासुरीसम्पदं प्रतिपादयितुमाह ।३।

लासिकी वल्लभीटीका १५

+तेजः परानभिभवनीयत्वकारणं प्रागल्भ्यम् क्षमा बलवत्त्वे परापराधसहिष्णुता धृतिर्दुःखादिभिरवसीदतश्चित्तस्य स्थिरीकरणं यत्नेनाभिजानन्क्षत्रियस्य शौचमान्तरमर्थप्रयोगादौ मायाद्यनादिराहित्यम् अद्रोहः परवञ्चनाभावः एतौ वैश्यस्य नातिमानिता पूज्येषु नम्रत्वेन निम्नदृश्यासाधारणो धर्मः पूर्वान्यभयादीनि षड्विंशतिर्दैवीसंपदमभिजातस्य भवन्ति देवयोग्यां सात्त्विकीं संपदमभिलक्ष्य तदाभिमुख्येन जातस्य भाविकल्याणस्य पुंसो भवन्तीत्यर्थः [illegible]॥३॥

पंचोले टीका

तेज इति त्वगाज्ञादीनि तेजः आकृष्टस्यतादितस्य वान्तर्विक्रियाभावः क्षमा देहेन्द्रियादीनामवष्टम्भकारी धृतिः शौचं बाह्याभ्यन्तरं मायारागादिकालुष्याभावः अद्रोहिंसनेच्छा द्रोहः आत्मनः पूज्यतातिशयभावनाभावः नातिमानिता एतान्यभयादीनि अभिमानित्वानानि दैवीं संपदं अभिजातस्य देवविभूत्यर्हस्य दैवीं संपदं भवन्ति ३ ॥

रत्नवीरसमिद्धोयिनी॥

किंच तेज इति तेजः प्रागल्भ्यं क्षमा सत्यपि सामर्थ्ये परिभव हेतुं प्रति क्रोधस्यानुत्पत्तिः धृतिर्देहेन्द्रियानवसादकः प्रयत्न विशेषः एतत्त्रयं क्षत्रियस्यासाधारणं शौचं बाह्याभ्यन्तरशुद्धि रद्रोहः परजिघांसया शस्त्रग्रहणाभाव एतद्द्वयं वैश्य स्यासाधारणं नातिमानिता आत्मनि पूज्यतातिशयभावना राहित्यं एते धर्मा दैवी देवानां राज्ञामिव दैवी तां संपदमभिल क्ष्यीकृत्य जातस्य पुरुषस्य भवंति एवं जितपुण्यत्वेनावाम देवभावास्तस्तत्येण पुनर्मनुष्यलोके वर्तीय आमरणभावाः द्विविवहितानामद्यतिरिक्ताक्षरहोन्यतेऽतः अष्टभारतेति

संबोधनं कुटुंबपोषकत्वेन स्तुतत्वात्त्वमेव तातदयाधर्मयोग्योसीति सूचनार्थमिति भावः ३॥

मध्यभाष्य

३॥

भाषा अनुवाद

और तेज कहे दिठाई और क्षमा औ धृति कहे हानि तथा दु
ख मे धीरज रखना और शौच अर्थात् बाहिर भीतर शुद्धता
अद्रोह कहे हिंसा ईर्षा रहित होना अतिमानिता कहे अपनी
पूज्यमान प्रशंसा का अभाव येई अभय आदि जो छबीस
प्रकार की दैवी सम्पत् हैं सो उसी को होतीहै जिसको कल्या
ण भावी है अर्थात् आगे भला होनहार है । ३ ।

दोहा

तेज क्षमा धृति शौच हिं नहि अतिमान अद्रोह संपद दैवी
होतहै भारत कुलीनहुं कोह ३ ॥

18

दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च अ
ज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ४

शांकरभाष्यटीका १

अथेदानीमासुरी सम्पदुच्यते दंभो धर्मध्वजित्वं दर्पो धनस्वजनादिनि
मित्त उत्सेकोऽभिमानः पूर्वोक्तः क्रोधश्च पारुष्यमेव परुषवचनं यथा का
णं चक्षुष्मान्विरूपं रूपवान् हीनाभिजनमुत्तमाभिजन इत्यादि अज्ञानं चा
विवेकज्ञानं मिथ्याज्ञानं कर्तव्याकर्तव्यादिमिथ्याप्रत्ययविषयं अभिजात
स्य पार्थ किमभिजातस्येत्याह असुराणां सम्पदासुरी तामभिजातस्ये
त्यर्थः ४ ॥

आनन्दगिरिकृतटीका २

आदेयत्वेन दैवी सम्पदुक्ता हेयत्वेनासुरीं सम्पदमाह दंभेति उत्सेको
मदो महद्भिरधीरणे हेतुः आत्मन्युत्कृष्टताध्यारोपोऽतिमानः क्रोधस्तु कोपा
परपर्यायः स्वपरापकारप्रवृत्तिहेतुर्नेत्रादिविकारलिंगोऽन्तःकरणवृत्तिवि
शेषः परुषो निष्ठुरः प्रमत्तरूपवाक् तस्य भावः पारुष्यं तदुदाहरति यथे
ति तामभिजातस्य दंभादीन्यज्ञानान्तानि भवन्ति इत्यनुषज्यते ४ ॥

स्वामिकृतटीका ३ ॥

आसुरीं संपदमाह दंभ इति दंभो धर्मध्वजित्वं दर्पो धनविद्यादिनिमित्तश्चित्तो
त्सेकः अभिमानो व्याख्यातः क्रोधः प्रसिद्धः पारुष्यं निष्ठुरत्वं अज्ञानमविवे
कः आसुरीमित्युपलक्षणं असुराणां राक्षसानां च या संपत्तामासुरीमभिल
क्ष्य जातस्यैतानि दंभादीनि भवन्तीत्यर्थः ४ ॥

पिशाचभाष्यटीका ४ ॥

दंभो धर्मध्वजः दर्पः धनादिनिमित्तः चित्तोत्सेकः अभिमानः आत्म
नः पूज्यत्वमतिः क्रोधः कोपः एतेन भयादयो भवंति पारुष्यं
क्रौर्यं अज्ञानमनवबोधः असुराणामियं संपदासुरी ॥ ४ ॥

रामानुजभाष्यटीका ५ ॥

दंभो दर्पेति दंभो धार्मिकत्वख्यापनाय धर्मानुष्ठानं दर्पः कृत्याकृत्याविवेकक
रो विषयानुभवनिमित्तो हर्षः अभिमानः स्वविद्याभिजनानुरूपोऽतिमा
नोऽभिमानः क्रोधः परपीडाफलचित्तविकारः पारुष्यं साधूनामुद्वेगकरः स्व

गा

भावः अज्ञानं परापरतत्त्वकृत्याकृत्याविवेकः एते स्वभावा आसुरीं संपदम
भिजातस्य भवंति असुरा भगवदाज्ञातिवृत्तिशीलाः ४ ॥

अभिनवगुप्तटीका ६

स्पष्टार्थः ४ ॥ ॥

परमार्थप्रपाटीका ७

अथासुरीं संपदमाह दंभ इत्यादिना दंभो धर्मध्वजित्वं दर्पो धनविद्यादिनिमि
त्तश्चित्तोत्सेकः अभिमानोऽहंभावः क्रोधः कोपातिशयः पारुष्यं निष्ठुर
त्वं अज्ञानमविवेकः आसुरीमित्युपलक्षणं असुराणां राक्षसानां संपत्ति
तामभिलक्ष्य जातस्यैतानि दंभादीनि भवंति ४ ॥

वनमालीटीका ८ ॥

उपादेयत्वेन दैवीं संपदमुक्त्वेदानीं हेयत्वेनासुरीं संपदमेकेन श्लोकेन संक्षिप्या
ह दंभ इति दंभो धार्मिकतयात्मनः ख्यापनं तदेव धर्मध्वजित्वं दर्पो धनस्वज
नादिनिमित्तो महदवधीरणाहेतुर्गर्वविशेषः अभिमान आत्मन्यत्यंतश्रेष्ठ
त्वबुद्धिः देवाश्च असुराश्च उभये प्राजापत्याः पस्पर्धिरे ततोऽसुरा अतिमानेनैव
कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुहुतश्चेरुस्तेऽतिमानेनैव पराबभूवु
स्तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमान इति श्रुतेः पराभवहेतु
कः क्रोधः स्वपरापकारप्रवृत्तिहेतुरंतर्ज्वलनात्मकोऽतःकरणवृत्तिविशे
षः पारुष्यं प्रत्यक्षं रूक्षवदनशीलत्वं अज्ञानं कार्याकार्यविवेकाभावः आसु
रीं रजस्तमोमयीं संपदमशुभवासनां देहारंभकाले पापैरभिव्यक्तामभिल
क्ष्य जातस्य पुरुषस्य दंभाद्या अज्ञानांता दोषा एव भवंति न तु भयाद्या गुणा
इत्यर्थः ४ ॥

उत्तमवैजयंतीटीका ९ ॥

अथ निरयगामिकरीमासुरीं संपदमाहैकेन दंभ इति दंभो धार्मिकतया ख्या
पनाय धर्मानुष्ठानं दर्पो धनविद्याभिजनजन्यो गर्वः कार्याकार्याविवेकक
रो विषयानुभवनिमित्तको हर्षो वा अभिमानः जातिकुलविद्यादिमहत्त्वेन स्व
स्मिन्नत्यंतपूज्यत्वबुद्धिः चकारः पुनरर्थकः क्रोधः स्वपरपीडाफलकोऽन्तर्विका
रः पारुष्यं साधूनामुद्वेगकरमप्रियत्वाद्यभावितं एवकारो योगव्यवच्छेदार्थ
कः शाठ्यं पाटवमेवेति वा तेनैव भया सत्त्वसंशुद्धीत्यादयो गृह्यंते चकारोऽहिं
सासत्यादेः समुच्चायकः अज्ञानं स्वपररूपकार्याकार्यविवेकधीस्त्यत्वं

वशाद्धेः तेजोदमादेः समुच्चायकः एतेगुणाः देहारंभकालेभ्युदयेरनादि
पापपुंजैर्दैवकामासुरीसम्पुभवासनामभिलक्ष्यजातस्यपुरुषस्यभवंति पा
पः पापेनेतिश्रुतेः पार्थेतिसंबोधनेमत्तिल्लक्षणः पुत्रत्वात्त्वमेवेनेनसंतीति
सूचितं ४ ॥

+ आदेयत्वेनदैवींसंपदमुक्त्वाइदानींहेयत्वेनासुरींसम्पदमेकेनश्लोकेनसंक्षिपन्नाह ॥

मधुसूदनीटीका १०

+ दंभः धार्मिकतयात्मनः ख्यापनंतदेवधर्मध्वजित्वं दर्पः धनस्वजनादिनि
मित्तोमहदवधीरणाहेतुर्गर्वविशेषः अतिमानः आत्मन्यतिपूज्यत्वस्य
त्वातिशयाध्यारोपः देवासुरावाग्रहराज्ञाभयप्राज्ञापव्याः पर्वस्थितेनतेऽस
राध्यतिमानेनैवकस्मिंश्चिदपिनकर्तव्यमेति स्वेष्टवाख्योपाध्यायकेनवहन्तितिमा
नेनैवपरावभूवुस्तस्मात्मानमतिमन्येतपराभवस्यैतन्मुखंयदतिमानइति
शतपथश्रुतेः क्रोधः स्वपरापकारप्रवृत्तिहेतुरभिज्वलनात्मकश्चांतःक
रणवृत्तिविशेषः पारुष्यमप्रियवचनशीलत्वं चकारोऽनुक्तानांभा
वभूतानांचापलादिदोषाणांसमुच्चयार्थः अज्ञानंकर्तव्याकर्तव्यादिविष
यविवेकाभावः चशब्दोऽनुक्तानामभावभूतानामभावभूतानामधृत्यादि
दोषाणांसमुच्चयार्थः आसुरीमसुरसंपदिदंहिभूतांराजसतामसींसंपद २
मभुभवासनासंततिंशरीरारंभकालेपापकर्मभिरभिव्यक्तामभिलक्ष्यजा
तस्यकुपुरुषस्यदंभाद्याअज्ञानान्तादोषाएवभवंति नत्वभयाद्यागुणाइ
त्यर्थः हेपार्थेतिसंबोधयन् अहमात्मकत्वेनत्वंदयोग्यतांसूचयति
[illegible] ४ ॥

सदानंदीटीका ११

आदेयत्वेनदैवींचसंपदमासुरीं हेयत्वेनाहसंक्षिपन्श्लोकेनैकेनमाध
वः १ आत्मनोधार्मिकत्वेनख्यापनंदंभउच्यते विद्यादिहेतुकोगर्वोदर्पउन्मेकसं
ज्ञकः आत्मन्यसमनपूज्यत्वातिशयारोपणमस्यासौ अभिमानःपराभूतात्मस्वाये
नस्मरनः ३ क्रोधःस्वपरयोर्दुःखहेतुरसंततिष्फलः अभिज्वलनरूपोधीवृत्तिभे
दोतितापदः ४ पारुष्यंरूक्षवदनशीलत्वंसमुखेनदर्शा चकारोऽनुक्तभावाना
मदोषाणांसमुच्चये ५ कार्याकार्यादिविषयेविवेकोज्ञानमुच्यते चोऽनुक्तानामभा
वानांकुत्सितानांसमुच्चये रजस्तमोमयीदुष्टवासनासंततिर्मलैः शरीरारंभ
कालेभिव्यक्तातामभिलक्ष्यच पुंसोजातस्यदंभाद्यादोषाएतेभवंतिवै विस्पष्ट
मात्मकत्वेनत्वमेतेषांनयोग्यता ८ ४ ॥

नीलकंठीटीका १२

अथेदानीं रजस्तमोमयीमासुरीसंपदमुच्यते दंभ इति दंभो धर्मध्वजित्वं दर्पः धनाभिजननिमित्त उत्सेकः अभिमानः आत्मनि पूज्यताबुद्धिः क्रोधः प्रसिद्धः पारुष्यं निष्ठुरभाषणं अज्ञानं अविवेकजनितो मिथ्याप्रत्ययः एते आसुरीं संपदमभिलक्ष्य जातस्य भवंतीति हे पार्थ ४ ॥

आनंदीटीका १३

अथासुरीमाह आसुरीसत्त्वाभिभवाद्रजस्तमसोः समुद्रिक्ता दंभादयः पूर्वं व्याख्याताः ४ ॥

रामकंठीटीका १४

एते धर्मा आसुरी रजस्तमः प्रधानत्वादासुरशब्देनोक्ता संपदं शरीरादिसंपत्तिमभिमन्तास्वीकर्तृ जातस्य कर्मभूमावुत्पन्नस्य पुरुषस्य भवंति तत्र दंभो दृष्टमात्रफलतया श्रद्धादिरहितचित्तत्वेन नानाविधधर्मक्रियाचरणं दर्पः स्वगुणसंभावनया हर्षमोहात्मकः चित्तविकारः अभिमानः प्राक्व्याख्यातः क्रोधो हिंसाहेतुर्विकारः पारुष्यं वाक्चित्तचेष्टानां रूक्षता अज्ञानं बोधस्याभावो दंभादिसर्वदोषहेतुभूतत्वात्सर्वेषामंते निर्दिष्टमित्येते रजस्तमः प्रभवा धर्मा आसुरं सर्गं सूचयंति एतयोः सर्गयोः फलं निर्दिष्टमाह । ४ ।

लासिकी [illegible]टीका १५ ॥

आसुरीसंपदमाह ॥ — दम्भो धर्मध्वजित्वम् दर्पः स्वगुणसंभावनया चित्तस्योत्सेकः अभिमानः आत्मन्यसंतपूज्यत्वाध्यारोपः क्रोधः प्रसिद्धः पारुष्यं निष्ठुरता अज्ञानं यथोक्तधर्मज्ञानमूलभूतं स्वस्वरूपापरिज्ञानं आसुरीमित्युपलक्षणं असुराणां राक्षसानां यासंपत्तामासुरीमभिलक्ष्य जातस्यैतानि दंभादीनि भवंतीत्यर्थः [illegible] ४ ।

पंचोलेटीका

अथासुरीसंपदमाह दंभ इति हे भारत दंभः धर्मध्वजित्वं धनविद्यास्वजनादिनिमित्तो दर्पः आत्मनः पूज्यातिशयभावनाभिमानः ।

क्रोधो॰ मर्षपरुषवचनं पारुष्यं अविवेकतो जातं मिथ्याज्ञानमज्ञा
नं एतानि आसुरीं संपदमभिजातस्य भवंति ४ ॥ ॥

रामवीरसमिद्बोधिनी

आसुरीं संपदमाह दंभ इति दंभो हास्यपूर्वं स्वधर्म प्रकाशनं तदेव
धर्मध्वजित्वं दर्पो धनस्वजनादिनिमित्तो गर्वविशेषः अभिमानः
स्वात्मन्यत्यंतपूज्यत्वाध्यारोपः पारुष्यं प्रत्यक्षरूक्षवचनशील
त्वं चकारेणानुक्तानां भावभूतचपलादिदोषाणां समुच्चयार्थः अज्ञा
नं स्वधर्मे निश्चयहीनता एते धर्मा आसुरीं संपदमभिलक्ष्यीकृ
त्य जातस्य पुरुषस्य भवंति अत्रापि पार्थेति संबोधनमासुरसं
पज्जनत्वाभावप्रतिपादनपरमिति ४॥

मधुभाष्य

८॥

भाषा अनुवाद ४

अब आसुरी सम्पत कहतेहैं कि दम्भ कहे लोगोके समाने आपनी धार्म्मिकता प्रकाश के हेतु मन भावते कल्पित धर्म्मो को ध्वजा देखलाना और दर्प कहे धन उपार्जन तथा विद्या आदिमे चित्त की उत्साह कहे ऊंचाई और अभिमान कहे अपने हस्तहके महत्व से दूसरे कोन कुछ समझना और क्रोध तथा पारुष्य कठोरता निठुरता और अज्ञान कहे अविवेक ये आसुरी कहे असुर राक्षसों की जो सम्पत इन मे रुचि जिनके होय है वे असुर राक्षस हैं ४ ।

दोहा

दंभ दर्प अभिमान है क्रोध परुषतापर अज्ञान पार्थ अ
कुलीनको संपत आसुरी सेद ४

22

दैवीसंपद्विमोक्षायनिबंधायासुरीमता माशु
चःसंपदंदैवीमभिजातोसिपांडव ५॥

शांकरभाष्यटीका १

अनयोःसम्पदोःकार्यमुच्यते दैवीति। दैवी सम्पत् यासा विमोक्षाय संसा
रबन्धनात् निबंधाय नियतोबंधोनिबंधस्तदर्थमासुरी सम्पन्मताभिप्रेता
तथा राक्षसी चैवमुक्ते सत्यर्जुनस्यांतर्गतं भावं किमहमासुरसंपद्युक्तःकिं
वा दैवीसंपद्युक्तइत्येवमालोचनारूपमालक्ष्याह भगवान् माशुचः शोकं
माकार्षीःसम्पदं दैवीमभिजातोसि हेपाण्डव अभिलक्ष्य जातोसि भाविक
ल्याणस्त्वमसीत्यर्थः ५॥

आनंदगिरिकृतटीका २

अनयोरिति कार्यं फलविभागः आसुरीत्युपलक्षणं राक्षसीचेति दृष्टव्यमि
त्याह तथेति फलविभागे सम्पदोरेवमुक्ते प्रतीत्यार्जुनस्याभिप्रायं भगवतोव
चनमित्याह तत्रेति।तत्राभिजातस्य हेतुं करोति पाण्डवेति ५॥

स्वामिकृतटीका ३

एतयोःसंपदोःकार्यंदर्शयन्नाह दैवीमिति दैवीयासंपत्तयायुक्तोमयोप
दिष्टेतत्वज्ञानेधिकारी आसुर्यासंपदायुक्तस्तुनित्यसंसारीत्यर्थः एतच्छ्रुत्वा किम
हमत्राधिकारीनवेतिसंदेहव्याकुलचित्तमर्जुनमाश्वासयति हेपांडव माशु
चःशोचं माकार्षीः यतस्त्वंदैवींसंपदमभिजातोसि ५॥

पिशाचभाष्यटीका ४॥

अनयोस्संपदोःफलमाह विमोक्षायसंसारविमोक्षाय निबंधोऽ
विद्याकामकर्मनिबंधः माशुचःशोकंमाकार्षीः॥५॥

रामानुजभाष्यटीका ५॥

दैवीसंपदिति निबंधाय आसुरीमता दैवीमदाज्ञानुवृत्तिरूपासंपद्विमोक्षा
यबंधान्मुक्तयेभवति क्रमेणतत्प्राप्तयेभवतीत्यर्थः आसुरीमदाज्ञानिवृ
त्तिरूपासंपन्निबंधायभवति अधोगतिप्राप्तयेभवतीत्यर्थः एतच्छ्रुत्वास्वस्व
भावनिर्धारणादतिभीतायार्जुनायैवमाह माशुचइति शोकंमाकृथास्त्व
न्तु दैवींसंपदमभिजातोसि पांडवधार्मिकाग्रेसरस्यहिपांडोस्त्वं तनयस्त्वमित्यभि
प्रायः ५

श्री॰
गी॰टी॰
षो

२३

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ५

परमार्थप्रपाटीका ७ ॥

अथ तयोः संपदोः कार्यं दर्शयति दैवीसंपदिति ~~दैवीयासंपत्सायुक्तादिति~~
दैवीया संपत्तया युक्तो मयोपदिष्टे तत्त्वज्ञाने ऽधिकारी स्यात् आसुरीसंप
दायुक्तो नित्यसंसारी पतत्कुत्वा किमहमत्राधिकारी न वेति संदिहानमर्जुन
माश्वासयन्नाह हे पांडव त्वं मा शुचः शोकं मा कार्षीः यतस्त्वं दैवीं संपदमभिजा
तोसि ५ ॥

वनमालीटीका ८ ॥

अनयोः संपदोः फलविभागमाह यस्य वर्णाश्रमादेर्विहिता सात्विकी या फला
भिसंधिरहिता क्रिया सा तस्य दैवी संपत् सत्वशुद्धिभक्तिज्ञानपर्यंततामेती संसा
रविमोक्षाय मुक्तये भवति अतो मुमुक्षुभिः सैवोपादेया या तु यस्य शास्त्रविहि
ता फलाभिसंधिपूर्वा साहंकारा च राजसी तामसी क्रिया तस्य सा सर्वाप्यासुरी
संपत् सा निबंधाय संसारबंधाय मता संमता अतः श्रेयोऽर्थिभिः साहेयैव
न चैवं मम सहंकया संपदा युक्त इति संदिहानमर्जुनमाश्वासयति मा शुचः अह
मासुर्या संपदा युक्त इति शंकया शोकमनुतापं मा कार्षीः दैवीं संपदमभि
लक्ष्य जातोसि प्रागर्जितकल्याणो भाविकल्याणश्च त्वमसीति भावः ५ ॥

ममवैजयंतीटीका ९

नन्वनयोः संपदोः किं फलं स्यादित्यपेक्षायामनयोः फलभेदमाह दैवीसम्प
दिति दैवीमदाज्ञानुवृत्तिरूपा संपदभयमित्यादिनोक्तगुणरूपा विमोक्षाय
संसारबंधनान्मुक्तये भवति परंपराक्रमेण मत्प्राप्तये भवतीत्यर्थः आसुरी
असुरसंबंधिनी मदाज्ञानुवृत्तिरहिता संपत् निबंधाय संसारबंधाय मता मम सं
मता भवति परंपराक्रमेणाधोगतिप्राप्तये भवतीत्यर्थः नन्वेवं चेत्तर्हि गुरु
गोत्रादिवधायोद्यतस्य क्रोधपारुष्यवतो मम मामप्यासुरी संपन्नरकं जनयेदि
त्येवं शोचंतमर्जुनमालक्ष्याह मा शुचैरिति हे पांडव यतस्त्वं दैवीं संपदम
भिलक्ष्य जातोसि क्षत्रियकुले उत्पन्नोसि अतस्त्वं मा शुचः स्वकर्तव्यतया
शास्त्रान्भीष्मद्रोणादीन्जिघांसुरहं पापीयानित्येवं शोकं मा कुरु क्षत्रिय
स्य ते धर्मयुद्धे बाणनिःक्षेपपारुष्यादिकं विहितत्वाद्दैव्येव संपत् त्वासुरी
ति भावः पांडवेति संबोधनेन यतो राजर्षेर्धार्मिकाग्रेसरस्य पाण्डोः क्षेत्रे
स्वरूपेन देवराजाज्जातोसि अतस्तव आसुरीसंपज्जन्यलेशोपि नास्तीति सू
चितम् ५ ॥
॥

अनयोः संपदोः फलविभागो विधीयते

मधुसूदनीटीका ५ ॥

यस्य वर्णस्य यस्याश्रमस्य च या विहिता सात्विकी फलाभिसंधिरहिता
क्रिया सा तस्य दैवी संपत् सा सत्वशुद्धिभगवद्भक्तिज्ञानयोगस्थितिपर्यं
न्ता सती संसारबंधनाद्विमोक्षाय कैवल्याय भवति अतः सैवोपादेया श्रे
योर्थिभिः या तु यस्य शास्त्रनिषिद्धा फलाभिसंधिपूर्वा साहंकारा राजसी
तामसी क्रिया तस्य सा सर्वाप्यासुरी संपत् अनेनात्रस्यापि तदंतर्भूतैव
सा निबंधाय नियता संसारबंधाय मता संमता शास्त्राणां तदनुसारिणां च
अतः साहेयैव श्रेयोर्थिभिरित्यर्थः तत्रैवं सति अहं कयासम्पदा युक्त इति
संदिहानमर्जुनमाश्वासयति भगवान् माशुचः अहमासुर्यासम्पदा युक्त
इति शंकया शोकमनुतापं माकार्षीः दैवीं संपदमभिलक्ष्य जातोसि प्रा
गर्जितकल्याणोभाविकल्याणश्च त्वमसि हे पांडव पांडुपुत्रेषु श्रेष्ठ अपि दै
वी संपद्युक्ता किं पुनस्त्वयीति भावः ननु भवतु राजसी प्रकृतिरासुर्या
मंतर्भूता शास्त्रनिषिद्धक्रियोन्मुखत्वेन सामान्यात्कामोपभोगप्राधान्य
साम्याद्धि साधारण्याभ्यां तु विशेषेण व्यपदेशोपपत्तेः अतः सापि हेयको
टावुपादेयकोटौ वा कथमन्यतत आह ॥ ५ ॥

सदानंदीटीका ५ ॥

अनयोः संपदोराह फलं सम्यग्विभागशः यस्याश्रमस्य वर्णस्य विहिता
या च सात्विकी १ फलाभिसंधिरहिता क्रिया तस्य स्याच्छुभा सत्वशुद्धीशभक्त्या
स्त्रज्ञानयोगावसानिका २ संसारबंधनान्मोक्षे हेतुर्भवति सा यतः अतः श्रेयोर्थि
भिर्दैवी सेवादेया सुसंपदा ३ यस्याशास्त्रनिषिद्धा या साहंकार फलेप्सुना रा
जसी संक्रिया सर्वाप्यासुरी तामसी युता ४ संसारबंधने हेतुः शास्त्राणां शा
स्त्रिणां मता अतः श्रेयोर्थिभिर्हेया राजसी तामसी क्रिया ५ कयाहं संपदायु
क्तः संदिहानमितीश्वरः आश्वासयति विजयं माकार्षीः शोकमर्जुन त्वं प्राग
र्जितकल्याणोभाविकल्याणसंश्रयः दैवी यतोभिलक्ष्यैव जातोसि शुभसंपदं ७५

नीलकंठीटीका ५ ॥

अनयोः संपदोः कार्यमाह दैवीति दैवी श्रेयोर्थिका अर्जुनस्य शंकाकिमहमा
सुर्यां संपदि जातोस्मीति तामपनुदति माशुच इति ५ ॥

मानवीत्तिप्रकृतिस्त्रिगुणात्मिकातामसि
सर्वाः प्रजाजायन्ते प्रजापतेरिति
त्वरीत्यवभूतिरिति प्रजासमानतिकर्मस्मृतेः ॥

आनंदीटीका १२ स्पष्टार्थम् ५

[illegible] ॥ ५ ॥ ॥

रामकंठीटीका १४

एषा यथानिर्दिष्टा दैवी संपद्दैवसर्गानिर्हेतुर्विमोक्षाय संसारदुर्गापक्रांतये न हि यथोक्तगुणानुमितदैवसर्गभाग्विमोक्षमनवाप्य ततो निवर्तत इत्यर्थः आसुरी तु तद्विपरीता बंधलक्षणविपरीतफलैव ततश्च दुस्तरात्संसारदुर्गात्कथमेवं वियोगं मुच्येयेत्यात्मत्वमा मार्व्यजनिते शोकं माकार्षीः। यतो यथोक्तलक्षणसंवादाद्दैवीं संपदमभिजातोसि [illegible] ॥ ५ ॥

लाक्षिकी [illegible]टीका १५

+ अनयोः संपदोः फलं निर्दिशति॥ + दैव्याः संपदा युक्तो नरो ज्ञानाधिकारी मुक्तिभाजनम्। आसुर्या संपदा युक्तस्त्वज्ञानाधिकारी नित्यसंसारीत्यर्थः एवं सत्यहं कया संपदा युक्त इति संदिहानमर्जुनमाश्वासयति मा शुच इति हे पांडव मा शुचः शोकं माकार्षीः। यतस्त्वं दैवीं संपदमभिलक्ष्य जातोसि प्रागर्जितकल्याणो भाविकल्याणश्चासि [illegible] ॥ ५ ॥

पंचोली टीका

एतयोः संपदोः कार्यमाह दैवी संपदिति हे पांडव यस्मात्तद्दैवी संपद्विमोक्षाय आसुरी संपन्निबंधाय संसाराय मता त्वं दैवीं संपदमभिलक्ष्यीकृत्य जातोसि अतस्त्वं मा शुचः शोकं माकार्षीः ५

रणवीरसमिद्धोधिनी॥

दैवीति दैवी संपद्यथावर्णाश्रमं विहिता फलाभिसंधिरहिता स्वधर्मानुष्ठानरूपा क्रिया सा संसारबंधनाद्विमोक्षाय कैवल्याय भवति आसुरी संपच्छास्त्रनिषिद्धा वर्णांतरोचिता फलाभिसंधिपूर्विका साहंकारा क्रिया सा निबंधाय संसारबंधाय सं

सा बंधायसंमता तएवं सति दैव्येव मंगलेक्षुभिः तथया ब्रा
ह्मणस्य वर्णाश्रमोचितं वेदाध्ययनमित्यादि दैवी संपत्
क्षत्रियस्य प्रजापालनात्मयात्मप्रवीणतादि वैश्यस्य कृषिवा
णिज्यादि शूद्रस्य त्रैवर्णिकशुश्रूषादि एतद्व्यतिरिक्तं स्वधर्म
परित्यागपरधर्मानुपालनादि आसुरीसंपदिति कयासंप
दाहं युक्तः इति संदिहानमर्जुनमाश्वासयति भगवान्माशुचः इति
माशुचः संपदाः योरहं युक्तः इति शंकया पश्चात्तापं मा कार्षीः दैवीं
संपदमभिलक्ष्यीकृत्य जातोसीति निश्चितः प्रथमपाण्डवः पा
ण्डवाभ्यासपूर्वकद्रौपदीजयादितनुष्ठितकर्मकरणात्स्वध
र्मं सम्यगनुष्ठितमिति दैवसंपद्युक्तोसि अयतः स्वधर्मपरित्या
गपरधर्मसेवनलक्षणासुरसंपत्संयोजनेन श्रेयोहानिं माका
र्षीरिति ५ ॥

मधुभाष्य

भाषा अनुवाद ५

अब इन दोनों सम्पदों के काज अकाज देखावते हुये कहते हैं कि दैवी सम्पद से युक्त मनुष्य ही मेरे कहे तत्वज्ञान के अधिकारी हैं और जो मनुष्य आसुरी सम्पद से युक्त हैं ते सदाही संसारी होते हैं अब ये वचन भगवान के श्रवण करके मै तत्वज्ञान का अधिकारी हों कि नहीं इस सन्देह से व्यग्रचित्त अर्जुन को समझावते हुये भगवान कहते हैं कि हे परन्तप तुम शोच न करो क्यों कि तुम दैवी सम्पद के अभिमुख जन्म हो और दैवी सम्पद संयुक्त हो यह तुमारे आचरणोंसे प्रसिद्ध है।५॥

दोहा॥

दैवीसंपत मुक्तिको आसुरी बंधनकोय पांडवनसंपत आसुरी
तूं कुलीन रहोय ५॥

द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच दैवो
विस्तरशःप्रोक्तआसुरंपार्थमेशृणु ६ ॥

शांकरभाष्यटीका १

द्वौभूतेति द्वौद्विःसंख्याकौभूतसर्गौभूतानांमनुष्याणांसर्गौ सृष्टिभूतस
र्गौ सृज्येते इति सर्गौ भूतान्येव सृज्यमानानि दैवासुरसम्पद्युक्तानि द्वौभूतस
र्गावित्युच्यते द्वया ह प्राजापत्या देवाश्चासुराश्चेति श्रुतेः लोकेस्मिन्सं
सारे इत्यर्थः सर्वेषां द्वैविध्योपपत्तेः कौ तौ भूतसर्गौ इत्युच्यते प्रकृता
वेव दैवआसुरएवच उक्तयोरेव पुनरनुवादप्रयोजनमाह दैवोभूतस
र्गोभयं सत्वसंशुद्धिरित्यादिना विस्तरशोविस्तरप्रकारैः प्रोक्तःकथि
तोन त्वासुरोविस्तरशः तत्परिवर्जनार्थमासुरं पार्थ मे मम वचना
दुच्यमानंविस्तरशः शृणु अवधारय ।६।

आनन्दगिरिकृतटीका २॥

निर्द्दयानांरक्षसां सम्पत्तीयास्ति सा कस्मात्प्रोक्तेत्याशंक्यासुरीमन्त
र्भाव्यादित्याह द्वाविति भूतानां द्वैविध्ये मानत्वेनोद्गीथब्राह्मणमुदाहर
ति द्वयाहेति सम्पद्द्वयप्रयुक्तेभ्योतिरिक्तानामपि प्राणिभेदानांसंभवा
त् कुतोभूतानां द्वित्वनियतिरित्याशंक्याह सर्वेषामिति ।६।

स्वामिकृतटीका ३॥

सासर्वात्मनावर्जयितव्येत्येतदर्थमासुरींसंपदंप्रपंचयितुमाह द्वौद्विप्र
कारोभूतानांसर्गोममद्वचनाच्छृणु अक्षरगात्मकस्यैरेकीकरणेनद्वावि
त्युक्तं अतोराक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताइत्यादिनानवमाध्या
योक्तप्रकृतित्रैविध्येनाविरोधः सहृदमन्तव्यः ६ ॥

पैशाचभाष्यटीका ४ ॥

सर्गः सृष्टिःदेवानामयंदैवआसुराणामयंमासुरोदैवसर्गः
विस्तरशःविस्तरेण ॥ ६ ॥

रामानुजभाष्यटीका ५ ॥

द्वौभूतेति अस्मिंल्लोकेकर्मकराणांभूतानांसर्गौद्वौद्विविधौदैवश्चासुरसर्ग

श्री॰
गी॰ टी॰
षो॰

उत्पत्तिः प्राचीनपुण्यपापरूपकर्मवशाद्भगवदाज्ञानुवृत्तिनद्विपरीतकरणयोग्यतिकालएवविभागेनभूतानामुत्पत्तेरित्यर्थः तत्र दैवसर्गो विस्तरशः प्रोक्तः असुराणां सर्गस्य यथाचारकरणार्थः देवानामदाज्ञानुवृत्तिशीलानामुत्पत्तिः यदाचारकरणार्थास्यआचारः कर्मयोगज्ञानयोगभक्तियोगरूपो विस्तरशः प्रोक्तः असुराणां सर्गस्य यदाचारकरणार्थः समाचारं मे शृणु मत्सकाशाच्छृणु ६ ॥

अभिनवगुप्तकृतटीका ६ ॥

[illegible]

एषा दैवी संपदुक्ता अभयमित्यादिना आसुरीमाह

६ = स्पष्टार्थः ६

परमार्थप्रपाटीका ७ ॥

अथेयमासुरी संपत्सर्वथैव त्याज्येत्येतदर्थमासुरीसंपदं प्रपंचयितुमाह द्वाविति द्वौ हि प्रकारो भूतानां सर्गो मद्वचनाच्छृणु आसुरराक्षसप्रकृत्योरेकत्वात् द्वावित्युक्तं अतो राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता इति नवमाध्यायोक्तप्रकृतित्रैविध्येनाविरोधः स्पष्टमन्यत् ६ ॥

वनमालीटीका ८ ॥

देवासुरमनुष्यगंधर्वादीनां स्वभावानां वाङ्कल्पितस्य भाग्यभक्तलादिकौ देवासुराख्यौ मनुष्यगंधर्वादीनां यथायोगं दैवे आसुरे वांतर्भावमभिप्रेत्याह द्वाविति भूतानां प्राणिनां सर्गौ स्वभावौ अतिशयेनेष्टानिष्टकारिणौ स्वभावौ द्वावेव अस्मिंल्लोके सर्वस्मिंन्संसारमार्गे कौ तौ दैव आसुरश्च यो यदा मनुष्यः शास्त्रसंस्कारप्राबल्येन स्वभावसिद्धौ रागद्वेषावभिभूय धर्मपरा

सदैवो यदा तु स्वभावसिद्धरागद्वेषःप्राबल्येन शास्त्रप्राबल्यमभिभूय धर्मपरायणो भवति॥

यणो भवति तदासुर इति द्वैविध्योपपत्तेः द्वया ह प्राजापत्या देवाश्चासु
राश्च ततः कनीयसा एव देवा ज्यायसोऽसुरा इति श्रुतेः तत्र दैवः सर्गः स्व
भावत्वं प्रति मया विस्तरशः विस्तरेण प्रोक्तः स्थितप्रज्ञलक्षणे द्वितीये
भक्तलक्षणे द्वादशे ज्ञानलक्षणे त्रयोदशे गुणातीतलक्षणे चतुर्दशे इहा
प्यभयमित्यादिनेदानीमासुरं भूतसर्गं मे मद्वचनैर्विस्तरशः प्रतिपाद्य
मानं शृणु ६ ॥

हनुमवैजयंतीटीका ९

सर्वभूतांतरात्मा सर्वज्ञः पार्थसारथिर्भगवानासुरीं संपदं विस्तरेण
श्रवणे हुं पार्थ ज्ञात्वा पुनस्तामेव प्रपंचयति द्वौ भूतसर्गाविति अ
स्मिन्कर्माधिकारिणि लोके जन्ममरणभूमौ मनुष्यलोके दैवश्चासुरश्चे
ति भेदेन भूतसर्गौ भूतानां कर्मकराणां सर्गौ मनुष्यसृष्टी द्वावेव भवतो
मनुष्यधर्माधर्माभ्यामन्यः कोऽपि तृतीयो नास्ति द्वया ह प्रजापत्या देवाश्चासु
राश्चेत्यादिश्रुतेः यदायं मनुष्यः शास्त्रावलोकनात्स्वाभाविकौ रागद्वे
षौ विनिर्जित्य शास्त्रीयकर्मानुष्ठाता भवति तदैवः न स दैवः यदा च शा
स्त्रविधिमुत्सृज्य स्वाभाविकरागद्वेषाधीनोऽशास्त्रीयधर्मकर्माण्याचरति
तदा त्वासुरो भवतीत्यभिप्रायः हे पार्थ तत्र दैवो देवानां सदात्मानुग्रहशी
लानामयं दैवः सर्गः कर्मज्ञानभक्तियोगानामनुष्ठानादिकारस्थितिरित्यर्थः
विस्तरशो विस्तरेण प्रोक्तः अभयं सत्त्वसंशुद्धिरित्यादिना मया प्रकर्षेण क
थितः इदानीमासुरं असुराणामयमासुरस्तं सर्गं मे मत्तः सकाशात्त्वम्
एवं मद्भिरकरणीयत्वं वक्ष्यामीति शृणु इत्यर्थः पार्थेति मे नत्व
तान्निषिध्य शुद्धत्वात्स्वश्रवणेऽधिकारी त्वमस्येति सूचितम् ६

मधुसूदनीटीका १० ॥

अस्मिन्लोके सर्वस्मिन्नपि संसारमार्गे द्वौ द्विप्रकारावेव भूतसर्गौ म
नुष्यसर्गौ भवतः कौ तौ दैवश्चासुरश्च न तु राक्षसो मानुषो वा तृतीयः कः
सर्गोऽस्तीत्यर्थः यो यदा मनुष्यः शास्त्रसंस्कारप्राबल्येन स्वभावसिद्धौ
रागद्वेषावभिभूय धर्मपरायणो भवति स तदा दैवः यदा तु स्वभावसिद्ध
रागद्वेषप्राबल्येन शास्त्रसंस्कारमभिभूयाधर्मपरायणो भवति स तदा
आसुर इति द्वैविध्योपपत्तेः न हि धर्माधर्माभ्यामन्यस्तृतीयः कोऽपि राशिरस्ति तथा
च श्रुतिः द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्या

यस्मादसुराइति दमदानदयाविधिपरेवाक्येत्रयः प्राजापत्याइत्यादौ
मदानदयारहितामनुष्यासुराः सर्वएवसंतः केनचित्तात्पर्येणदेवामनु
ष्यासुराइत्युपचर्यंतेइतिनाधिकावकाशः एकेनैवदइत्यक्षरेण
प्रजापतिनादमरहितान्मनुष्यान्प्रतिदमोपदेशः कृतः दयारहिता
न्प्रतिदयोपदेशः कृतः ननुविजातीयादेवासुरमनुष्याइहविवक्षिताः
मनुष्याधिकारत्वाच्छास्त्रस्यतथाचोत्तरउपसंहरति तदेतदेवैषादैवी
वागनुवदतिस्तनयित्नुर्ददइतिदाम्यतदत्तदयध्वमिति तदेतत्त्रयं
शिक्षेद्दमंदानंदयामिति तस्मात्तासीमानुषीचप्रकृतिरासुर्यामेवात
भवतीतियुक्तमुक्तं द्वौभूतसर्गाविति नत्वदैवोभूतसर्गोमयात्वांप्र
तिविस्तरशः बहुभिःप्रकारैःप्रोक्तः स्थितप्रज्ञलक्षणेद्वितीयेभग
वद्भक्तलक्षणेद्वादशे ज्ञानलक्षणेत्रयोदशेगुणातीतलक्षणे
चतुर्दशेइहचाभयमित्यादिना इदानीमासुरंभूतसर्गमेमद्वचनैर्वि
स्तरशः प्रतिपाद्यमानंत्वंशृणु ज्ञानार्थमवधारयसम्यक्त्याज्ञातस्य
हिपरिवर्जनंशक्यतेकर्तुमिति हेपार्थेतिसंबोधनसूचनेनानुपेक्षणी
यतांदर्शयति [illegible]
[illegible] ॥६॥

सदानंदीटीका ११ ॥

ननुस्तुराक्षसीसंपदासर्वैवतगीतासमा मानुषीतत्रतीयासाहेयादेयाथ
वेतिचेत्र १ संसारमार्गेसर्वस्मिन्द्विप्रकारैर्निसर्गकौ देवश्चासुरएवास्तिन
तरात्तसमानुषी २ योमनुष्योयदाशास्त्रसंस्कारप्रबलत्वमः रागद्वेषाति
रस्कृत्यभवेद्धर्मपरायणः ३ सतदादेवइत्युक्तोयदातद्वेषरागयोः प्राब
ल्याच्छास्त्रसंस्कारमभिभूयनिषिद्धकृत ४ सतदासुरइत्येवंद्वैविध्यमा
पपन्नितः नत्वत्रधर्माधर्मभांत्तरतीयाकोटिरस्तिवा ५ नत्वदैवोमयाहि
तोपमुक्तोवक्रविस्तरात् द्वितीयेद्वादशेचैवस्थितधीभक्तलक्षणे त्रयो
दशेज्ञानहेतोर्गुणातीतेचतुर्दशे इहाप्यभयमित्याद्यैर्लक्षणैरीरितोभृशं
इदानीमासुरंभूतसर्गंमद्वचनैःशृणु विस्तरेणोच्यमानंतंज्ञानार्थमवधा
रय सम्यग्ज्ञातस्यशक्योस्तिकर्तुंहिपरिवर्जनं ६ ॥६॥

नीलकंठीटीका १२ ॥

द्वौहिसंख्यौभूतसर्गौभूतानांस्वभावौमेमद्वचनाच्छृणु ॥६॥

१एव

५तुई

दानरहितान्प्रतिदानोपदेशः कृतः

एतयोः कार्यं विभजते ॥

आनंदीटीका १२

भूतानां कर्मभूमौ जातानां पुरुषाणां सर्गौ प्रादुर्भावौ ६ ॥

+ अथ द्विविधत्वमेव सर्गस्य कर्माधिकृतं जनं प्रति नियमित्याह ॥

रामकंठीटीका ५

+ यथा प्रतिपादित विभागेन द्वौ द्वावेव न तृतीयो भूतानां कर्मभूमिजन्मनां पुरुषाणां सर्गौ प्रादुर्भावौ कौ तौ दैव आसुर एव च दैवः प्राहेतोक्तः एकस्तत्र सत्त्वगुणप्रधानत्वाद्देवसंबंधिसर्गसदृशत्वउपचारात् तथा रजोगुणप्रधानत्वादासुरसर्गसदृशस्तथैवोपचारात् द्वितीयः तयोर्मध्याद्दैवः परापरगुणप्रतिपादनमात्रेणोद्दिष्टो विस्तरेण गुणप्रतिपादनात् क्रमेण वितत्य प्रतिपादितः आसुरस्तु सामान्यतः प्रतिपादितः तत्रेदानीं कथ्यमानमवधारय [illegible] ६ ॥

+ अथास्मिन्सर्गे द्विविधः सर्गो ज्ञाने धिकारी चेत्याह ॥

नास्ति

[illegible]टीका ५

+ अस्मिंल्लोके मनुष्यभूतानां प्राणिनां सर्गौ द्वौ द्वावेव न तृतीयः कौ ताविन्याह दैव आसुर एव चेति दैवो देवसंबंधि सत्त्वप्रधानस्वभावयुक्तः आसुरः असुरसंबंधि रजस्तमःप्रधानस्वभावयुक्तश्च असुरस्वभावे एव रात्रसी प्रकृतिं गर्भीकृत्योक्तम् तयोर्मध्याद्दैवः सर्गो विस्तरेण प्राक्तनेध्याय गणोप्रोक्तः आसुरं सर्गमधुना मत्तः शृणु [illegible] ६ ॥

पंचोलेटीका

सर्वात्मना वर्जनीयेति बुद्ध्या आसुरीसंपदं प्रपंचयितुमाह द्वाविति हे पार्थ अस्मिंल्लोके द्वौ भूतसर्गौ दैवः च पुनः आसुरः मया दैवभूतसर्गो विस्तरशः प्रोक्तः आसुरभूतसर्गो मे मत्तः काशान्ब्रूहि ६ ॥

द्वाविति अस्मिँल्लोके द्वौ द्विप्रकारावेव भूतसर्गौ भवतः तत्रैको
दैवो द्वितीयस्त्वासुरो यो हि रागद्वेषावभिभूय स्वधर्मपरो भवति
स दैवो दैवस्वभावः उक्तश्च वीरैः कथ्यते यस्तु रागद्वेषबलात्
स्वोचितधर्मं परित्यज्य परधर्मपरायणो भवति आसुरो सुर
स्वभावः प्राकृतत्रुकथयति द्वैविध्योपपन्नेस्तत्र दैवो भूतसर्गो
विस्तरेण प्रोक्त इदानीमासुरं सर्गमेमत्तः प्रतिपाद्यमानं शृण्व
वधारयेत्यर्थः ६॥

मधुभाष

६॥

भाषा अनुवाद ६

आसुरी सम्पद अच्छी प्रकार से वर्जन करना ही कर्त्तव्य है इससे आसुरी सम्पदको विस्तार करि कहते हैं कि जो दो प्रकार की भूतों की सृष्टि है सो मेरे मुख से श्रवण करो इस जगह असुर राक्षस सम्बन्धी दोनो प्रकृतिकी एकता करके देव प्रकृतिके साथ उई मनकहा है इससे नवयें अध्याय के बारहे श्लोक मे आसुरीं राक्षसीं चैव इत्यादि त्रिविध प्रकृति के साथ विरोध नहीं है हे अर्जुन इस लोक मे देव औरअसुर सम्पद से युक्त जो जो दो प्रकार भूतों की सृष्टि तिस के मध्य दैवी सम्पद युक्त सृष्टि मै ने पूर्व विस्तार रूप से कहा है अब आसुरी सम्पद से युक्त जो सृष्टि सो हम से सुनो ॥ ६ ॥

दोहा

भूतसर्ग यहलोकमे देव असुर है दोय देवकहा विस्तारसें
पार्थ असुरसुणसोय ६॥

30

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः न शौ
चं नापि चाचारो न सत्यं तेषु विद्यते ८ ॥

शांकरभाष्यटीका १ ॥

अध्यायपरिसमाप्तेरासुरी सम्पत् प्राणिविशेषणत्वेन प्रदर्श्यते प्रत्यक्षी
करणेन च शक्यते अस्याः परिवर्जनं कर्त्तुमिति प्रवृत्तिमिति प्रवृत्तिञ्च
प्रवर्त्तनं यस्मिन् पुरुषार्थसाधने कर्त्तव्ये प्रवृत्तिस्तां निवृत्तिञ्च तद्विपरी
तां यस्मादनर्थहेतोर्निवर्त्तितव्यं सा निवृत्तिस्तां च जना आसुरा न विदुः न
जानन्ति न केवलं प्रवृत्तिनिवृत्ती एव न विदुर्न शौचं नापि चाचारो न स
त्यं तेषु विद्यते अशौचा अनाचारा मायाविनो ऽनृतवादिनो ह्यासुराः ८ ॥

आनंदगिरिटीका २ ॥

तत्त्वध्यायशेषेणासुरीसम्पद्दर्शनमयुक्तं तस्यास्त्याज्यत्वेन पङ्कप्रक्षालन
न्यायावतारादित्याशंक्याह प्रत्यक्षीकरणेनेति वर्जनीयामासुरीं सम्पदं वि
वृणोति प्रवृत्तिं चेति तां विहितां प्रवृत्तिं न जानन्तीत्यर्थः तां च निषिद्धा
क्रियां न जानन्तीति संबंधः न शौचमित्यादेस्तात्पर्यमाह अनाचारेति शौच
सत्ययोराचारान्तर्भावेपि ब्राह्मणपरिव्राजकन्यायेन पृथगुपादानं ॥ ८ ॥

स्वामिकृतटीका ३ ॥

आसुरीं विस्तरेणाभिरूपयति प्रवृत्तिं चेत्यादि द्वादशभिः धर्मे प्रवृत्तिं चाधर्मे
निवृत्तिं चासुरस्वभावा जना न जानंति अतः शौचमाचारः सत्यं च तेषु नास्ति ८

शिष्याचभाष्यटीका ४

प्रवृत्तिं कर्त्तव्यानुष्ठानं न विदुर्न जानंतीति ते आसुरं संपदं प्राप्ता आसुराः
आचारः शिष्टाचरणं सत्यमवितथवचनम् ॥ ८ ॥

रामानुजभाष्यटीका ५ ॥

प्रवृत्तिमिति प्रवृत्तिं निवृत्तिं चाभ्युदयसाधनं मोक्षसाधनं च वैदिकधर्ममासुरा
न विदुः न जानंति न शौचं वैदिककर्मयोग्यत्वं शास्त्रसिद्धं तत् बाह्यमाभ्यंतरं
चासुरेषु न विद्यते नापि चाचारः तद्बाह्याभ्यंतरशौचं येनाचारेण संध्यावंद
नादिना जायते सोपि न विद्यते यथोक्तं संध्याहीनोऽशुचिर्नित्यमिति तथा सत्यं

चतेषुनैवविद्यतेसत्यंयथार्थज्ञानंभूतहितरूपभाषणंतेषुनविद्यतेकिंच ७ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थः ७ ॥ पूर्वादैवीसम्पदुक्ताभयमित्यादिना आसुरीमाह प्रवृत्तिंचनिवृत्तिंचेत्यादि ॥ ततोयातिपरांगतिं इत्यंतमुग्रन्थमेकं ७

परमार्थप्रपाटीका ७

अथासुरींविस्तरशोनिरूपयति प्रवृत्तिमित्यादितोद्वादशभिः आसुरस्वभावाजनाः धर्मेप्रवृत्तिमधर्मेनिवृत्तिमिति नजानन्ति अतःशौचमाचारःसत्यंचतेषुनास्ति [illegible] ॥ ० ॥

वनमालीटीका ८ ॥

विहितेप्रवृत्तिंयद्वाप्रवृत्तिंप्रवृत्तिविषयंधर्मंचकारात्तत्प्रतिपादकंविधिवाक्यंएवंनिवृत्तिंनिवृत्तिविषयमधर्मंचकारात्तत्प्रतिपादकंनिषेधवाक्यं चासुरस्वभावाजनानजानन्ति पुनःशौचंद्विविधं नाप्याचारंमन्वादिभिरुक्तं सत्यंविदुः साधुगुणत्वात् सत्यंत्वयापावयतीतिवासत्सदर्थंयमयतीतिवा अग्न्यादितत्त्वंहस्त्यादिकरणत्वात्सत्यंज्ञानमनन्तंइतिश्रुतेःकौविदुःसत्यंचनह्यनयातेषुनविद्यते हरेर्माहात्म्यश्रुत्यादिप्रतिपादितंश्रुत्यापिनाद्रियन्ते किंतुमिथ्याभूततर्कहतत्वादित्यपलेपत्वेवासुराइतिभावः ७

कसुमवेभयनीटीका ९ ॥

यदुक्तंप्रतिज्ञामकरोतन्मासुरंसर्गमाह प्रवृत्तिमित्याद्यहंकारमित्यन्तैर्द्वादशभिः प्रवृत्तिंचेति आसुराअनेकपापपुंजैःकृतमन्नाभगवत्संजेरुतमन्त्राभगवद्विमुखत्वेनसरसम्यद्विरहिताःजनामनुष्याःप्रवृत्तिंशास्त्रोक्तधर्मेऐहिकामुष्मिकाभ्युदयसाधनभूतांचपुनःनिवृत्तिंवेदोक्तधर्मरूपमोक्षसाधनंनविदुः नजानन्ति यद्वा धर्मेप्रवृत्तिमधर्मान्निवृत्तिंनजानन्तिचकारात्प्रवृत्तिनिवृत्तिप्रतिपादकेविधिनिषेधवाक्येनविदुःशास्त्रज्ञानस्याभावात् अतएवतेषामसुराणांशौचंवैदिककर्मयोग्यत्वंतत्प्रवृत्तिनिवृत्त्युपयोगिबाह्याभ्यंतरशुद्धिरूपंनविद्यते अपिनिश्चयेननैवाचारोमन्वादिशास्त्रोक्तोवर्णाश्रमाचितोनविद्यतेतेषुसत्यंचप्राणिहितकरंयथार्थदृष्टार्थविषयंवाक्यंनविद्यतेतथागोमायुवत्तेषामुपदेशादिकंभवतीत्याशयः ७ ॥

+ वर्जनीयामासुरींसंपदंप्राणिविशेषणतया तानहमित्यतःप्राक्तनैर्वत्समाणैर्द्वादशभिःश्लोकैर्विवृणोति ॥

मधुसूदनीटीका ९ ॥

+ प्रवृत्तिंप्रवृत्तिविषयं धर्मंचकारात्तत्प्रतिपादकंविधिवाक्यंच एवंनि
वृत्तिंनिवृत्तिविषयमधर्मंचकारात्तत्प्रतिपादकंनिषेधवाक्यंचासुरस्वभा
वाजनानजानंति अतस्तेषुनशौचंद्विविधमपि नापिचाचारोमन्वादिभि
रुक्तःनसत्यंचप्रियहितयथार्थभाषणंविद्यते सत्यशौचयोराचारांतर्भा
वेपिब्राह्मणपरिव्राजकन्यायेनपृथगुपादानं अशौचाःअनाचाराः
असत्यवादिनोप्यसुरामायाविनःप्रसिद्धाः [ननुधर्माधर्मयोः]
प्रवृत्तिनिवृत्तिविषययोःप्रतिपादकंवेदांतिरेकेणभगवदाज्ञारूपंसर्वलो
कप्रसिद्धं तदुपजीवीनिचस्मृतिपुराणेतिहासादीनिसंतितत्कथंप्रवृत्ति
निवृत्तितत्प्रमाणयत्तानंताएव आज्ञोल्लंघिनाशासितारिभगवतिस
तिकथंतदननुष्ठानेनशौचाचारादिरहितत्वउष्ठानाशासितुर्भगवतोपि
लोकवेदप्रसिद्धत्वादनन्याह ॥ ७ ॥

त्वंप्रमाणमस्ति

सदानंदीटीका १९ ॥

आसुरीसंपदाहेयाद्वादशभिरिहोच्यते तानहमित्यतःपूर्वतनैःश्लोकैर्वर्णनादि
ति १ प्रवृत्तिविषयंधर्मंचेननहेधिकांश्रुतिं एवंनिवृत्तिविषयंचेनउद्देधिकां
श्रुतिं २ नेवासुरस्वभावास्तेजानंतिभ्रमशालिनः अतस्तेषुनशौचंवानाप्याचा
रःस्मृतेर्मतः ३ यथार्थभाषणंसत्यंप्रियंपथ्यंनविद्यते अशौचाश्चाप्यनाचा
रासत्यैवानृतवादिनः मायाविनःप्रसिद्धाश्चसुरासुरदूषणाकराः ४।७॥

नीलकंठीटीका १२ ॥

प्रवृत्तिंविधिवाक्यंनिवृत्तिंनिषेधवाक्यंनविदुः धर्माधर्मयोरिष्टानिष्ट
हेतुत्वज्ञानरहिताइत्यर्थः ॥ ७ ॥

आनंदीटीका १३

विहितेकर्मणिप्रवृत्तिंनिषिद्धान्निवृत्तिम् ७ ॥ ॥

+ तत्रापरस्यतावदासुरसर्गस्यस्वरूपमाह॥

रामकंठीटीका १४ ॥

+ आसुरंउद्रिक्ततमसोजनाः प्रवृत्तिंसंसारप्रवर्तनहेतुभूतंशास्त्रचो
दितंकर्मनिवृत्तिंसंसारनिवर्तनहेतुभूतंज्ञानादिसंस्कृतंकर्मन
नविदुर्नजानंते स्वर्गापवर्गलक्षणफलनिरपेक्षतयादृष्टमात्र
प्रयोजनंकर्मारभंतइत्यर्थः अतएवप्रवृत्तिनिवृत्तिसाधनानि

श्री॰
गी॰ टी॰
यो॰

32

तेषां न संभवंतीत्याह न शौचमिति शौचं शास्त्रनियमितेतिकर्तव्यतासंपाद्यं मृद्विलेपकायचित्तयोः मृद्वत्वं तेषां नास्ति नापि चाचारः शास्त्रनियमितत्वं मनःकर्मभिर्विशिष्टमाचरणं न च सत्यमनृतलक्षणं यथा दृष्टानुभूतार्थकथनं सर्वत्र यथेष्टचेष्टायैवेत्यर्थः कुत एवं यतः ते हीदं जगज्जीवलोकं शास्त्रीयमर्यादया वर्तमानमसत्यमवस्तुभूतमाहुः अतस्त्वनतस्मिन्नर्थे शास्त्रेण शौचादिमर्यादायास्त्याज्यत्वात्तासां मुग्धप्रतारणा इति ते कथयंतीत्याहुः॥ ७ ॥

लासिकी [illegible]टीका १५

अथासुरसर्गं निरूपयति

धर्मे प्रवृत्तिमधर्मान्निवृत्तिं चासुरस्वभावा न जानन्ति अतः शौचमाचारः सत्यं च तेषु नास्ति ननु वेदोक्तयोर्धर्माधर्मयोः प्रवृत्तिनिवृत्तिं च ते कथं न विदुः कुतो वा धर्माधर्मयोरनंगीकारे जगतः सुखदुःखादिव्यवस्था स्यात् कथं वा शौचाचारादिविषयामीश्वराज्ञामनिवर्तेरन् ईश्वरानंगीकारे च कुतो जगदुत्पत्तिः स्या[illegible] ।८॥

पंचोलीटीका

आसुरीं विस्तरेणो निरूपयति प्रवृत्तिमिति आसुराः जनाः प्रवृत्तिं च पुनः निवृत्तिं साधनं च कर्तव्यं प्रवृत्तिः अनर्थहेतुः कर्तव्या निवृत्तिः उभे न विदुः तेषु न शौचं न वापि आचारः न सत्यं विद्यते असौचनाचारः अनृतवादिनः ७

रणवीरसमिद्धोधिनी॥

प्रवृत्तिरिति प्रवृत्तिं प्रवृत्तिविषयं धर्मं चकारात्तत्प्रतिपादकं विधिवाक्यं निवृत्तिं विषयधर्मं तत्प्रतिपादकं निषेधवाक्यं च जनाः उक्तप्रकारा आसुरस्वभावा न विदुर्न जानन्तीत्यर्थः यतस्तेषु शौचं स्नानादि न विद्यते नाप्याचारो मन्वादिभिरुक्तो न च सत्यं यथार्थभाषणं विद्यते अतस्त एवाशौचा आचारभ्रष्टा अनृतवादिनश्चेत्यर्थः ७॥

मधुभाष

७॥

भाषा अनुवाद ८

आसुरी सम्पद इस श्लोक से ले बारह श्लोक तक दया करि निरू
पण करते हैं कि असुर स्वभाववाले मनुष्य सकल धर्म्म मे प्र
वृत्ति औरअधर्मसे निवृत्ति कैसी होती है सो जानते ही नहीं इ
सी से इन लोगोंमे शौच आचार औ सत्यता का लेश मात्र भी न
हीं रहता है यह जानो। ८ ॥

दोहा

प्रवृत्तिनिवृत्तिनहिजानहि असुरजीवहै सोय शौचनहिआ
चार हैनहि सत जिनमे होय ८॥

33

असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं अपर
स्परसंभूतंकिमन्यत्कामहैतुकं ८ ॥

शांकरभाष्यटीका १

किंच असत्येति। असत्यं यथा वयमनृतप्रायास्तथेदं जगत्सर्वं अस
त्यमप्रतिष्ठंच नास्य धर्माधर्मौ प्रतिष्ठातोऽप्रतिष्ठं चेति ते आसुरा जना ज
गदाहुरनीश्वरं नच धर्माधर्मसव्यपेक्षकोऽस्य शासितेश्वरो विद्यत इति
अतोऽनीश्वरं जगदाहुः किंच अपरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपु
रुषयोरन्योन्यसंयोगात् जगत्सर्वं संभूतं किमन्यत् कामहैतुकं काम
हैतुकमेव कामहैतुकमन्यज्जगतः कारणं नहि किंचित् अदृष्टं धर्माधर्मा
दिकारणान्तरं विद्यते जगतः कामएव प्राणिनां कारणमिति लोकाय
तिकदृष्टिरियं ॥ ८ ॥

आनंदगिरिकृतटीका २ ॥

असुराणांजनानांविशेषणान्तराण्यपि सन्तीत्याह किंचेति विद्यत इत्या
हुरिति पूर्वेण संबन्धः शास्त्रैकगम्यमदृष्टं निमित्तीकृत्याधिष्ठात्रात्मकेन
ब्रह्मणा रहितं जगदिष्यते चेत् कथं तदुत्पत्तिरित्याशंक्याह किंचेति।
किमन्यदित्यादेरादेपस्य तात्पर्यमाह नकिंचिदिति ॥ ८ ॥

स्वामिकृतटीका ३ ॥

ननुवेदोक्तयोर्धर्माधर्मयोः प्रवृत्तिंच निवृत्तिंच कथं न विदुः कृतौ वा धर्माध
र्मयोरनंगीकारे जगतः सुखदुःखादिव्यवस्था स्यात् कथं वा शौचाचारादिवि
धयामीश्वराज्ञामतिवर्तेरन् ईश्वरानंगीकरणे च कुतो जगदुत्पत्तिः स्यादत
आह असत्यमिति नास्ति सत्यं वेदपुराणादि प्रमाणं यस्मिन् तादृशं जगदाहुः
वेदादीनां प्रामाण्यं न मन्यन्त इत्यर्थः तदुक्तं त्रयो वेदस्य कर्तारो भण्डधूर्त
निशाचरा इत्यादि अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यवस्थाहेतुर्यस्य
तत् स्वाभाविकं जगद्वैचित्र्यमाहुरित्यर्थः अत एव नास्तीश्वरः कर्ता व्यव
स्थापकश्च यस्य तादृशं तं जगदाहुः नहि कुतोऽस्य जगत उत्पत्तिं वदंतीत्य
तआह अपरस्परसंभूतं अपरश्चापरश्चेत्यपरस्परं अपरस्परतः स्त्रीपुरुष
मिथुनात्संभूतं जगत् किमन्यत्कारणमस्य नास्त्येव किंचित् किंतु कामहैतुकं

स्त्रीपुरुषयोः कामएव प्रवाहरूपेण हेतुरस्येत्याहुरित्यर्थः ॥ ८ ॥

पिशाचभाष्यटीका ४ ॥

असत्यं धर्माधर्मौ न यतो ऽस्य प्रतिष्ठा तदप्रतिष्ठितं स्वामी यस्य न
विद्यते तदनीश्वरं स्त्रीपुंसयोर्मैथुनसंयोगस्तेन संभूतं परस्परसं
भूतं कामहेतुरेव कामहेतुकम् ॥ ८ ॥

रामानुजभाष्यटीका ५ ॥

द्विव असत्यमिति असत्यं जगदेतत्सत्यशब्दनिर्दिष्टब्रह्मकार्यतया ब्रह्मात्मक
मिति नाहुः अप्रतिष्ठं तथा ब्रह्मणि न प्रतिष्ठितमिति वदंति ब्रह्मणानंते
न धृता हि पृथिवी सर्वांल्लोकान्बिभर्त्ति तथोक्तं तेनेयं नागवर्येण शिर
सा विधृता मही बिभर्त्ति मालां लोकानां सदेवासुरमानुषां अनीश्वरं
सत्यसंकल्पेन परब्रह्मणा सर्वेश्वरेण मयैव नियमितं वदंति अहं स
र्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते इत्युक्तं वदंति चैवं अपरस्परसंभूतं किम
न्यत् योषित्पुरुषयोः परस्परसंबंधेन जातमिदं मनुष्यपश्वाद्युपलभ्य
ते अनेवंभूतं किमन्यदुपलभ्यते अतः सर्वमिदं जगत्कामसहेतुक
मिति किंचिद्विपिनोपलभ्यत इत्यर्थः ॥ ८ ॥

अभिनवगुप्तटीका ६

स्पष्टार्थः ८

परमार्थप्रपाटीका ७ ॥

+ ननु वेदोक्तयोर्धर्माधर्मयोः प्रवृत्तिनि
वृत्तीकथं न विद्वः कथं वा
धर्माधर्मयोरनंगीकारे जग
तः सुखदुःखादिव्यवस्थासा
नु कथं वा शोचाचारविषया
मीश्वराज्ञामतिवर्तेरन् +
ईश्वरानंगीकारे वकुतोज
गदुत्पत्तिः स्यादित्याशंका
ह ॥

असत्यमिति तेआसुराः जगदसत्यमप्रतिष्ठं अनीश्वरं चाहुः न विद्यते
सत्यं ब्रह्म वेदादिशास्त्रं ब्रह्मवा यस्मिन् क्वचापि प्रमाणे न असत्यमित्यर्थः
अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यवस्थितिर्यस्मिन् स्वाभाविकं
जगदैवचित्र्यमाहुः अत एव नास्तीश्वरः कर्त्ता व्यवस्थापकश्च यस्य तादृ
शं जगदाहुः तर्हि कुतोस्य जगत उत्पत्तिं वदंतीत्याह अपरस्परसंभूतं अ
परः शब्दः सकारांतः अपरश्चापरश्चापरस्परं स्त्रीपुरुषमिथुनं तस्मात्सं
भवतीति किंभूतं कामहेतुकं कामः कंदर्पो हेतुर्यस्य तत् संप्रजायते अ
तो मिथुनादन्यत्किमस्य कारणं न किंचिदित्यर्थः ॥ ८ ॥

ननुविश्वोदयादिकर्तारंसर्वेश्वरंकथमपलपंतीति चेदेकदेशस्यवि
घमानत्वादित्यतआह असत्यमिति सत्यंज्ञानमनंतंब्रह्मादिश्रुति
प्रतिपादितेनविरुद्धः ननुविषयेनकत्वादिनायस्मात्तदसत्यंजगत् प्र
प्रति॰ तितिष्ठत्यस्मिन्निति प्रतिष्ठाविरुद्धः सन्निवियतेयस्मात्तदप्रतिष्ठंनास्तीश्वरो
नियामकोयस्यतदनीश्वरंजगदाहुः सत्वेनासत्वेनसदसत्वेनसदस
द्विलक्षणत्वेनवा सहत्वाज्जगदसत्यस्यैकरूपमिवानपवादप्रतिष्ठं आश्रय
शून्यंनहित्रैकालिकनिषेधप्रतियोगिनः शशविषाणादेः खपुष्पादे
१४ र्वाकश्चिदाश्रयोस्ति अतएवानीश्वरं नहिशशविषाणखपुष्पादेरीदृ
णस्यैक कर्तापालयिता संहर्तावास्ति विश्वमिथ्यात्वनिरीश्वरत्वा
दिमतमेवमुख्यमासत्वमितिभावः ननुयदिविश्वंमिथ्येति तत्कुतोनु
त्पद्यते तर्हिकथमुत्पद्यते तस्माद्वाएतस्मादात्मनआकाशः संभूतः
आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवीतिश्रुत्यापिविश्वस्यसका
रणकत्वमुक्तं तथाच यतोजगदुत्पन्नंसएवेश्वरः तत्राह अपरस्पर
संभूतंनभवति एकस्मादेकस्योत्पत्तिरितिक्रमेणनोत्पन्नंयेनकर्तृप
र्वेनतत्रहिमरुमरीचिकोदकोत्पत्तौकश्चिदिकारकंक्रमस्त्रापेक्षते न
नुः पितुः सकाशात्पुत्रोत्पत्तिदर्शनात्तत्रेपिताकारणमेवंविश्वस्यापी
श्वरोहेतुः किंच संभवेचेत् किंतर्हिशशशृंगतुल्यपरस्परसंभूतेन
चेत्किंतत्तीनादि तत्राह अन्यत् सदसदादिनोन्यत् सत्वेसत्वादिनाव
३४ क्तुंशक्यंशशशृंगस्यासत्वात्तत्तोविलक्षणमित्यर्थः तर्केहेतुत्वासर
मार्थ्यसत्वंनभवति किंतुव्यावहारिकमन्यथाभूतंपरमार्थतस्त्वसमेव
द्वेसत्येसमुपाश्रित्यबुद्धानांधर्मदेशना लोकसंवृतिसत्यंसत्यंच
परमार्थतः संवृतेर्व्यवहारार्थंस्यात्त्रिहतोपारमार्थिकमिति कामह
क्तोहेतुर्यस्यतत्कामहेतुकं यदिच्छयायत्पुरुषावलोकनेनवैव
तस्योत्पत्तिः दृष्टिसमकालीनादृष्टिरेववास्तदृष्टिर्विज्ञानासमकालीन
नायाविज्ञानभिन्नायाः सृष्टेरभावात् पितृपुत्रादिक्रमस्तुस्वाप्निक
क्रमवदुपपद्यतेस्वाप्निकश्रुतिवदक्रमकमवोधकश्रुतिरप्युपपद्य
ते अतएवेताः दृष्टिभिन्नादृष्टिसमकालीनादृष्टिरस्तुयथापिविश्वमि

ष्येवरूपत्वादितस्तर्कैर्हतत्वाच्चेश्वरकर्तृत्वादिबोधकश्रुतिस्तत्स्वामि
कश्रुतिवद्रूपपद्मेनेनदर्थिष्ठानेनैनस्वप्रकाशंसर्वप्रमाणागम्यंचैतन्यं
परमार्थसदित्याहुः नचैवमस्याप्रामाणिकस्य तुच्छादितुल्यत्वेन
प्राचीनापेक्षयोक्तिमात्रस्यैवभेदः श्रुतिभिर्यमानवेद्यत्वेनैवमुपासीक्रि
यते यतोवाचोनिवर्तन्तइत्यादिश्रुतिर्विरुद्धएवनाशंकात्मागमस्यैवचली
कृते नचशून्यत्वलंब्यतत् शून्यत्वाभावस्यलक्ष्यत्वासंभवात्स्वप्रकाशत्व
हानेः विश्वमिथ्यात्वमंगीकुर्वतोनिरीश्वरवादित्वेनस्फुटमेव माया
वादमसच्छास्त्रंप्रच्छन्नंबौद्धमुच्यतेमयैवकथितंदेविकलौब्राह्मण
रूपिणेतिपाद्मरुद्रेणैवतन्मतस्यबौद्धान्तर्गतत्वोक्तेः ॥ ८ ॥

असत्यमप्रतिष्ठंतेटीका ९ ॥

नन्वद्यदितेषांप्रवृत्तिनिवृत्योर्ज्ञानंनस्यात्तर्हितेसिद्धान्तंकथंकुर्वन्ती
त्यपेक्षायांतेषांसिद्धान्तानाह तत्राद्यैनदर्शनेमायावादिनामा
ह असत्यमिति असत्यंसत्यज्ञानमनन्तमित्यादिनासत्यशब्दवाच्यस्य
भगवतोममकार्यंमहदात्मकंसत्यंजगत्सत्यरूपमप्रकृतिहृदयात्मक
मिदंसत्यंनभवतिकिंतुरज्जुसर्पशुक्तिरजतादिवद्भ्रान्तिरूपंभवती
त्येवंते आसुराजना आहुर्वदन्ति अतएवप्रतिष्ठंप्रतिष्ठानास्तिप्रति
ष्ठास्थितिर्यस्यतत्शुक्तिरूप्यादिवदधिष्ठानाज्ञानकल्पितत्वात्ज्ञाने
नास्याधिष्ठानभूतब्रह्मणिस्थितिर्नस्यात् यद्वा परमार्थदशायांन
ष्टत्वभूतमायाजीवेश्वराणामज्ञानाध्यासकार्यत्वेनमिथ्यात्वादस्य
कारणाभावात्स्वप्नवादिवस्थित्यभावः अतएव अनीश्वरंनास्ती
श्वरोजन्मादिहेतुर्यस्यतत् परमार्थदशायामीश्वरस्यापिभ्रान्तिर
चितत्वात् एकमेवाद्वितीयनिर्विशेषसर्वप्रमाणाशून्यचैतन्यम
स्तीतिवाक्यलक्ष्यभूतचिदस्तुसत्यंतदितरजीवेश्वरादिभेदरूपकं
सर्ववस्तुज्ञानकल्पितत्वेनासत्यमित्येवंतेमन्यन्तइतिभावः अथ
स्वभाववादिनांबुद्धानांसिद्धान्तानाह अपरस्परसंभूतंपरस्परंपर स्परस्परंचपर
स्परंपरस्परतोनान्योन्यतः संभूतमुत्पन्नंजगद्भवति नतुस्त्रीपुरु
षयोः परस्परसंभोगजन्ययत्नोत्पत्तेर्घटादेःकुलालस्येवबालेस्या
दनेपित्रादेर्ज्ञानंनास्तिसम्यक्सहकृतसंभोगसंज्ञानानुव्यक्तेः मशक

मत्कुनादिस्वेदजानामकस्मादुत्पत्तिदर्शनाच्च तस्मात्स्वभावादेवेदं जग
दुत्पन्नमेवं नेममन्यन्त इत्यर्थः अथ लोकायतिकानां सिद्धांतमाह का
महैतुकं स्त्रीपुरुषयोः काम एव प्रवाहात्मना हेतुर्यस्य तत् स्वार्थि
कम् यद्वाऽत्र नानासिद्धांतमाह कामहैतुकं कामस्वेच्छैव हेतुर्य
स्य तत् युक्तिबलेन यो यत्कल्पयितुं शक्नुयात्स एव तस्य हेतुरिति वद
न्तीत्यर्थः किमन्यत् अन्यत् किं वा अकामादस्ति किमपि नास्तीत्य
र्थः ॥ ८ ॥

[illegible] मधुसूदनीटीका ९०

सत्यमबाधितं नास्य विषयं तत्त्वावेदकं वेदाख्यप्रमाणं तदुपजीवि
पुराणादि च नास्ति यस्य तत् असत्यं वेदस्वरूपस्य प्रत्यक्षसिद्धत्वे
पि तस्याप्रामाण्याभ्युपगमादि शिष्टाभावः अत एव नास्ति धर्माधर्म
रूपा प्रतिष्ठा व्यवस्थाहेतुर्यस्य तदप्रतिष्ठं तथा नास्ति शुभाशुभ
योः कर्मणोः फलदाता ईश्वरो नियंता यस्य तदनीश्वरं ते आसुरा ज
गदाहुः बलवत्पापप्रतिबंधाद्वेदस्य प्रामाण्यं ते न मन्यन्ते ततश्च त
द्बोधितयोर्धर्माधर्मयोरीश्वरस्य चानंगीकारात्मयथेष्टाचरणेन ते पुरुषा
र्थभ्रष्टा इत्यर्थः शास्त्रैकसमधिगम्यधर्माधर्मसहायेन प्रकृत्यधिष्ठा
त्रा परमेश्वरेण रहितं जगदुत्पद्यते चेत् कारणाभावात्कथं तदुत्पत्तिरित्या
शंक्याह अपरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपुंसयोरन्योन्यसंयोगा
त्संभूतं जगत् कामहैतुकं कामहेतुकमेव कामहैतुकं कोमाति
रिक्तकारणशून्यं ननु धर्माद्यप्यस्ति कारणं नेत्याह किमन्यत् अन्यद
दृष्टं कारणं किमस्ति नास्त्येवेत्यर्थः अदृष्टांगीकारे पि क्वचिद्दृत्वा स्वभा
वे पर्यवसानात् स्वाभाविकमेव जगद्वैचित्र्यमस्तु दृष्टे संभवत्यदृष्टक
ल्पनानवकाशात् अतः काम एव प्राणिनां कारणं नान्यददृष्टेश्वरा
दि इत्याहुरिति लोकायतिकदृष्टिरियं [illegible]
[illegible] ॥ ८ ॥

सदानंदीटीका ॥

नन्वस्ति मानं वेदाख्यं धर्माधर्मावबोधकं निर्दोषं परमेशानात्तद्रूपं लोके प्र
सिद्धिमत् ॥ तन्मूलकानि संतीति हासस्मृतिमुखान्यपि कथं प्रहमाघृताने

तेषां तानेव्यतिक्रमः २ तदाज्ञायाः कथं दृष्टशास्त्रितदृहीतिचेद्दृष्ट एव अवा
प्तिस्तार्थविषयं सम्यनज्ञो वबोधकं ३ वेदस्मृतीतिहासार्षपुराणादिप्र
माणकं नास्ति यस्मिन् न सत्यं तद्दृष्टसम्प्रतिनेश्वरेः ४ प्रामाण्यपस्वीकृ
ते नैव अधर्माधर्मस्वरूपिणी तद्व्यतीशाव्यवस्थायाहेतवर्यसवनतथा ५
नास्त्येवं फलदोषीशालितं नायस्यन्तथा तथाप्यस्वराजगन्नाहुः पापाधि
कादिहेतुना ६ वेदस्याधिप्रमात्वेतु नन्वं नेनतेष्वरं धर्माधर्मयोः प्राव
रणात्मयोतिनरकेशठाः ७ कथमीश्वरस्ते नैनस्तु विश्वात्पत्तिरिहेष्यते
स्त्रीपुंसयोर्योगाद्न्योन्यकामपृक्तयोः सम्भूतं हि जगत्कामहेतुकं
नत्वचान्यतः अदृष्टकारणं वान्यद्वाप्स्येवं दृष्टसंभवे ९ नादृष्टकल्पना
युक्तातनः स्वाभाविकं जगत् इति चार्वाकदृष्टिर्वैदेशाद्यपलायिनी १०
सर्वानर्थकरीहेयास्मान्प्राश्रेयोर्थिभिस्तुतनः ॥।॥ ८ ॥

नीलकंठीटीका १२ ॥

असत्यं सत्यवर्जितं जगन्माणिजातं तथाप्रतिष्ठं धर्माधर्मात्याप्रतिष्ठा
आश्रयस्तद्रहितं अनीश्वरं अनियंत्रकं आहुः अपरस्परसंभूतं अपर
स्पराः क्रियासातत्येइतिसहू बीजांकुरवत्परस्परकारणीभूतानाध
र्माधर्मतद्वासनानां यत्सातत्यं तस्मात्संभूतं किमन्यलोकेस्तिन किंचि
दपिधर्माद्यपेक्षयांऽन्यदेन किंतु सर्वकामहेतुकं स्त्रीपुंसयोर्मिथुनी
भावः कामस्तद्रूपमेव स्वभावादेव जंतुर्जायते न त्वदृष्टादित्यर्थः ८ ॥

आनंदीटीका १३

असत्यं प्रथमं नासीदिति सत्त्वाहीनं अप्रतिष्ठं यतऽन्यमंतत्रवेलीय
ते इत्यनुक्रमयाप्रतिष्ठयाहीनं अतएवानीश्वरं मूलकारणशून्यं अप
रस्परसंभूतं अकृतेर्महास्ततोहंकार इति बीजांकुरन्यायप्राप्तकार्य
कारणभावरहितम् अकिंचित्कं न विद्यते किंचित् नरका
दियस्य परलोकहीनम् अहेतुकं धर्मेणागमनमूर्धमित्यादि
युक्तिरहितम् ८ ॥

रामकंठीटीका १४

~~तत्रलीनशास्त्रयोदिमः योवादयोन~~

अतएवाः प्रतिष्ठंतएतदाहुः नास्यनियमोसत्यरूपस्यशौचादिः
प्रतिष्ठास्थितिः कर्तृशास्ता अनीश्वरंचैतदाहुः नास्यकश्चिदीश्व
रोनियंतासंभवति यत्प्रणीतशास्त्रचोदिताः शौचादयोनुष्ठेया
भवेयुः अपरस्परसंभूतं भावानामन्योन्यकार्यकारणभावोन्यका
र्यकारणभावोयः प्रत्यक्षदृष्टः शास्त्रेणवाव्यवस्थापितस्तेनेना
स्तिकाः स्वभावमात्रवादिनोनेछंति सर्वः कश्चिद्भावः स्वयमेव
यतेस्वयंचविनश्यति नकारणांतरमपेक्षतइत्यपरस्परसंभूतमि
दंसर्वमाहुः तथाकिमन्यत्कंकिंचित्कर्मविद्यमानंकिंचित्सत्यरूपं
चिदंशमात्रमपियस्यतत्ताहशमाहुः अतएवाहेतुकंस्वकर्मादि
कारणरहितं[illegible]
[illegible] ॥८॥

लाक्षिकी [illegible]टीका १५

अतआह नास्तिसत्यंवेदपुराणादिप्रमाणंयस्मिंस्तादृशंजगदाहुः वेदादी
नांप्रामाण्यंनमन्यन्तेइत्यर्थः तदुक्तम् त्रयोवेदस्यकर्त्तारोमुनि
भाण्डनिशाचराइत्यादि अतएवनास्तिधर्माधर्मरूपाप्रतिष्ठाव्य
वस्थाहेतुर्यस्यतत् स्वाभाविकंजगद्वैचित्र्यमाहुः तर्हिकुतोस्य
जगतउत्पत्तिंवदंतीत्यत्राह अपरस्परसंभूतंअपरश्चापरश्चेत्य
परस्परमपरस्परतः कामप्रयुक्तात्स्त्रीपुरुषमिथुनात्संभूतं
किमन्यत्कारणमस्यनास्त्यन्यदृष्टेश्वरादिकारणम् किंतुका
महेतुकंस्त्रीपुरुषयोः कामएवप्रवाहरूपेणहेतुरस्येत्यर्थः ८
[illegible] । ८ ॥

इत्यर्थः अतएवनास्तीश्वरकर्ताव्यवस्थापकश्च
यस्यतादृशंजगदाहुः

पंचोलेटीका

शौचाद्यनुष्ठानेकारणमाह असत्यमितितेआसुराः जनाः
इदंईश्वरवर्जितंअपरस्परसंभूतमपरश्चापरश्चेत्यपरस्परमन्यो
न्यमित्यर्थः तत्रसंभूतंस्त्रीपुरुषयोरन्योन्यसंजातेकामहेतुकंका
मएवहेतुः अन्यकारणांतरंनाकिमपिइत्याहुरित्यर्थः ८ ॥

१एवीरमामिहोयिनी॥

असत्यमिति सत्यंसत्यस्वरूपबोधकं वेदशास्त्रंप्रमाणं तदुप
जीविपुराणादि च तद्यस्य नास्ति तदसत्यं अत एव वेदप्रामा॰
ण्यानभ्युपगमादप्रतिष्ठं नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यव
स्था यस्य तदप्रतिष्ठं नास्ति फलदातेश्वरो नियन्ता यस्य तदनी
श्वरं जगदाहुरासुराजनाः अपरस्परमिति अपरस्परसंभूतं
कामप्रसक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत्सर्वं संभूतं
कामहैतुकं कामातिरिक्तकारणमन्यदृष्टकारणं कि
मस्ति नास्त्येवेत्यर्थः इति ८॥

मधुभाष्य

८

भाषा अनुवाद ९

वेदविहित जो धर्म अधर्म तिस मे प्रवृत्ति को असुर स्वभाव मनुष्य को नही जानते और धर्म अधर्म को अङ्गीकार न करने से संसारिक सुख औ दुख आदि होना किस प्रकार निरूपण किया जाय और शौच तथा आचार आदि मे ईश्वर की आज्ञा को वा कैसे लङ्घन करते हैं और ईश्वर को न मानि कै जगत की उत्पत्ति किससे कहते है सोई कहते हैं जो वेद पुराण इतिहास को प्रमाण नहीं मानते और कहते हैं कि मुनि औ भांड तथा राक्षस येई तेनो ने वेद को वनाया है और जिन की धर्म अधर्म की प्रतिष्ठा अर्थात् व्यवस्था नहीं है तेई अप्रतिष्ट कहे नास्तिक लोग अपनी पूर्वोक्त वाक्यको पुष्ट करने के कारण + इस जगत का ईश्वर नहीं है इस से यह संसार अनीश्वर है ऐसे नास्तीक लोग अपनी वात का पक्ष करके जगत को अनीश्वर कहते हैं जो पूछो कि तो फेरि वे लोग इस जगत की उत्पत्ति किस से मानते हैं इस पर उनकी कहावत कहते हैं कि अपरस्पर कहे पर अपर से भिन्न जो स्त्री पुरुष इनदोनो के संयोग से संसार की उत्पत्ति होतीहै इसका और कोई कारण नहीं है यह जगत काम हेतुक अर्थात् स्त्री पुरुष इन दोनो का जो काम सोई धारा प्रवाह क्रम से इस संसार का कारण स्वरूप चला आवता है नास्तीक लोग ऐसे ही कहते हैं

। ८ ।

दोहा

नसतहे न प्रतिष्टहे कहें जगअनीस्वरसोय कामहेतुहे पर सपर कारण औरनसोय ८

इसजगतको अप्रतिष्ठु कहतेहैं अर्थात् यहजगत की विचित्रता स्वभावसिद्ध मात्र कहतेहैं और जिनके मनमे ४ + ८

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः प्रभ
वन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ९ ॥

शांकरभाष्यटीका १

एतामिति एतां दृष्टिमवष्टभ्याश्रित्य नष्टात्मानो नष्टस्वभावा विभ्र
ष्टपरलोकसाधनाः अल्पबुद्धयो विषयविषया अल्पैव बुद्धिर्येषा
न्ते अल्पबुद्धयः प्रभवन्त्युद्भवन्ति उग्रकर्माणः क्रूरकर्माणो हिंसात्म
काः क्षयाय जगतः प्रभवन्तीति संबंधः जगतोऽहिताः शत्रव इत्यर्थः
९

आनंदगिरिटीका २

यथोक्ता दृष्टिर्व्यवस्थिता दृष्टिवादिष्वेवेत्याशंक्याह एतामिति प्रागुपदिष्टा
मेतां लोकायतिकदृष्टिमवलंब्येति यावत् नष्टस्वभावत्वमेव स्पष्टय
ति विभ्रष्टेति विषयबुद्धेरल्पत्वं दृष्टमात्रोद्देशेन प्रवृत्तत्वं जगतः
प्राणिजातस्येति यावत् ॥ ९ ॥

स्वामिकृतटीका ३

किंच एतामिति एतां लोकायतिकानां दृष्टिं दर्शनमाश्रित्य नष्टात्मानो
मलिनचित्ताः सन्तोऽल्पबुद्धयः दृष्टार्थमात्रमतयः अत एवोग्रं हिंस्रं क
र्म येषां तेऽहिता वैरिणो भूत्वा जगतः क्षयाय प्रभवन्ति उद्भवन्तीत्यर्थः ९

पैशाचभाष्यटीका ४

आश्रित्य नष्टात्मानः वधबंधादिकर्मनिरता एतां दृष्टिं लोकायतदर्शनमवष्टभ्य आश्रित्य
नष्टात्मानः अल्पबुद्धयः [illegible] विषयेषु भोक्तृमिति मात्रबुद्धयः प्रभवन्ति जायन्ते उग्रकर्माणः
वधबंधादिकर्मनिरताः क्षयाय जगतः प्रभवन्तीति संबंधः अहिताः अपकराः ९

रामानुजटीका ५

एतामिति एतां दृष्टिमवष्टभ्यावलंब्य नष्टात्मानः अदृष्टदेहातिरिक्तात्मा
नः अल्पबुद्धयः घटवज्ज्ञेयभूते देहे ज्ञातृत्वेन देहव्यतिरिक्तात्मो
पलम्भनशक्तिविवेकाकुशलाः उग्रकर्माणः सर्वेषां हिंसकाः जगतः
क्षयाय प्रभवन्ति ९ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ९ ॥ ॥

परमार्थप्रपाटीका ७

एतां लोकायतिकानां दृष्टिं दर्शनमवष्टभ्याश्रित्य नष्टा नाशवन्त आत्मा
येषां मते अत एवाल्पमतयो दृष्टान्तमात्रमतयः उग्रं संसारभयावहं क

श्री॰
गीटी॰
टी॰

39

मित्येषां तेन यथा जगतः क्षयाय धःपातायत्र भवंति अतएवाहिताः यद्वा
महत्तिं वर्त्तिर्हृतिं वेदादिना येस्वमार्गवहिर्भूतास्तएवासुरशब्देनोक्ताः
नतलोकायतिकाः यतोहं भोक्ता दर्पाभिमानस्त्र्यादिनाप्यासुरलक्षण
स्योक्तत्वात् एवं तेष्वात्मवत्संवे जगदपि मन्यतइत्याह असत्यमिति
असत्यं सत्यवादरहितं धर्मवंचकत्वात् धुपेतं अप्रतिष्ठमहत्त्वरहितं निर्ल
ज्जत्वलोकापवादभयवर्जितं अनीश्वरमितीश्वरनिग्रहभयवर्जितं नन्वा
पिकर्त्तसापेक्षं किंत्वपरस्परसंभूतमिति दृष्ट्वैवत कामहेतुकमि
तिपित्रादिभक्तिरहितं पतोहृष्टि दृष्टमात्रप्रतीतिं अवष्टभ्यागी कृत्य
नष्टात्मानो विधिनिषेधवर्जिता अतएवाल्पबुद्धयः उग्रकर्माणो जीव
हिंसाद्यासुरतयोनिष्ठाः नष्कं स्वष्टा रेमवसंपदामपिवष्टुं दुष्टारमि
तर्गतं स्वात्मानं परिहाय मूढा विषयोत्पादहात्मवादोमतः पिंङ. योषय
निप्रतिलक्षणपरद्रोहान्नरैरेव नष्टाद्वानैरपराद्धमस्तिकिमहोवोद्वादि
कानामिहेति ॥ ९ ॥

वनमालीटीका ८

एतां जगन्मिथ्यात्वनिरीश्वरत्वादिज्ञानमवष्टभ्याश्रित्य भ्रष्टवत्तीर्यंता
दृशंशास्त्रकृतानष्टात्मानः परलोकसाधनभ्रष्टाः दृष्टिस्तष्टादिम
तेपरलोकसेदानीं दृष्टेरभावात्परलोको नास्त्येव किमर्थं धर्माद्यनुष्ठा
नदेहभिन्नः स्थिरआत्मैवनास्तीतिवा किमर्थं धर्मानुष्ठानं जगतोहिताः
शत्रवः सतः क्षयाय भवंति इदानीमागतोपदेशानभवानेरुद्याद्यादिस
पादिरूपेण जगतोनाशाय भवंतीत्यर्थः नत्वकिमर्थं लोकानाशयंति
त्याह उग्रकर्माणि इति तेषां स्वभाव एवमादृशः स्वयं नष्टाः परनाशयं
तीतिलोकप्रसिद्धेः अतोनिरीश्वरमतिरसंतापोगति हेतुरितिसा
सर्वथाहेयेतिभावः ॥ ९ ॥

ज्ञसमवैजयन्तीटीका ९

एवंप्रक्रिदृष्टांतमागत्येन स्वस्वमतं निश्चित्य नमसैव जगद्विनाशयंती
त्याह एतामिति नास्येकवचनेयतानिप्रक्रिदृष्टांतादीत्यवष्टभ्यालंव्य
ल्पबुद्धयो देहेंद्रियाद्यतिरिक्तस्तज्ज्ञानं तेनावस्थितो जीवात्माभवतीतिवि
वेकज्ञानरहितास्तक्षयतयः अतएवनष्टात्मज्ञानाः दृष्टेदृष्टादिवि
विक्तात्मनत्वाः अतएवोग्रकर्माणो हिंसापैशून्यपारुष्यापनिदाहण

कर्मकर्तारः अत एवाहिताः जगतश्चेतनाचेतनात्मकस्य सर्वस्य श
त्रवः संतो जगतः क्षयाय परमार्थरूपामतो विमुखं कारयित्वा जग
त्क्षयाय प्रभवंति उद्भवंतीत्यर्थः ९ ॥ + इयं दृष्टिः शास्त्रीयदृष्टिः वदिष्टैवेत्याशंक्याह ॥

मधुसूदनीटीका १०

+ एतां प्रागुक्तां लोकायतिकदृष्टिमवष्टभ्यालंब्य नष्टात्मानः भ्रष्टप
रलोकसाधनः अल्पबुद्धयः दृष्टमात्रोद्देशप्रवृत्तमतयः उग्रकर्मा
णो हिंस्राः अहिताः शत्रवो जगतः प्राणिजातस्य क्षयाय व्याघ्रसर्पा
दिरूपेण प्रभवंत्युत्पद्यंते तस्मादियं दृष्टिस्त्यक्तव्या योगान्निहेतुत
यासर्वात्मना श्रेयोर्थिभिरेव हेयैवेत्यर्थः [illegible]
[illegible] ॥ ९ ॥

सदानंदीटीका ११

एवं तां दृष्टिं समालंब्य भ्रष्टामुष्मिकसाधनाः तुच्छेल्पविषये येषां म
तिर्दृष्टावलंबिनी १ हिंस्रास्ते शत्रवः प्राणिजातस्य क्षयहेतवः व्याघ्रस
सर्प^ पादिरूपेण प्रयंते प्रभवः २ हेयेयं दृष्टिरत्यंतदुःखहेतुः सुखैषिभिः ९

नीलकंठीटीका १२ ॥

एतामनुपदोक्तां लोकायतिकानामभिमतां दृष्टिमवष्टभ्य नास्ति
क्यनष्टात्मानः कामादिवशेन नष्टधैर्याः यतो ल्पेद्वै दृष्टसुखैकपव
वृद्धिर्येषां ते अल्पबुद्धयः अहिताः हिंस्राः ॥ ९ ॥

[illegible] १३ आनंदीटीका

सुगमम् ९ ॥ ॥

रामकंठीटीका १४ ॥ + तेषामेवंविधानां लोकायतिकादीनां तामसानां व्यापारमाह ॥

+ ते ह्येतामेवंविधामीश्वरकर्मपरलोकाद्यभाववादमयीं दृष्टिं नास्ति
कदर्शनमवष्टभ्य नष्टात्मानो नष्ट आत्मैवमेवादर्शनं प्राप्तः परमा
र्थसत्यस्वरूपः पदार्थो येषां ते तथा त एवाल्पबुद्धयो ल्पमात्रवि
षयदर्शित्वात्परिमिता बुद्धिर्धीर्येषां ते तथाविधाः संत उग्रैकक
र्मणो दारुणव्यापारा आत्मनो जगतो जीवलोकस्य क्षयाय वि
नाशाय प्रवर्तंते तदर्थमेव कर्माणि कुर्वंते किमुक्तं भवति त एवंवि
धा नास्तिकाया निकर्माणि कुर्वंते तेषां नरकतिर्यक्स्थावरादिभाव

श्री॰
गी॰ टी॰
बी॰

परिणामः फलं न तेषु नः कर्मभूमौ ऋषयो निमासादयं नीत
र्थः अतोऽशुभाः पापात्मकाः [illegible]
[illegible]
[illegible] ।९॥

लाभिकी [illegible]टीका ५

किंच — नष्टात्मानो नष्टः निरस्तविहितः सन्नेवात्माप्रदर्शी शास्त्रो येषां ते
अल्पबुद्धयः दृष्टार्थमात्रनिष्ठबुद्धयः उग्रपापधर्माः एतां लौ
कायतिकानां दृष्टिं दर्शनमवष्टभ्य निश्चयेन गाढमवलंब्य
तथा उग्रं दारुणं परपीडावहं कर्म येषां ते अहिताः सर्वेषां वैरि
णो भूत्वा जगतो जीवलोकस्य क्षयाय विनाशाय प्रभवंति उद्भव
लभंते इत्यर्थः [illegible] ३
[illegible] ९॥

पंचोलेटीका

एतामिति नष्टात्मानः विनष्टस्वभावाः नष्टपरलोकस्वभावाः ।
नष्टपरलोकस्वभावसाधनाः अल्पबुद्धयः विषयनिमित्ता मतिर्ये
षां ते एतां दृष्टिं सर्वोक्तां दृष्टिमवष्टभ्याश्रित्य उग्रकर्माणः जग
तः अहिताः शत्रवः क्षयाय प्रभवंति ९

गाववीरसमिद्बोधिनी ॥

एतामिति एतां पूर्वोक्तां दृष्टिमवष्टभ्यालंब्य नष्टात्मानो
नष्ट आत्मा बुद्धिर्येषामिति कृत्वात एवाल्पबुद्धय उग्रकर्माण
उग्रं क्रूरं हिंसात्मकं कर्म येषां ते इति कृत्वात एव जगतो हि
ताः शत्रवः वयोबकाः जगतः क्षयाय प्रभवंतीति ९॥

मधुभाष्य

भाषा अनुवाद ९

देखो निरीश्वरवादीयों की दृष्टि कहे तजवीज और कल्पना से कल्पित बातें औ उन के दर्शनकहे मतग्रन्थों का आश्रय ण करके मलिनचित्त अल्पबुद्धि अर्थात् जो देखैं सुने उस पर तर्क वे विचार विश्वासकरी मनुष्य जिन को हिंसाही करना मात्र काम है वे शत्रुस्वरूप हो के संसार के नाश के हेतु प्रगट होते हैं ॥ ९ ॥

दोहा

याहि दृष्टि को धारके अल्पबुद्धि न पंचित क्रूर कर्म सो प्रगटे जग क्षय कारण निमित्त ९॥

काममाश्रित्य दुःपूरं दंभमानमदान्विताः
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः

।१०। शांकरभाष्यटीका १ ॥

तेच काममिति कामं इच्छाविशेषमाश्रित्यावष्टभ्य दुःपूरमशक्यपू
रणं दंभमानमदान्विताः दंभश्च मानश्च मदश्च दंभमानमदास्तैरन्विताः
मोहादविवेकतः गृहीत्वोपादाय असद्ग्राहानशुभनिश्चयान् प्रवर्त
न्ते लोकेऽशुचिव्रताः अशुचीनि व्रतानि येषान्ते अशुचिव्रताः १० ॥

आनंदगिरिटीका २ ॥

तानेव दुराचारानसुरान् प्रकारान्तरेण विशिनष्टि तेचेति । १० ॥

स्वामिकृतटीका ३ ॥

अपिच काममिति दुःपूरं पूरयितुमशक्यं काममाश्रित्य दंभादिभिर्यु
क्ताः संतः क्षुद्रदेवताराधनादौ प्रवर्तन्ते कथमसद्ग्राहान् गृहीत्वानेन
मंत्रेणैतां देवतामाराध्य महानिधीन्साधयिष्याम इत्यादिदुराग्रहान्मो
मोहमात्रेण स्वीकृत्य प्रवर्तन्ते अशुचीनि मद्यमांसादिविषयाणि
व्रतानि येषान्ते ॥ १० ॥

पिशाचभाष्यकृतटीका ४ ॥

दुःपूरमशक्यपूरणं दंभश्च मानश्च मदश्च तैरन्विताः दंभो धर्मध्वजः
धार्मिकत्वख्यापनं मानः आत्मनि संभावनं मदो दर्पः मोहादविवेकाद्गृही
त्वा उपादाय असद्ग्राहानशुभविश्वासान् वर्तन्ते लोके अशुचीनि व्रता
नि येषान्ते अशुचिव्रताः स्त्रीपण्यादिव्रतानुसारिणः ॥ १० ॥ ॥

रामानुजभाष्यटीका ५

काममिति दुःपूरं दुःप्रापविषयं काममाश्रित्य तत्साधयिषया मोहा
दत्तानात् असद्ग्राहान् अन्यायगृहीतान् परिग्रहान्गृहीत्वा अशुचिव्र
ता. ताः अशास्त्रविहितव्रतयुक्ताः दंभमानमदान्विताः प्रवर्तन्ते १० ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थ १० ॥

परमार्थप्रपाटीका ७

अथास्मानप्याह काममिति दुःखेन पूरयितुमशक्यं काममभिलाष
माश्रित्यांगीकृत्य दंभमानमदादिभिरूपायैरन्विताः संतः क्षुद्रदेवता
राधनादौ प्रवर्तंते किं कृत्वा असद्ग्राहान् गृहीत्वा सत्यं ब्रह्म गृह्णातीति ते सद्
ग्राहाः तद्भिन्नं स्वर्गादिसुखं गृह्णंतीति ते असद्ग्राहाः अयं मंत्रस्तान् गृहीत्वा
अमुकमंत्रेणैतां देवतामाराधयामीति संकल्प्य तथा ते अशुचिव्रताः
मद्यमांसाद्युपहारव्रतनैयमो येषां ते १० ॥

वनमालीटीका ८

कामं तत्तद्दृष्टविषयाभिलाषं दुःष्पूरं पूरयितुमशक्यं दंभेनाधार्मिक
त्वेऽपि धार्मिकत्वख्यापनेन अश्रेष्ठत्वेऽपि श्रेष्ठत्वख्यापनेन मदेनोत्कर्षा
भावेऽप्युत्कर्षख्यापनेन महदवज्ञाहेतुनान्विताः असद्ग्राहानशुभनि
श्चयान् अनेन मंत्रेणेमां देवतामाराध्य स्त्रीणामाकर्षणं करिष्याम्यने
न मंत्रेण विधीन् साधयिष्यामि शत्रून् मारयिष्यामि आगमाद्युपदिष्टामित्या
दिदुराग्रहरूपान् मोहादविवेकाद्गृहीत्वा न तु शास्त्रात् अशुचिव्रता
अशुचीनि श्मशानादिदेशोच्छिष्टत्वाद्यवस्थायां शौचमापेदेपि वा
आगमाद्युपदिष्टानि व्रतानि येषां ते एतादृशाः पतंति नरकेऽशुचावि
त्यग्रिमेणान्वयः ॥१०॥

ज्ञानवैजयंतीटीका ९

अथ तेषां दुराचारतां दुर्हेतुतां चाह त्रिभिः काममिति दुःपूरं ब्रह्माद्या
पि पररूपैर्विषयैरपि पूरयितुमशक्यम् दुःप्रापविषयं वा कामं
विषयतृष्णारूपमाश्रित्यावलंब्य मोहाद्गृहीत्वासद्ग्राहान् मोहादज्ञा
नात् असद्ग्राहान् दुष्टेन केनचिद्दत्तानविनाशकान् भैरवयक्ष
राक्षसादिक्षुद्रदेवतातत्मंत्रतदाराधननिमित्तकभूपतिकामि
नीधनाद्याकर्षणरूपकान् दुराग्रहान् गृहीत्वा स्वीकृत्य अशुचि
व्रताः अशुचीनि श्मशानसेवनमद्यमांसादिभक्षणभस्मास्थ्याभर
णादिरूपाणि व्रतानि येषां ते तथा दंभमानमदान्विताः दंभेनाधर्मि
ष्ठत्वेऽपि धर्मिष्ठख्यापनेन मानेनाश्रेष्ठत्वेऽपि श्रेष्ठत्वख्यापनेन मदे

+ तेचयदाकेनचित्कर्मणामनुष्ठायोनिमापद्यंतेतदा ॥

नात्युत्कृष्टत्वख्यापनेनान्विताः युक्ताः संतः प्रवर्तंते शास्त्रविहितेक
र्मणि स्वेच्छयावर्ततइत्यर्थः ९० ॥

मधुसूदनीटीका ९०

+ कामं तु ननु हृष्टविषयाभिलाषं दुःखरूपत्वेनशक्यं दंभेनाध
र्मिकत्वेपि धार्मिकत्वख्यापनेन मानेन अपूज्यत्वेपि पूज्यत्वख्यापने
नमदेन उत्कर्षरहितत्वेप्युत्कर्षविशेषाध्यारोपेण महद्भ्यवधीरणहे
तुनान्विताः असद्ग्राहात् अशुभनिश्चयात् अनेनमंत्रेणमांदेवता
माराध्य कामिनीनामाकर्षणं करिष्यामः अनेनमंत्रेणमांदेवता
माराध्यमहानिधीन्साधयिष्यामइत्यादिदुराग्रहरूपात् मोहादवि
वेकाद्गृहीत्वानंतशास्त्रान् अशुचिव्रताः अशुची नियमश्मशानादि
देशोद्भिष्टत्वाद्यशौचसापेक्षाणिवामागमाद्युपदिष्टानिव्रतानि
येषांते अशुचिव्रताः प्रवर्तंते पत्रक्षुद्राण्यवैदिकेदृष्टफलेषु क्षुद्रदेव
ताराधनादिविनिशेषः एतादृशाः पतंतिनरके अशुचाविश्यग्रिमेण
न्वयः [illegible] ॥९० ॥

सदानंदीटीका ११

केनचित्कर्मणानेवस्थास्यं वंतिनराहृतिं तदाभोगाभिलाषंतेसंता
शक्यपूरणं १ आश्रित्याधार्मिकत्वेपिधार्मिकत्वधमान्विताः अप्रस्म
त्वेपिहस्यत्वख्यापनेनमदेनच २ उत्कर्षारोपेणनैवयुक्ताः अशुभ
निश्चयात् अनेनाराध्यमंत्रेणदेवतामहस्माद्दं ३ आकर्षणंकरि
ष्यामिकामिनीनामथ्यामनुनानिधीश्चसाधयिष्यामीत्यादिरूपादुराग्र
हात् अविवेकाद्गृहीत्वातेनतुशास्त्राल्कथंचन अशुचीनियमशाना
दिदृष्टदेशाश्रयाणिच ५ येषांव्रतानामशौचादिसापेक्षाणिप्रवर्तंति
ते दृष्टफलेप्रवर्तंतेयत्रक्षुद्राण्यवैदिके ६॥ ९०॥

नीलकंठीटीका १२

असद्ग्राहानवश्याकर्षणनिधिजनकार्यसिध्यादिसाधनेष्वसत्स्वग्र
समीचीनेष्वाग्रहानिर्बंधाअसत्साभिनिवेशात्तान्गृहीत्वा अशुची
निमद्यमांसादिसापेक्षाणिव्रतानिनियमविशेषायेषांतेनथाभूताः
संतः कुमार्गप्रवर्तनेनप्रवर्तंतेजगतः क्षयायेतिसंबंधः ॥ ९० ॥

श्री·
गी·टी·
बो·

43

आनंदीटीका १३

यावज्जीवं सुखं जीवेदित्यनया कामं विषयाभिलाषं दुष्पूरं तस्मा
त्व निरगाधेय मिस्यापुरयापूरयितुमशक्यमाश्रित्य दम्भादैरु
कालदर्पैरन्विताः यत्किंचिन्नदसदित्यसनोग्रहं दृढमाश्रिताः
क्रूराहिंस्राः ९ ॥

+एवमुद्दिक्तनमस्कस्याहर सर्गस्यस्वरूपं प्रतिपाद्येदा नीमुद्रिक्तरजस्कास्यापरस्यत त्वतिपादयितुमाह॥

रामकंठीटीका १४

+अन्ये आसुराजना एवंविधाः प्रवर्तन्ते व्यवहरंति किं कृत्वा दुष्पू
रं पूरयितुं कर्तुं न शक्यं कामं विषयतृष्णात्मकं संकल्पमाश्रि
त्यावलंब्यातएव दंभेन कालदर्पेण लोभेन गर्वेण मदेन वि
मोहेकेनान्विता अनुगता व्याप्तास्तथा सद्ग्राहाश्रितास्तथा
विपरीताभिनिवेशाः बलवन्तस्तन्मन्त्राराहिंसादिषु निरपे
दास्तथा अशुचिव्रता अशुचीनि शास्त्रपरिवर्जनपरिहृष्टनिय
माश्च हानिता मितानि काम्यानि व्रतविशेषाणि नियमविशे
षा येषां ते तथोक्ताः किमुक्तं भवति रजःप्रधानत्वाद्धनादिरू
पं कामनानिमित्तकं कर्मारभन्ते तमोनुगतत्वात्तेषामशुचि
भवति दम्भादिदोषान्वितास्ते भवंति किंच । १० ॥

+एवमुद्रिक्तनमस्कस्याह रसर्गस्यस्वरूपमुक्त्वा उद्रिक्त रजस्कस्यस्वभावमाह॥

नास्तिकी [illegible]टीका १५

+अन्ये स्वरस्वभावजना दुष्पूरं पूरयितुमशक्यं कामं विषया
भिलाषमाश्रित्यावलंब्य दम्भेनाधार्मिकत्वे मिथ्याधार्मिक
त्वख्यापनेन मानेनाभिमानेन मदेन चित्तमोहकेन चान्विताः
मोहादज्ञानवशादवधारणेनासद्ग्राहानदुष्टाभिनिवेशान् अनेन
मंत्रेणेमां देवतामाराध्य महानिधीन्साधयिष्यामः कामिनी
ग नां वशं करिष्याम इत्येवं गृहीत्वा निश्चयेन स्वीकृत्य अशुचिव्र
ता अशुचीनि श्मशानादिदेशोपकृतत्वादशुचीनि व्रता
नि नियमविशेषा येषां ते एवंविधाः सन्तः प्रवर्तन्ते कर्मारभन्ते प
तादृशाः पतन्ति नरके अशुचावित्यग्रेमेनान्वयः [illegible] ॥

पंचोलेटीका

काममिति दंभमानमदान्विताः अशुचिव्रताः पापचारिणः दुःपूर मलेभावरहितंकाममभिलाषमाश्रित्यमोहादविवेकतः असद्ग्रहा नअशुभनिश्चयान्गृहीत्वालोकेप्रवर्तंते ब्रह्मणोवचनेपिअसत्यप त्ययइत्यर्थः ९

रत्नवीरसमिद्धोयिनी

किंच काममिति दुष्पूरं पूरयितुमशक्यं काममाश्रित्य दंभादिभि र्युक्ताः संतो मोहादविवेकतो असद्ग्राहान् गृहाण एव ग्राहा असंतोग्राहा असद्ग्राहा अनेन मंत्रेण तां देवतामाराध्यमहानिधीन्साधयिष्यामइ त्यादिरूपास्तान्गृहीत्वास्वीकृत्यप्रवर्तंते तपकाशुविव्रतास्तेइति १०॥

मधुभाष्य

१०॥

भाषा अनुवाद ९

और जो कामना भोगादि करने से भी कभी पूरी नही होती ऐसी कामना को अवलम्बन करके दम्भ पाषण्ड से युक्त होय क्षुद्र देवता भूत प्रेत आदि की आराधना मे प्रवृत्त होते है सोई कहते है कि असतग्राम ग्रहण अर्थात् इस मंत्र के द्वारा इस देवता की आराधना से बहुत धन प्राप्त होगा ऐसा दुराग्रह मोह वशाते जो मनुष्य अङ्गीकार करि लेते अल्पबुद्धियो के अशुचि कहे मद्य मांस आदि युक्त व्रतहोते हैं तेई मनुष्य इन निषिद्ध कर्मो मे प्रवृत्त होते हैं ॥ ९ ॥

दोहा

धार काम दुसपूर को दंभ मान मद युक्त   असत ग्राह धरि मो
हसें विचरें अशुचि व्रत उक्त १०॥

45

चिंतामपरिमेयांच प्रलयांतामुपाश्रिताः का
मोपभोगपरमाएतावदितिनिश्चिताः ११ ॥

शांकरभाष्यटीका १

किंच चिन्तेति । चिन्तामपरिमेयांच नपरिमातुंशक्यते यस्याः[illegible]र्यइ
यत्ता सा अपरिमेयातामपरिमेयां प्रलयन्तां मरणान्तामुपाश्रिताः स
दाचिन्तापराइत्यर्थः कामोपभोगपरमाः काम्यन्तइतिकामाः शब्दाद
यस्तदुपभोगपरमाः अयमेव परमः पुरुषार्थोयः कामोपभोगइत्येवं
निश्चितात्मानएतावदितिनिश्चिताः ११ ॥

आनंदगिरिकृतटीका २

तानेवविधान्तरेणविशिनष्टिकिंचेति चिन्तामात्मीययोगक्षेमोपायो
लोचनात्मिकामपरिमेयविषयत्वात् परिमातुमशक्यामाश्रिताइति
संबंधः एषकामोपभोगः परमयेन सत्वस्यैतेनावत् पारत्रिकं
तत्वान्तिसत्वमिति निश्चयवन्तइत्याह एतावदितीति ११

स्वामिकृतटीका ३

किंच चिंतामिति प्रलयोमरणमेवांतोयस्याः तामपरिमेयांपरिमातुमश
क्यांचिंतामाश्रितानित्यंचिंतापराइत्यर्थः कामोपभोगएवपरमोयेषां
ते एतावदिति कामोपभोगएवपरमः पुरुषार्थोनान्यदस्तीतिकृतनि
श्चया अर्थसंचयानीहन्तइत्यनन्तरेणान्वयः तथाचवार्हस्पत्यसूत्रं काम
एवैकः पुरुषार्थइति चैतन्यविशिष्टःकायः पुरुषइतिच ११ ॥

पिशाचभाष्यटीका ४ ॥

अपरिमेयामवच्छेदरहितांप्रलयांतामुपाश्रिताः सदाचिंतापराइ
त्यर्थः कामोपभोगपरमाः विषयोपभोगप्रधानाः एतावदितिनिश्चि
ताः एतावान्पुरुषार्थोयदुतशब्दादिविषयोभोगइतिनिश्चि
ताः कृताध्यवसायाः ॥ ११ ॥

रामानुजभाष्यकृतटीका ५ ॥

चिंतेति अपरिमेयामपरिमेयांचापरिच्छेद्यांप्रलयांतांआ
कृतप्रलयावधिकांआत्मविषयामुपाश्रिताः तथाकामोपभोगपरमाः
कामोपभोगएवपरमः पुरुषार्थइतिमन्वानाः एतावदितिनिश्चिताः

इतोऽधिकः पुरुषार्थो न विद्यत इति संजातनिश्चयाः ११ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ११ ॥

परमार्थप्रपाटीटीका ७

किंच चिंतामिति प्रलयो मरणमेवांतः पर्यवसानं यस्यास्तामपरिमानमसं
ख्यां चिंतां मनोरथसंततिं उपाश्रिताः कामविषयास्तेषामुपभोग एव प
रमास्ते तत्किं प्राप्यं येषां ते एतावानेव पुरुषार्थ इति कृतनिश्चयाः श्रुतिर
पि यावद्देव तेषामेकैकं न प्राप्नोत्यकृतत्वमेव तावान्मन्यते न सोऽकृतत्वेने
ति भाष्यं तस्य पुरुषस्य इ इति निर्धारणे अकृतत्वात् सकलप्राप्तिर
हितं तस्य कृत्स्नप्रयासैः काम्यानां विषयाणां मध्ये यावदेकैकं विषयं न प्रा
प्नोति तावदहं न कृतार्थ एवेति मन्यते अहमप्राप्तसकलार्थ एवेति मन्यते
किंच आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेया
थ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै काम इति भाष्यं अग्रे गार्हस्थ्यप्राप्तेः
पूर्वं आत्मैव शरीरमात्रेणैक एवासीदनंतरं स जाया मे स्यादित्यकामयते
त्यादि [illegible] चिंता ॥ ११ ॥

वनमालीटीका ८

किंचान्यत् प्रलयो मरणमेवावसानं यस्यास्तां अपरिमेयां विषयबाहुल्येन
परिमातुमशक्यां चिंतामुपाश्रिताः यावज्जीवं वर्धनादिचिंतापरा इत्य
र्थः कामोपभोगः स्त्रीमुखावाप्यादिरेव परमं मुख्यत्वेन येषां ते एताव
दिति ऐहिकविषयभोग एव पुरुषार्थो नामुष्मिकः कश्चिदस्तीति कृत
निश्चयाः ११ ॥

ज्ञसमवैजयंतीटीका ९

किंच चिंतामिति अपरिमेयाममयाऽऽप्रलयां तां प्राकृतप्रलयावसानां स्व
मरणकालावधिं साध्यवस्तुविषयां वा चिंतां प्रामाण्यामानेकविषयभा
वनामुपाश्रिताः संयुक्ताः चकारात् शोकोऽपि तेन पत्रपुत्रादिनाशनि
मित्तमपरिमेयं प्रलयांतं शोकमाश्रिताः अहमेवमहं नष्ट इति नाशेन ना
शं कुर्वंतीत्यर्थः अत एवं यतः कामोपभोगपरमाः कामोपभोग एव पर
मः पुरुषार्थो येषां ते एवमेव कुतो यतः एतावदिति निश्चिताः एतावदे
व कामोपभोगमात्रमेवैहिकसुखमस्ति न त्वन्यत्किमपि पारलौकिकमि
ति कृतनिश्चयाः ११

^तानेवपुनर्विशिनष्टि ॥

मधुसूदनीटीका ९ ॥

^चिंतामात्मीययोगक्षेमोपायालोचनात्मिकां अपरिमेयामपरिमेयवि
षयत्वात्परिमातुमशक्यां प्रलयो मरणमेवांतो यस्यास्तां प्रलयांतां या
वज्जीवमनुवर्तमानामितियावत् नकेवलमयचिंतिताः प्रवर्तंते किंतु
एतादृशीं चिंतां उपाश्रिताः इतिसमुच्चयार्थः चकारः सदाअनंतचिं
तापराअपि नकदाचित्पारलौकिकचिंतायुताः किंतु कामोपभोग
परमाः काम्यंत इति कामा दृष्टाः शब्दादयो विषयाः तदुपभोग एव प
रमः पुरुषार्थो नधर्मादिर्येषां ते तथापारलौकिकमसुनमेसुखंकृतो
नकामयंते तत्राह एतावत् दृष्टमेव सुखं नान्यत् एतच्छरीरवियोगे
भोग्यं सुखमस्ति एतत्कायातिरिक्तस्य भोक्तुरभावादिति निश्चिताः
एवंनिश्चयवंतः तथा च बार्हस्पत्यं सूत्रं चैतन्यविशिष्टः कायः पुरु
षः काम एवैकः पुरुषार्थ इति च नईदृशा असुराः ११ ॥

सदानंदीटीका ११

इदंदेवादिसेवादौ भोगमात्रैकलंपट् यावज्जीवमुपाश्रिता १ टा पदालंबंवनेह्रासे^
दृष्टाःशब्दादयोभोगाः काम्यंते ये तिरातिभिः तेषां तदुपभोगोऽस्ति पुरु
षार्थेनचापरः २ एतावद्दृष्टमेवास्ति सुखं नान्यन्मृतेःपरं एतत्कामाति
रिक्तस्य सभावो मोक्षेरवहि २ इतिनिश्चयवंतस्ते ये लोकायतिकाः
शठाः ११ ॥

नीलकंठीटीका १२

चिंतां योगक्षेमविषयां प्रलयांतां मरणावधिं एतावत् देह एवात्मा का
मभोग एव पुरुषार्थः इतोऽन्यन्नास्ति इति निश्चिताः निश्चयवंतः तथा
च बार्हस्पत्यं सूत्रं चैतन्यविशिष्टः कामः पुरुषः काम एवैकः पुरुषा
र्थ इति च ॥११ ॥

आनंदीटीका १३

चिंतां यत्नार्जनविषयाम् अनंतां प्रलयांतां मरणपर्यवसायिनीम्
एतावदिति जन्मनोऽस्य विषयभोगादन्यत्किमपि फलं नास्ती
ति निश्चिताः ॥ ११ ॥

रामकंठीटीका १४

न एवंविधा अर्थसंचयान् धनसमृद्धीरीहंते चेष्टंते कीदृशाः का
मभोगार्थान् विषयास्वादप्रयोजनान् कथमीहंते न्यायेन न्यायः

४८

शास्त्रीयाधिकारादिदेशकालावस्थाद्यपेक्षमुख्यैककल्पानुकल्पवि
हितस्वस्वहन्ननियमस्तं विना कीदृशाः संत एवं कुर्वंतीति चिंतामथो
त्तनुध्यानमपरिमेयां नत्वल्पायाग्रनेत्याह बहुविधां किं तप्रलयांतां
प्रलयो विनाशः शरीराभावो तो वसाने यस्यास्तां ताहशीमुपाश्रि
ताश्चालंबितवंतः तथा कामोपभोगपरमाः काम्यंते इति कामा
विषयसुखानि तेषामुपभोगस्तत्तमनुभवनं परमः फलत्वेन
प्रकृष्टो येषामत एवैतत्कामोपभोगमात्रमिहस्मार इति निश्चिताः
॥ [illegible] त्मासिकी [illegible]टीका ॥

किंच चिंतामात्मीययोगक्षेमोपायपर्यालोचनात्मिकां अपरिमेयां बहु
विधां प्रलयांताम् प्रलयो मरणमेवांतो यस्यास्तामुपाश्रिताश्चालं
बितवंतः तथा कामोपभोगे विषयसुखानुभव एव परमः पुरु
षार्थो न धर्मादिर्येषां ते एतावदेव दृष्टं विषयसुखमेवेहस्मारा
नान्यदेतद्व्यतिरिक्तं किंचिदित्येवं निश्चयवन्तः ११

पंचोले टीका

किंच चिंतामिति चपुनरपरिमेयामगणनीयां प्रलयांतां मर
णांतां चिंतामुपाश्रिताः कामोपभोगपरमाः शब्दादिविषयोपभो
ग एव परमार्थः एतावदिति निश्चिताः निश्चयं गताः ११

रणवीरसमिद्धोधिनी

किंच चिंतामिति चिंतामपरिमेयां परिमातुमशक्यां प्रलयां
तां च मरणपर्यंतामेताद्दशीं तामुपाश्रिता नित्यं चिंतापराः का
मोपभोगपरमाः कामोपभोग एव परमः पुरुषार्थो येषां ते
तथा चैतावदिति एतावदेव परमप्रयोजनं जगति नान्यदि
त्येवं कृतनिश्चया अर्थसंचयानेहंते अन्तरेणान्वय इति ११

मधुभाष

११॥

भाषा अनुवाद ११

और प्रलय कहे मरण काल पर्यन्त है जिस का अन्त ऐसी जो अपरिमेय चिन्ता अर्थात कितनी है इस का ठिकाना नहीं तिसके आश्रित कहे चिन्तापरायण मनुष्य जिन को काम भोग करना ही परम प्रयोजन है और कामभोग छोड़ दूसरा और कोई परम पुरुषार्थ नहीं हैं इतनी ही किये हैं निश्चय जो लोग ते अकर्म्म के द्वारा धन संचय करने की इच्छा करते है इस की पर श्लोक के साथ अन्वय होती है बृहस्पति का सूत्र प्रमाण देते हैं कामपवैकः पुरुषार्थ इति इस का अर्थ यह है कि चैतन्यविशि ष्ट जो काम उसी को पुरुष पद से कहते हैं ११

दोहा॥

चिंता अपरिमाण यत मरण काल पर्यंत कामभोगपरमार्थ है ऐसे निश्चयवंत ११॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् १२

शांकरभाष्यटीका १

आशापाशेति आशापाशशतैः आशा एव पाशास्तच्छतैराशापा
शशतैर्बद्धा नियन्त्रिताः सन्तः सर्वतः आकृष्यमाणाः कामक्रोधपरा
यणाः कामक्रोधौ परमयनं परमाश्रयो येषां ते कामक्रोधपराय
णाः ईहन्ते चेष्टन्ते कामभोगार्थं कामभोगप्रयोजनाय न धर्मार्थमन्या
येनार्थसंचयान् अर्थप्रचयान् परस्वापहरणादिनेत्यर्थः १२ ॥

आनंदगिरिटीका २

आसुरानेव पुनः विशिनष्टि आशेति अशक्योपायार्थविषया अनव
गतोपायार्थविषया प्रार्थना आशास्ताः पाशा इव [illegible] आ
शैर्बद्धा इव श्रेयसः प्रच्याव्य तैर्नीयमानाय इत्याह आशा
एवेति १२ ॥

पाशश तैर्बद्धा

स्वामिकृतटीका ३

अत एवाशेति आशा एव पाशास्तेषां शतानि तैर्बद्धा इतस्ततः आकृष्यमा
णाः कामक्रोधौ परमयनमाश्रयो येषां ते कामभोगार्थमन्यायेन चौ
र्यादिनार्थानां संचयान् राशीन् ईहन्ते इच्छन्ति १२ ॥

पैशाचभाष्यटीका ४

पाशा इव पाशाः बद्धाः आकृष्यमाणाः कामक्रोधौ परमयनं येषां
ते कामक्रोधपरायणाः कामक्रोधवशा इत्यर्थः ईहन्ते आर्जयं
ति कामभोगप्रयोजनार्थमन्यायेन अशास्त्रविहितोपायेनार्
थसंचयान् द्रव्यसंचयान् ॥ १२ ॥

रामानुजभाष्यटीका ५

आशापाशेति आशापाशशतैः आशाख्यपाशशतैर्बद्धाः कामक्रो
धपरायणाः कामक्रोधैकनिष्ठाः कामभोगार्थमन्यायेनार्थसंचया
न् प्रतीहन्ते १२ ॥

अभिनवगुप्तकृतटीका ६

५८

स्पष्टार्थं १२ ॥

परमार्थप्रपाटी ७

आशापाशशतैरिति आशा एव पाशाः बंधनरज्जवस्तेषां शतानि तैर्बद्धाः नइकं आशानाम मनुष्यस्य काचिदाश्चर्यशृंखला यया बद्धाः प्रधावंति मुक्तास्तिष्ठंति पंगुवदिति तथा कामक्रोधौ परमयनं गतिर्येषां ते ते कामभोगार्थं विषयभोगार्थं अन्यायेन परवित्तचौर्यादिना अर्थसंचयान् द्रव्यसंग्रहानीहंते प्रयतंते १२ ॥

वनमालीटीका ८

नानाविषयका आशा एव पाशास्तेषां शतैर्बद्धाः इतस्तत आकृष्यमाणाः कामक्रोधावेव परमयनं येषां ते कामभोगार्थं स्त्रीव्यवायादिभोगार्थं अन्यायेन वेदविरुद्धः प्रतिग्रहचौर्यादिरूपाद्व्यापार्थसंचयान् ईहंते वांछंतु तादृशं चैतच्चयतः इह परलोकादेरभावात् सर्वस्य स्वभावत एव मिथ्यात्वा च भस्मीभूतस्य देहस्य पुनरागमनं कुतः इति निश्चयवतो धर्मेणैवार्थो
या^ न्तस्माद्यप्यवाहि विषयान् भुक्त्वा पतंति नरके चाविमृश्यक्रमेणान्वयः १२ ग्रा^

श्रमवेनयंतीटीका ९

किंच आशेति आशा एव पाशाः शतैः धनाशा पुत्राशा राज्याशा स्वर्गादिरूपैः अनेकाशारूपपाशशतैर्बद्धाः बकीभिः रज्जुभिरिव सपादकरिग्रीवाद्यविलागवद्धाकर्कटाः इवेत्यर्थः कामक्रोधपरायणाः कामक्रोधयोः परमाश्रयास्ते जनाः कामभोगार्थं कामभोगमात्रैकप्रयोजनाय अन्यायेन स्तेयवन परवंचकत्वधूर्तत्वादिधर्मकर्मणा नतु स्वाश्रमानुरूपधर्मेण अर्थसंचयान् द्रव्यसंग्रहानभनीहंते चेष्टन्ते १२ ॥

मधुसूदनीटीका १०

आशाकोटा अप्राप्तार्थविषया अनवगतोपाया प्रार्थविषया वा प्रार्थना आ- ए
ए शाः सैव पाशा इव बंधनहेतुत्वात् पाशाः तेषां शतैः समूहैर्बद्धा इव श्रेयसः प्रच्याव्य यतस्ततः आकृष्यमाणाः कामक्रोधौ परमयनमाश्रयो येषां ते कामक्रोधपरायणाः स्त्रीव्यतिकराभिलाषपराः निरोधाभिलाषाभ्यां सदा परिगृहीता इति यावत् ईहंते कर्त्तुं चेष्टंते कामभोगार्थं न तु धर्मार्थं अन्यायेन परस्वहरणादिना अर्थसंचयान् धनरा

ष्णीनसंचयानितिवक्ष्यवचनेनधनप्राप्तावपिनतस्मात्तृष्णैवविषय

वृ्धि प्राप्तिर्वर्धमानतस्मात्स्वपोलोभोदर्शितः [illegible]

[illegible] १२ ॥

सदानंदीटीका ११

आशाकोपायविषयाप्राप्तास्तापएवबंधकाः पाशास्तेषांशतैर्बद्धाः प्रयत्नःप्रयत्नाजस्रः स्वाभिलाषपरानिराभिलाषाभ्यांसदाहृताः चेष्टंतेकामभोगार्थंनधर्मार्थंकथंचन २ कर्तुंतेवित्तराशींश्चपर स्वहरणादिना १२ ॥

नीलकंठीटीका १२

अन्यायेनपरवंचनादिना अर्थसंचयान्धनराशीन् ईहंतेलिप्संते १२ ॥

आनंदीटीका १३

अन्यायेनशास्त्रोक्तंवृत्तिप्रकारंपरित्यज्यकामानांविषयाणामुपभोगायधनसंचयानीहंतेजयितंचेष्टंतेइत्यर्थः १२ ॥

रामकंठीटीका १४

निःसंशयबुद्धयोनएवतद्विषयाभिराशाभिर्मनोरथैरेवपाशाशतैर्बंधनरज्जुसमूहैर्बद्धासंयताविघ्नितविषयांतरस्वातंत्र्यास्तेनस्त्रकामक्रोधौरागद्वेषाविष्टानिष्टविषयौपरायणमाश्रयोयेषांतेतथाविधाः किंच ॥ १२ ॥

लासिकी [illegible]नीटीका १५

तथाआशाभिरायताभिस्ताभिरेवपाशशतैरज्जुसमूहैर्बद्धाःसंयताः कामक्रोधौपरमायनमाश्रयोयेषांते एवंविधाअपरेअसुरस्वभावाविषयभोगार्थमन्यायेनविहितविपर्ययस्तेनचौर्यादिनाधनसमृद्धीःकर्तुंचेष्टंते [illegible]

[illegible] १२

गी·

बो·टी·

पंचोले टीका

अतएवआशेति आशापाशशतैर्बद्धाः आशा एव पाशास्तेषां शतैः बद्धाः कामक्रोधपरायणाः सर्वदा कामक्रोधपराः कामभोगार्थं कामभोगप्रयोजनार्थं अन्यायेन परस्वापहरणादिना अर्थसंचयान् ईहन्ते प्रार्थयन्ते १२ ॥

रसावीरसमिद्धोधिनी ॥

आशापाशेति आशापाशा आशाः पुत्रैश्वर्यादिलक्षणास्ता एव पाशा बंधकास्तेषां शतैर्बद्धा यतो हि कामक्रोधपरायणा अतएव ते कामभोगार्थं न त्विमित्तान्यायेनार्जितानर्थसंचयानीहन्ते धनार्जनं प्रति प्रवर्तन्त इति भावः १२ ॥

मधुभाष्य

१२ ॥

भाषा अनुवाद १२

इसी से आशारूप सैकड़ो रसीयों से बंधे इधर उधर खैंचे जा
ते हुये लोग काम क्रोध के आश्रय स्वरूप भूत काम उप
भोग के अर्थ अन्याय करेह चोरी लवारी दगाबाजी ठगी वटपा
री से धन बटोर नेकी इछा करते हैं इसी से वह धन कुकर्म्म
छोड़ सुकर्म्म मे नही लगे है देखो अज्ञानी आप अपने हाथ
गले मे सैकड़ों फांसी लगाय लेतेहै । १२ ॥

दोहा

आशा फास ग्रसत बहु हय कामक्रोध लयलीन कामभोग
को अनीति सें धनसिंचन परवीन १२

इदमद्यमयालब्धमिदंप्राप्स्येमनोरथं इदम
स्तीदमपिमेभविष्यतिपुनर्धनं १३ ॥

शांकरभाष्यटीका १

ईदृशाश्च तेषामभिप्रायः इदमिति इदं द्रव्यं अद्य इदानीं मया लब्धं इदंच अन्यत् प्राप्स्येमनोरथं मनस्तुष्टिकरं इदंचास्ति इदमपि मे भविष्यत्यागामिनि संवत्सरे पुनर्धनं तेनाहं धनी विख्यातो भविष्यामि १३ ॥

आनंदगिरिकृतटीका २

तेषामभिप्रायोपि विवेकविरोधीत्याह ईदृशाश्चेति द्रव्यंगोहिरण्यादि इदमन्यद्धनं प्रार्थ्यमानत्वेन विपरिवर्तमानमित्येतत् १३

स्वामिकृतटीका ३

तेषांमनोराज्यंकथयन्नरकप्राप्तिमाह इदमद्येतिचतुर्भिः प्राप्स्ये प्राप्स्यामि मनोरथं मनसःप्रियं शिष्टंस्पष्टं एषांचतुर्णांश्लोकानां अज्ञानविमोहिताःसंतोनरकेपतंतीतिचतुर्थेनान्वयः १३

पैशाचभाष्यटीका ४

इदंद्रव्यंसुवर्णादिअस्ति नहतिप्राप्तमिमंमनोरथंप्राप्स्ये अहंमनोरथमभिमतंविषयमिदंधनमिति इदमपिधनं भविष्यति ॥ १३ ॥ ॥

रामानुजभाष्यटीका ५

इदमिति इदंक्षेत्रपुत्रादिकंसर्वंमयात्मसामर्थ्येनलब्धंनादृष्टादिना इदंचमनोरथमहमेवप्राप्स्येनादृष्टादिसहितःमत्सामर्थ्येनलब्धमि दंधनंमेस्ति इदमपिपुनर्मेमत्सामर्थ्येनभविष्यति १३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् १३ ॥ ॥

परमार्थप्रपाटीका

अथान्यायेनापिअर्थेनाभेकेवलंमनोराज्यमेवकुर्वंतीत्याह इदमितिचतुर्भिः मनोरथंमनसःप्रियंशेषास्पष्टाप्राप्स्येप्राप्स्यामि शेषंस्पष्टंश्लोकानांत्रयाणांएषामित्यज्ञानविमोहिताःपतं तिनरकेऽशुचौ इतिचतुर्थेनान्वयः १३ ॥

51

वनमालीटीका ॥

तेषामीदृशीधनतृष्णानुवृत्तिरिति मनोराज्यकथनेन विवृणोति इदं धनमद्यानेनोपायेन मया लब्धं इदं तदन्यं मनोरथं मनस्तुष्टिकरं शीघ्रमेव प्राप्स्ये इदं पुरैव संचितं मम गृहेऽस्ति इदमपि वक्रतरं भविष्यत्यग्रे पुनर्धनं एवं धनतृष्णाकुलाः पतन्ति नरकेऽशुचावित्यग्रिमेणान्वयः १३ ॥

ऋसमवैजयंतीटीका ९

आसुराणां तेषां मनोराज्यप्रकारमाह धनाशानुवृत्तिं वर्णयन्निरयप्राप्तिमाह चतुर्भिः इदमद्येति अद्येदानीं मयैव स्वसामर्थ्येन इदं पशुपुत्रदेहादिकं सर्वं लब्धं प्राप्तं न तु केवलेन दैववलेनेमं मनोरथं मनोवांछितमर्थमहमेव स्वसामर्थ्येन प्राप्स्यामि न त्वीश्वरप्रसादेन ममैव स्वबलेन लब्धमिदं धनमस्ति नान्येन सहायेन पुनरागामिवर्षे मद्बलेनैव ममेदमपि धनं भविष्यति न तु दैवबलेन १३ ॥

+ तेषामीदृशीधनतृष्णानुवृत्तिं मनोराज्यकथनेन विवृणोति ॥

मधुसूदनीटीका १० ॥

+ इदं धनं मया इदानीमनेनोपायेन मया लब्धं इदं तदन्यत् मनोरथं मनस्तुष्टिकरं शीघ्रमेव प्राप्स्यामि इदं पुरैव संचितं मम गृहेऽस्ति इदमपि वक्रतरं भविष्यत्यागामिनि संवत्सरे पुनर्धनं एवं धनतृष्णाकुलाः पतन्ति नरकेऽशुचावित्यग्रिमेणान्वयः [illegible] १३ ॥

सदानंदीटीका ११

ईदृशं धनतृष्णानुवृत्तिं तेषां चेतसो विवृणोति मनोराज्यकथनेन हृतिः स्वयं १ इदं धनं मयाद्यानेनोपायेनामेव सम्प्रति मनस्तुष्टिकरं चान्यत्प्राप्स्ये शीघ्रमिदं पुनः २ संचितं मे गृहे चास्ति वक्रवित्तमिदं पुनः भविष्यत्येव सर्वं मम आगामिनि वत्सरे ३ एवं तत्कुलामूढा वै नरकादिकं ध्रुवौ पतन्ति नरके घोरे नाकल्पनिःसरन्ति ते ४ १३ ॥

पत्र ८

नीलकंठीटीका

आशापाशान्विहरतीति इदमद्येति १३ ॥

आनंदीटीका १३

एतदेवविस्तरयति १३ ॥

रामकंठीटीका १४

तदेवंविधेनाप्यज्ञानेनतत्त्वार्थप्रबोधाभावेनविमोहितास्तेचित्र
मापादिताः संतोमृत्वाचानंतामेवानिरये गर्भवासादौ पतं
तिनिमज्जंतिपुनःपुनर्जायंतेइत्यर्थः कीदृशेनाज्ञानेनाद्या
स्मिंदिनेतावदिदंधनादिवस्तुमयालब्धंस्वीकृतमिदंचमेचेत
सिस्थितंमनोरथमभिलषितंवस्तुप्राप्स्य इदानीमपिगमिष्या
मीदंतावद्धनंस्वर्णाद्यस्तिविद्यते। १३ ॥

लासिकी [illegible]टीका १५॥ एवमलब्धमनोरथानांहृत्तस्तुक्तालब्धमनोरथानामा

हत्रिभिः मनोरथंमनसः प्रियम् शेषंस्पष्टम् [illegible] १३ ॥

पंचोलेटीका

तेषांमनोराज्यंकथयन्नरकप्राप्तिमाह इदमद्येतिचतुर्भिः
मयाअद्येदंधनंलब्धंइदमनस्ंइतंमनोरथंमनस्तुष्टिकरंप्रा
प्स्येइदंधनंचअस्तिइदमपिधनंमेआगामिकालेपुनर्भवि
ष्यति १३

रसवीरसमिद्धोधिनी

इदमिति इदंद्रव्यमद्येदानींमयालब्धमिदंचान्यन्मनोरथंम
नस्तुष्टिकरंलाभं प्राप्स्ये इदंचास्ति अपिचागामिकालेधनंपु
नरपिमेभविष्यतीति धनमदांधास्ते १३॥

मधुभाष्य

१३॥

भाषा अनुवाद १३

अब ऐसे लोगो के मनोरथ कहि कर उन की नरक प्राप्ति का
वृत्तान्त इस श्लोक से ले कर चार श्लोक से कहते हैं कि इसी
अज्ञान से विशेष मोह प्राप्त होके नरक मे पड़ते हैं देखो उन
की रुची औ मनोरथ येहैं कि आज हमको यह लाभ भई
और यह मनभावती प्यारी वस्तु पेरे करेह आगे पावेंगे औ
र यह धन हमारे है हमाराहै और फेर भी तज बीज लगाये
हैं कि वह धन भी हमारा होगा परन्तु यह नहीं शोचते कि
हम किस के हवाले होंयगे और किस गति को जायगें १३

दोहा

यह अब मोहि मिलगयो यह मनोरथ मिलें मोहि यह तो है
यह फेर मोहि निश्चयकर मिलें गोहि १३॥

असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ई
श्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी १४

शांकरभाष्यटीका १

असौ मयेति असौ देवदत्तनामा मया हतः दुर्जयः शत्रुः हनिष्ये चान्यान्वराकान् परानपि किमेते करिष्यन्ति तपस्विनः सर्वथापि नास्ति मत्तुल्यः ईश्वरोऽहमहं भोगी सर्वप्रकारेण च सिद्धोऽहं सम्पन्नः पुत्रैः पौत्रैर्नप्तृभिर्न केवलं मानुषोऽहं बलवान् सुखी चाहमेव अन्ये तु भूमिभारायावतीर्णाः १४ ॥

आनंदगिरिकृतटीका २

यथोक्ते मदभिप्राये प्रतिबंधकः शत्रुरपि न संभवतीत्याह असाविति त्वत्तो निहीनानां त्वया परिभवेऽपि त्वत्तुल्यानां शत्रूणां परिभवो निश्चितो न भवतीत्याशंक्याह सर्वथेति ऐश्वर्यातिरेकेऽपि कुतस्तेषां भोगसामर्थ्यमित्याशंक्याह अहमिति । सिद्धत्वमेव स्फुटयति सम्पन्न इति बलवानोजस्वी सुखी रोगरहितः १४ ॥

स्वामिकृतटीका ३ ॥

किंचासाविति सिद्धः कृतकृत्यः स्पष्टमन्यत् १४ ॥ ॥

पैशाचभाष्यटीका ४

ईश्वरोऽहं सर्वप्रकारेण वरः भोगी विषयोपभोगवान् सिद्धः संपन्नबलसंपन्नः ॥ १४ ॥

रामानुजभाष्यटीका ५

असाविति असौ मया बलवता हतः शत्रुः अपरानपि शत्रून् अहं शूरो धीरश्च हनिष्ये किमत्र मंदधीभिः दुर्बलैः परिकल्पितेनादृष्टादिपरिकरेण तथा च ईश्वर इति ईश्वरोऽहं स्वाधीनोऽहमन्येषां चाहं नियंता अहं भोगी स्वत एव भोगी नादृष्टादिभिः सिद्धोऽहं स्वतः सिद्धोऽहं न कदाचिददृष्टादेः तथा स्वत एव बलवान् स्वत एव सुखी १४ ॥

१४

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः १४ ॥

परमार्थप्रपाटीका ७

किंच असाविति असौ वर्तमानः शत्रुर्मया हतः अपरान् भविष्यतोपि शत्रून् हनिष्ये सिद्धः कृतार्थः तदुक्तं स्वषामनोरथश्रेण्यमाधुर्यो न्मोहितो दिवा रात्रौ स्वाभ्रंस्तु स्वं भुंजन्नरो यति जीवितमिति १४ ॥

वनमालीटीका ८

तेषां लोभप्रपंचाक्रोधप्रपंचयति असाविति असौ चैत्रनामा मया हतः शत्रुरतिदुर्जयः अतः इदानीमनायासेनापरानपि शत्रून् हनिष्ये च ह निष्यामि चकारात् तेषां धनमपि ग्रहीष्यामीत्यर्थः ननु सर्वेषामी श्वराधीनत्वात् कथं त्वया सर्वे हतव्या परास्तत्राह ईश्वरोहमेवातो म त्तुल्योधिको वा कश्चिन्नास्ति किमनेन करिष्यति वराकः इत्यभिप्रायेणे श्वरत्वविहारात् यस्मादहं भोगी सर्वभोगोपकरणैरुपेतः सिद्धो हं पुत्रस्त्र्यादिभिः सहायैः संपन्नः स्वतोपि बलवान् अतस्तेजस्वी सु खी सर्वथा नीरोगः १४ ॥

ऊत्तमसेवनयती ९

एवं तेषां धनतृष्णाप्रपंचोदाहृतीर्द्धभावप्रपंचयति असौ मयेति मया अतिधीरेणातिबलवता सौ यज्ञदत्तनामा शत्रुर्हतो मारितः अपि निश्चयेनापरानपि शत्रून् हनिष्यामि मत्तः कोपि न जीविष्यतीत्यर्थः चशब्देन तेषां धनदारादीनपि वाक्ववलेनाहि अपि निश्चयेनापर नयिष्यामीति सूचितम् ननु जयस्त्वीश्वराधीनो भवेत्तेन विना कथमरी न् जेष्यसीति चेत्तत्राह ईश्वरोहमिति अहमेवेश्वरः सर्वेषां नियन्ता स्वतन्त्रो न कोपि मदन्य ईश्वरोस्तीत्यर्थः ननीश्वरः सर्वयत्तकर्मणां भोक्ता त्वं कथं भवसीति चेत्तत्राह भोगी स्वतो निखिलभोगसंपन्नो हमेव नान्यः ननीश्वरसिद्धइति चेत्तत्राह सिद्धस्वतः प्रसत्वसि द्धोहमेव सततपरो नः केनदृष्टः स्वप्रष्टवदित्यर्थः ननीश्वरप्रसा दादेव सर्वेषां बलं सुखं च भवतीति चेत्तत्राह बलवान् सुखी स्वतएवाहं बलवान्बलिष्ठः तथा स्वतएवाहं सुखीनत्वीश्वरात् यदि कश्चिदीश्व रं कल्पयति तर्हि तं ईश्वरं मामेव स्वेरं कल्पयतु मत्तोन्यस्य स्वतन्त्रता नुपलब्धेरित्येवं तेमन्यंते १४ ॥

+ एवंलोभंप्रपंच्यतदभिप्रायकथनेनैवतेषांक्रोधंप्रपंचयति ॥

मधुसूदनीटीका १० ॥

+ असौदेवदत्तनामामयाहतःशत्रुरतिदुर्जयः अतइदानीमनाया
सेनहनिष्येहनिष्यामिचापरानसर्वानपिशत्रून् नैकोपिमत्सका
शाज्जीविष्यतीत्यर्थः चकाराच्चकेवलंहनिष्यामितान्किंतुतेषा
धनदारादिकमपिग्रहीष्यामीत्यभिप्रायः ननुत्वमिवतेपिसामर्थ्यात्व
त्तुल्यानात्वदधिकावाशत्रूणांसंभवादित्यतआह ईश्वरोहंनकेव
लंमानुष्योयेनमत्तुल्योधिकोवाकश्चित्स्यात्किमेतेकरिष्यंतिवराकाः
सर्वथानास्तिमत्तुल्यःकश्चिदित्यनेनाभिप्रायेणेश्वरत्वंविवृणोति
यस्मादहंभोगीसर्वैर्भोगोपकरणैरुपेतःसिद्धोहंपुत्रभृत्यादिभिःस
हायैःसम्पन्नःस्वतोपिबलवानतएवतेजस्वीसुखीसर्वथानीरोगः
[illegible] १४ ॥

महानंदीटीका ११

एवंप्रपंच्यतत्तृष्णांतदभिप्रायकीर्तनात् संप्रपंचयतिक्रोधंतेषांश्रीह
रिरव्ययः । मयासौदेवदत्ताख्योहतःशत्रुःसुदुर्जयः हनिष्याम्यपरा
न्सर्वानपिशत्रून्स्वेनचअपरैश्चसत्वयदृच्छ?ःसंख्यकोजीवनेक्षमःनके
वलंहनिष्यामिकिंतुतेषांधनादिकं २ गृहीष्यामीत्यभिप्रायश्चकारा
दवगम्यते ननुत्वत्साम्यमीदृशाहियतोपरे त्वत्तुल्याअधिका
४ किमशात्रवस्तत्रवोच्यते नकेवलंमनुष्योस्मियेनतुल्योधिकोथवा ५
कश्चित्स्यात्तनयतेकिंकरिष्यंतिवराककाः सर्वथानास्तिमत्तुल्यःकश्चि
दित्येश्वरोस्म्यहं विवृणोतीश्वरत्वंचतदभिप्रायतोहरिः यतोहंभोगसाम
ग्रीयुतःसिद्धोहमित्यतः ७ पुत्रभृत्यादिभिर्युक्तःस्वतोपिबलवान
हं सर्वथाहंचनीरोगोत्यंतसुखीपरतोयुतः ८ १४ ॥

नीलकंठीटीका १२ ॥

क्रोधपरायणत्वंकामपरायणत्वंचपूर्वाभ्यांअर्धाभ्यामाह असौ
विति ईश्वरःसमर्थःसर्वेषांनिग्रहे सिद्धःलब्धाखिलभोगसाधनः
बलवान् विषयोपभोगसमर्थः अतएवसुखी १४ ॥

आनंदीटीका १३ ।

सिद्धःसम्पत्त्यादिनासम्पूर्णमनोरथः ॥ १४ ॥

श्री॰
गी॰ टी॰
षो॰

55

रामकंठीटीका १४

इयंचान्यद्दन्त्रादिभविष्यतिसत्वमापत्स्यतेनतथासौकश्चिद्द्विषु आपादितःपरानपितैस्तैरुपायैर्व्यापादयिष्यामितथाहमीश्वरोद्रव्यपुरुषादीनांस्वामीतथाहंभोगीविषयसुखानुभवितासिद्धोलब्धप्रतिष्ठोहंतथाबलवान्दार्फ्यपुक्तोहंतथासुखीस्वीकृताभिलषितविषयः १४ ॥

लासिकी [illegible]टीका १५

किंच ईश्वरोद्रव्यपुरुषादीनांस्वामीभोगीविषयसुखानुभविता ॥ सिद्धःकृतकृत्यः [illegible] १४

पंचोलेटीका

असावितिमयाअसौदुर्जयःशत्रुर्हतःअपरानपिवराकान्हनिष्येअहमीश्वरःसमर्थःअन्योनास्तिअहंभोगीभोगवान्सर्वप्रकारेणसिद्धःसंपन्नःपुत्रैःनप्तृभिश्चबलवान्सुखीचाहमेव १४

भगवीरसमिश्रोपिनी

किंच असाविति असौ देवदत्तोनाममयाहतःशत्रुरिति हनिष्येचापरानुर्जयानपीति सर्वसदाईश्वरोहमित्यादिलक्षणं अहंकारंचस्वस्मिन्स्वयमेवमन्यमानाश्चतेइति १४॥

मधुभाष्य

१४॥

भाषा अनुवाद १४

और इस शत्रुको हम मारडालेंगे और इस को मार लिया है और हमजो चाहैं सो करैं हमकर्ता ~~का स्मरण तो क्षण भर भी नहीं~~ और हम भोगी हैं हम सिद्ध है जो कुछ करना करचुके हैं हम वलवान हम सुखीहैं इन सब बातो का स्मरण तो क्षण भर भी नहीं भूलते परकाल वलवान् की सुध को तो एक वारगी ही भूलगये हैं कि वह क्या करेगा १४

दोहा

यह मैने रिपुहतकियो हतहूंगो फिर और मैं समर्थ हों भोगीहों सिद्ध सुखी बल मोर १४॥

आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः

१५ शांकरभाष्यटीका १

आढ्य इति आढ्यो धनेनाभिजनवान् सप्तपुरुषं श्रोत्रियत्वादिसंपन्नस्तेनापि न मम तुल्योस्ति कश्चित् कोन्योस्ति सदृशस्तुल्यो मया किं च यक्ष्ये यागेनाप्यन्यानभिभविष्यामि दास्यामि नटादिभ्यः मोदिष्ये हर्षातिशयं प्राप्स्यामीत्येवं अज्ञानेन विमोहिताः अज्ञानविमोहिताः अविवेकभावमापन्नाः १५ ॥

आनंदगिरिटीका २

विद्याहमथनाभिजनैः मत्तुल्यो नास्तीत्याह आढ्य इति तथापि यागदानाभ्यां तत्फलेन वा कश्चिदधिको भविष्यतीत्याशंक्याह किं चेति न च तेषामेषोभिप्रायः साधीयानित्याह इत्येवमिति १५ ।

स्वामिकृतटीका ३

किं चाढ्य इति आढ्यो धनादिसंपन्नः अभिजनवान् कुलीनः यक्ष्ये यागानुष्ठानेनापि दीक्षितान् तेभ्यः सकाशान्महतीं प्रतिष्ठां प्राप्स्यामि दास्यामि स्तावकेभ्यो मोदिष्ये हर्षं प्राप्स्यामीत्येवंज्ञानेन विमोहिता मिथ्याभिनिवेशं प्रापिताः १५ ॥

पिशाचभाष्यटीका ४

अभिजनवान् बंधुजनवान् दास्यामि गोभूहिरण्यादि अर्थिभ्यो वितरिष्यामि मोदिष्ये हर्षातिशयं च प्राप्स्यामीति एवमज्ञानविमोहिताः अविवेकेन विमोहितास्तेनः १५ ॥

रामानुजभाष्यटीका ५

आढ्योस्मीति अहं स्वत एव आढ्योऽभिजनवानस्मि स्वत एवोत्तमकुले प्रसूतोस्मि अस्मिंल्लोके मया सदृशः कोन्यः स्वसामर्थ्यलब्धसर्वविभवो विद्यते यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ईश्वरानुग्रहनिरपेक्षेण स्वयमेव यागदानादिकं कर्तुं शक्तोस्मीत्यज्ञानविमोहिता मन्यन्ते १५ ॥

अभिनवगुप्तकृतटीका ६

सदृशार्थं १५ ॥

परमार्थप्रपाटीका ७

किंच आढ्य इति आढ्यो धनसमृद्धः अभिजनवान् कुलीनः मया स
दृशः कोऽस्ति न कोऽपीत्यर्थः अथ असामर्थ्येऽपि स्वर्थमनोरथानाह
यक्ष्य इति यक्ष्ये यागं करिष्ये दास्ये न लाभार्थादिना दानं करिष्ये एवं लो
कान् रक्करणेन मोदिष्ये हर्षं प्राप्स्यामि इत्यज्ञानेन मोहिता मिथ्याभि
निवेशं प्रापिताः १५ ॥

वनमालीटीका ८

आढ्यो धनवान् अभिजनवान् कुलीनोऽप्यहमेवास्मि अतः कोऽन्यो
ऽस्ति सदृशो मया न कोऽपीत्यर्थः यक्ष्ये यागेनाप्यन्यानभिभविष्यामि
दास्यामि धनं स्तावकेभ्यो नटादिभ्यश्च ततश्च मोदिष्ये मोदं हर्षं प्रा
प्स्ये नर्तक्यादिभिः सहेत्येवमज्ञानेनाविवेकेन विमोहिताः १५ ॥

कृसमवैजयंतीटीका ९

पुनरपि तेषां दुष्टतामाह आढ्योऽभिजनवानिति आढ्यः स्वतपवदृथा
दिसम्पन्नोऽहमस्मि न तु केन न तु केन विधिमिषेन अभिजनवान् कुलीन
श्चाहमेवास्मि नान्यो मया सदृशः अन्यः परः कोऽस्ति न कोऽपीत्यर्थः अ
तोऽहं स्वसामर्थ्येनैव यक्ष्ये यज्ञं करिष्ये दास्ये स्वबलेनैवाहं दानं करिष्ये मो
दिष्ये स्वस्वार्थं स्वरज्जलं भस्वबलेनैव प्राप्य हर्षं प्राप्स्ये यद्वा स्वबलेनैवा
हं यद्यदे दिष्यांगनानां संगतिं करिष्ये दास्यामि तासामथ यादिरवएं
यिष्यामि मोदिष्ये ताभिः सह स्वर्गे हर्षं प्राप्स्यामीत्येवमज्ञानविमोहि
ताः संतस्ते जननरके पतंतीत्युत्तरेण संबंधः १५

मधुसूदनीटीका १०

नत्वधनेन कुलेन वा कश्चित्तत्तुल्यः स्यादित्यत
आह

आढ्यः धनवान् अभिजनवान् कुलीनोऽप्यहमेवास्मि अतः कोऽन्योऽस्ति
मया सदृशो न कोऽपीत्यर्थः यागेन दानेन वा कश्चित्तुल्यः स्यादित्यत
आह यक्ष्ये यागेनाप्यन्यानभिभविष्यामि दास्यामि धनं स्तावकेभ्यो न
टादिभ्यश्च ततश्च मोदिष्ये मोदं हर्षं लप्स्ये नर्तक्यादिभिः सहेत्येवम
ज्ञानेनाविवेकेन मोहिताः विविधमाहभ्रमपरम्परां प्रापिताः ॥ १५ ॥

सदानंदीटीका ११

कश्चिद्धनेनकिंनस्यात्तन्नलोत्रकुलेनवा इत्यत्राहधनीयस्मादहमेव व०
मत्समः १ कुलीनोप्यहमेवास्मिनकश्चिन्मत्समोपरः यागेनवाप्य
दानेनकोप्यस्तीदृङ्मत्समः २ अन्यानभिभविष्यामियागेनाहंतथा
परान् दानेनस्तावकेभ्योहंधनंदास्यामिपुष्कलं ३ हर्षेलब्धेपान
तोहंवैनर्तकादिभिरेवचइत्येवमविवेकेनप्रापितावहुविभ्रमं १५

नीलकंठीटीका १२

आढ्योधनी अभिजनवान्कुलीनः अज्ञानेनअविवेकेनमोहिताः
विविधंभ्रमंप्रापिताः ॥१५॥

आनंदीटीका १३

आढ्योधनवान् अभिजनवान्कुलीनः बंधुपरिवारयुक्तश्च १५

रामकंठीटीका १४

तथाढ्योधनवानभिजनवान्कुलीनोहंकिंबहुना कःपरोमया
तुल्योविद्यते तथा यक्ष्येयज्ञानाचरिष्यामिदास्यामितथामोदिष्ये
हर्षमनुभविष्यामीत्येवंविधेभूतवर्तमानभविष्यत्कालभावि
षुशरीरविषयादिषुनिमित्तभूतेषुविकल्पमनेकंप्रतिदिनं विषमा विष्णुतो
नवान् १५ ॥

लाखिसी [illegible]टीका १५

किंच आढ्योधनादिसम्पन्नः अभिजनवान्कुलीनः किंबहुना कोम
यासदृशोन्योस्तिनकोपीत्यर्थः यक्ष्येयागेन[illegible]अन्याननभिभ
विष्यामि दास्यामिस्तावकेभ्योनटनर्तकादिभ्यश्च ततश्चमो
दिष्येहर्षंप्राप्स्यामीत्येवमज्ञानेनाविवेकेनविमोहितामिथ्या
भिनिवेशंप्रापिताः [illegible] १५ ॥

पंचोलेटीका

अहमाढ्यइति अहमाढ्यःधनेनसंपन्नःअभिजनवान्कुलीनः
सद्वृत्तः श्रोत्रियत्वादिसंपन्नोहमस्मि मयासदृशः अन्यःकोपि

नास्ति अहं यक्ष्ये यज्ञेनापि अन्यान् अभिभविष्यामि नटादिभ्यो
दास्यामि दानं मोदिष्ये अतिशयेन हर्षं प्राप्स्यामि इत्येवम् अज्ञान
विमोहिताः अविवेकभावमापन्नाः १५

रत्नवीरसमिद्धायिनी॥

किंचाढ्य इति आढ्यो धनादिसंपन्नो अभिजनवान् कुलीनो ऽतएव
मया समोऽन्यः कोऽस्ति यक्ष्येऽहमेव यागाद्यनुष्ठानेन महतीं प्रति
ष्ठां प्राप्स्यामीत्यर्थः दास्यामि धनं दानं साकरिष्यामीत्यर्थः इती
ष्टस्तनस्य कर्मणः स्वधर्मस्य फलेन मोदिष्ये स्वर्गवातन्द्भोगेना
नुमोदिष्ये इत्याढ्य बलवत्तरेणापि दर्पदेनाहङ्कृता अज्ञान
विमोहिता उच्यंते इति १५॥

मधुभाष्य

१५॥

भाषा अनुवाद १५

और हम धनी हैं हम अभिजनवान् वर्थात् कुलीन तथा यज्ञ
दान आदि जो कभी किया तो समझते हैं कि हमारी बराबर
और किसीने नहीं किया लोगो मे हम बडी प्रतिष्ठा पावेंगे अ
र्थात् प्रशंसा होगी और जो कोई हमारी स्तुति करेगा उसको
हम धन वस्त्रादि देयंगे औ उसपर प्रसन्न होयगे इस प्रकार
के मनुष्य अज्ञानसे विमोहित मिथ्या अभिनिवेशको प्राप्तक
हैं [illegible]डे मनोरथो मे डूबे है १५ ॥

दोहा

होंधनवान कुलीन हों और को है मोहि समान यज्ञकर देआ
नंद हों मोहित यह अज्ञान १५॥

59

40

अनेकचित्तविभ्रांता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ १६

शांकरभाष्यटीका १

अनेकेति अनेकचित्तविभ्रांता उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रांता अनेकचित्तविभ्रांता मोहजालसमावृताः मोहोऽविवेकोऽज्ञानं तदेव जालमिवावरणात्मकत्वात्तेन समावृताः प्रसक्ताः कामभोगेषु काम्यन्त इति कामाः विषयास्तेषामुपभोगेषु कामभोगेषु तत्रैव निषण्णाः सन्तस्तेनोपचितकल्मषाः पतन्ति नरकेऽशुचौ वैतरण्यादौ १६ ॥

आनंदगिरिकृतटीका २

उक्तप्रकारविपर्ययेण कामाकृष्टविवेकविकलानां किं स्यादित्यपेक्षायामाह अनेकेति कामा विषयास्तेषां भोगेषु तत्प्रयुक्तेषूपभोगेष्विति यावत् १६ ॥

स्वामिकृतटीका ३

एवंभूता यत्प्राप्नुवंति तच्छृणु अनेकेति अनेकेषु मनोरथेषु प्रवृत्तं चित्तमनेकचित्तं तेन विभ्रांता विक्षिप्तास्तेनैव मोहमयेन जालेन समावृताः मत्स्या इव सूत्रमयेन जालेन यंत्रिताः एवं कामभोगेषु प्रसक्ता अभिनिविष्टाः संतः अशुचौ कश्मले नरके पतंति १६ ॥

पिशाचभाष्यटीका ४

अनेकचित्तविभ्रांताः अवस्थिताः जाल इव मोहः कामभोगेषु पतंति निषीदंति १६ ॥

रामानुजभाष्यटीका ५

अनेकेति ईश्वरादिसहकाररहितेस्वेनैवकर्मणा साधयामीति कृत्वा एवंरूपीमेतच्च कुर्याम् अन्यच्च कुर्यामित्यनेकचित्तविभ्रांता अनेकचित्ततया विभ्रांताः एवंरूपेण मोहजालेन समावृताः कामभोगेषु प्रकर्षेण सक्ताः मध्ये मृता अशुचौ नरके पतंति १६ ॥

अभिनवगुप्तटीका ६
स्पष्टार्थं १६ ॥

परमार्थप्रपाटीका ७

किंच अनेकेति अनेकेषु व्यर्थमनोरथेषु प्रवृत्तं चित्तमनेकचित्तं तेन
विशेषेण भ्रान्तास्तेषामुद्धारः कदापि नास्तीत्याह मोहजालसमावृता
इति यथा सूत्रमयजालान्तः प्रविष्टानां मत्स्यानां नाग्रनिर्गमः तथा मोह
जालसमावृतानां कामभोगेषु प्रकर्षेण सक्ताः अशुचौ कश्मलरूपे न
रके पतन्ति अत्रेदमुक्तं भवति न तावद्व्यवहृतिः सर्वा स्वप्नजाग्रदवस्थ
योः एवं स्वावसरे न तस्य यन्मिथ्यात्वं प्रतीयते इत्यादिवेदान्त्यापत्तिषू
क्तयुक्तिभिः स्वाप्नव्यवहारदृष्टान्तेन जाग्रद्व्यवहारस्यापि मिथ्यात्वं दर्शि
तमासीदिदानीं तस्य स्वरूपेणैव मिथ्यात्वं मनोरथरूपत्वेन भगवता वि
स्तरेण प्रकटीकृतं १६ ॥

वनमालीटीका ८

उक्तप्रकारैरनेकैश्चित्तैस्तत्तदुष्टसंकल्पैर्विविधं भ्रान्ताः यतो मोहजाल
समावृताः मोहो हिताहितवस्तुविवेकासामर्थ्यं तदेव जालमावरणा
त्मकत्वेन बन्धहेतुत्वात् तेन समावृताः सर्वतो वेष्टिताः मत्स्या इव सू
त्रमयेन जालेन परवशीकृता इत्यर्थः अत एव स्वानिष्टसाधनेष्वपि का
मभोगेषु प्रसक्ताः सर्वथा तदेकपराः प्रतिक्षणमुपचीयमानकल्म
षाः पतन्ति नरके कुंभीपाकवैतरण्यादौ अशुचौ विण्मूत्रश्लेष्मादिपूर्णे
१६

कसमवैजयंतीटीका ९

किंच अनेकचित्तेति अनेकचित्तविभ्रान्ताः अनेकेषु चिरकालयत्न
साध्येषु पशुपुत्रकलत्रधनादिवस्तुषु पतितं तेन तत्पालनाद्यासक्तं
तेन विभ्रान्ताः विक्षिप्ताः अत एव मोहजालसमावृताः न तु हिताहितेषु यो
मोहो वैचित्त्यं स एव जालं तेन समावृताः मत्स्या इव ततस्ततो भ्रमन्तस्त
तो निर्गन्तुमसमर्था इत्यर्थः कामभोगेषु कामेन स्वेच्छारूपकेन न तु शास्त्र
विहितेन ये भोगास्तेषु प्रसक्ताः अभिनिविष्टाः सन्तो यदि मध्ये मृतास्त
र्हि अशुचौ महारौरवकालसूत्रवैतरण्यादावतिकष्टरूपे नरके निरये

अनेकचित्तविभ्रान्ता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ १६

शांकरभाष्यटीका १

अनेकेति अनेकचित्तविभ्रान्ता उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रान्ता अनेकचित्तविभ्रान्ता मोहजालसमावृताः मोहोऽविवेकोऽज्ञानं तदेव जालमिवावरणात्मकत्वात्तेन समावृताः प्रसक्ताः कामभोगेषु काम्यन्त इति कामाः विषयास्तेषामुपभोगेषु कामभोगेषु तत्रैव निषण्णाः सन्तस्तेनोपचितकल्मषाः पतन्ति नरकेऽशुचौ वैतरण्यादौ १६ ॥

आनंदगिरिकृतटीका २

उक्तप्रकारविपर्ययेण कस्मात्कस्य विवेकविकलानां किं स्यादित्यपेक्षायामाह अनेकेति कामा विषयास्तेषां भोगेषु तत्प्रयुक्तेषूपभोगेष्विति यावत् १६ ॥

स्वामिकृतटीका ३

एवंभूतानां यत्स्यात्तच्छृणु अनेकेति अनेकेषु मनोरथेषु प्रवृत्तं चित्तमनेकचित्तं तेन विभ्रान्ता विक्षिप्तास्तेनैव मोहमयेन जालेन समावृताः मत्स्या इव सूत्रमयेन जालेन यन्त्रिताः एवं कामभोगेषु प्रसक्ता अभिनिविष्टाः सन्तः अशुचौ कश्मले नरके पतन्ति १६ ॥

पिशाचभाष्यटीका ४

अनेकचित्तविभ्रान्ताः अवस्थिताः जाल इव मोहः कामभोगेषु पतन्ति निषीदन्ति १६ ॥

रामानुजभाष्यटीका ५

अनेकेति अदृष्टेश्वरादिसहकारमृते स्वेनैव कर्त्रा शक्यमिति कृत्वा एवं कुर्यामन्यच्च कुर्यामित्यज्ञानेनकचित्तविभ्रान्ता अनेकचित्ततया विभ्रान्ताः एवंरूपेण मोहजालेन समावृताः कामभोगेषु प्रकर्षेण सक्ताः मध्ये मृता अशुचौ नरके पतन्ति १६ ॥

श्री·
गी·टी·
षो·

60

अभिनवगुप्तटीका ६

स्पष्टार्थं १६ ॥

परमार्थप्रपाटीका ७

किंच अनेकेति अनेकेषु अर्थमनोरथेषु प्रवृत्तं चित्तमनेकचित्तं तेन
विभ्रान्ता भ्रान्तास्तेषामुद्धारः कदापि नास्तीत्याह मोहजालसमावृता
इति यथा सूत्रमयजालान्तः प्रविष्टानां मत्स्यानां नास्ति निर्गमः तथा मोह
जालसमावृतानां कामभोगेषु प्रकर्षेण सक्ताः अशुचौ कल्मषरूपे न
रके पतन्ति अत्रैतदुक्तं भवति तत्त्वाव्यवस्थितेः सर्वास्वप्यज्ञावस्था
याः एवं स्वावसरे तस्य तन्मिथ्यात्वं प्रतीयते इत्यादिवत्तथापि तेषु
कुश्रुतिभिः स्वामव्यवहारे दृष्टान्तेन ज्ञाप्यव्यवहारस्यापि मिथ्यात्वं दर्शि
तमासीदिदानीं तस्य स्वरूपेणैव मिथ्यात्वं मनोरथरूपत्वेन भगवतापि वि
स्तरेण प्रकटीकृते १६ ॥

वनमालीटीका ८

उक्तप्रकारैरनेकैश्चित्तैस्तत्तदिष्टसंकल्पैर्विविधं भ्रान्ताः यतो मोहजाल
समावृताः मोहो हिताहितवस्तुविवेकासामर्थ्यं तदेव जालमावरणा
त्मकत्वेन बन्धहेतुत्वात् तेन समन्तादावृताः सर्वतो वेष्टिताः मत्स्या इव सू
त्रमयेन जालेन परवशीकृता इत्यर्थः अत एव स्वानिष्टसाधनेष्वपि का
मभोगेषु प्रसक्ताः सर्वथा तदेकपराः प्रतिक्षणमुपचीयमानकल्म
षाः पतन्ति नरके कुम्भीपाकवैतरण्यादौ अशुचौ विण्मूत्रश्लेष्मादिपूर्णे
१६

हंसमवैजयन्तीटीका ९

किंच अनेकचित्तेति अनेकचित्तविभ्रान्ताः अनेकेषु चिरकालयत्न
साध्येषु पशुपुत्रकलत्रधनादिषु वस्तुषु पतितं तत्तन्मूलतया घासक्तं
तेन विभ्रान्ताः विक्षिप्ताः अत एव मोहजालसमावृताः तत्तद्विषयेषु यो
मोहो वैचित्र्यं स एव जालं तेन समावृताः मत्स्या इव ततस्ततो भ्रमन्तस्त
तो निर्गन्तुमसमर्था इत्यर्थः कामभोगेषु कामेन स्वेच्छारूपेण तत्तच्छास्त्र
विहितेन ये भोगास्तेषु प्रसक्ताः अभिनिविष्टाः सन्तो यदि मध्ये मृतास्त
र्हि अशुचौ महारौरवकालसूत्रवैतरण्यादावतिकष्टरूपे नरके निरये

पतंति नरक इत्यनेनैवाशुचित्वे सिद्धेपि पुनरशुचिग्रहणस्यायमा
शयः मर्त्या इष्टा ब्रह्मादीनां सत्यादिमहर्लोकांतवासिनां इष्टा
स्वर्गेंद्रादिलोकस्तु इष्टा मनुष्यलोकस्तु इष्टा स्वर्गकरादिया
निरिष्टमेवं सर्वं सर्वेन उभरोगेनैषां लोकानां अनाधिककष्टत्वेन न
रकत्वे सिद्धे अशुचित्वे नास्ति यत्तत्तु तारतम्येनोभयपि सत्वेऽ:
त्वेत्तः वैतरण्यादिषु तत्केवलदुःखभुजपवनतत्सर्वगंधलेशो
पीति १६

मधुसूदनीटीका १०

उक्तप्रकारैरनेकैः चित्तैस्तत्तदुष्टसंकल्पैर्विविधं भ्रांताः यतो
मोहजालसमावृताः मोहो हिताहितवस्तुविवेकासामर्थ्यं त
देव जालमावरणात्मकत्वेन बंधहेतुत्वात् तेन समावृताः
सर्वतो वेष्टिताः मत्स्या इव सूत्रमयेन जालेन परवशीकृता इ
त्यर्थः अतएव तानि दुष्टसाधनेष्वपि कामभोगेषु प्रसक्ताः स
र्वथा तदेकपराः प्रतिक्षणमुपचीयमानकल्मषाः पतंति नरके
वैतरण्यादावशुचौ विण्मूत्रश्लेष्मादिपूर्णे [illegible]
[illegible]
[illegible] १६ ॥

सदानंदीटीका ११

तत्तैर्दुष्टैकसंकल्पैरनेकैः मात्रादीतिनैः कामिनो विविधं भ्रांता
मोहजालेन वेष्टिताः १ मत्स्या इव हिंसेनेण जालेन विवशीकृ
ताः तानि दुष्टसाधनेष्वेव कामभोगेषु तत्पराः प्रतिक्षणं वर्द्धमान
कल्मषा नरकेऽशुचौ २ पतंति श्लेष्मविण्मूत्रपूर्णे वैतरणीमु
खे ४ १६ ॥

नीलकंठीटीका १२

अनेकं नास्ति एकं चिंतनीयं यस्य तत् अनेकं बहुषु विषयेषु सर्वे
केषु लग्नं चित्तं येषां ते अनेकचित्तास्ते च ते विभ्रांताश्च किमिदमा
दौ साधनीयमिति विशेषेण भ्रांताः आकुलाः अनेकचित्तविभ्रांताः
मोहः असत्स्वपि सद्बुद्धिस्तदेव जालं तेन समावृताः प्रसक्ताः
प्रकर्षेण लग्नाः अशुचौ विण्मूत्रादिमये १६ ॥

श्री॰
गी॰ टी॰
षो॰

61

आनंदीटीका १६

अशुचावत्यंतामेध्येनिरयेनरकेगर्भवासेच १६ ॥

रामकंठीटीका १४

बहुविधमनेकरूपंचित्तंयेषांते तथातएवविभ्रांतास्तत्वावगमाभावाद्विशेषेणभ्रांताअनवस्थिताः यतोमोहस्यैवनमोरूपस्याज्ञानस्यवशंगताः तस्मात्तेअप्रामास्ततस्त्रकामानां शब्दादिसुखानांभोगेष्वनुभवेप्रसक्ताअत्यंतपरत्वरूपेणप्रकर्षेणसक्तानिमग्नचित्ताः [illegible] । १६ ॥

लासिकी [illegible]टीका १५

किंच अनेकैरुक्तप्रकारैश्चित्तैर्दुष्टसंकल्पैर्विशेषेणभ्रांताअनवस्थिताविक्षिप्ताः मोहः अविवेकएवजालमानायस्तेनसमवगाहनामनस्याइवनियंत्रिताः तथाविषभोगेएवप्रकर्षेणसक्तालीनचित्ताः एवंविधाउक्तलक्षणाः पुरुषा अशुचौविण्मूत्रपुरीषादिपूर्णेनरकेवैतारण्यादौपतंत्यवपश्यं निमज्जंति [illegible] ॥ १६ ॥

पंचोलेटीका

एवंभूतायत्प्राप्नुवंतितदाह अनेकेति अनेकचित्तविभ्रांताः पूर्वोक्तप्रकारैरनेकथाचित्तसंकल्पैः विविधंभ्रांतामोहजालसमावृताः मोहोऽविवेकः अज्ञानेनदेवाऽऽवरणात्मकत्वात् जालमिवजालंतेनसमावृताः कामभोगेषुप्रसक्तास्तैर्वासक्तास्तेनवहुसंचितकल्मषा अशुचौवैतरण्यादौनरकेपतंतिनरकेनिवासोभवति १६

रणवीरसमिद्धोधिनी ॥

इत्येवंरूपेष्वनेकेषुमनोरथेषुचित्तंप्रवृत्तंयेषांतेनेकचित्ता अ

तएव विभ्रांताविक्षिप्तबुद्धयो मोहजालसमावृता मोहो ममता लक्षण सएवजालंबंधनंतेनसमावृतास्तदंतर्गता अतएवच कामोपभोगेषुप्रसक्ता आविष्टांतःकरणा एतादृशास्सन्तस्ते फलमाह पतंतिनरकेऽशुचाविति अशुचौपापरूपेनरके पतंतीत्यर्थः १६॥

मधुभाष्य

१६

भाषा अनुवाद १६

ऐसे मनुष्य जिस प्रकार का फल पावते हैं सो सुनो कि अनेक चित्त करके मनकी लाषा अभिलाषा मे प्रवृत्त जो चित्त तिससे विक्षेप को प्राप्त ये लोग सोई सोई मोहमय जाल से घेरे हुये अर्थात् सूतके जालसे वद्ध मत्स्य के समान वन्धे हैं और काम भोग मे आसक्त होके अशुचि जो क्लेशयुक्त नरक तिसमे हीं पड़ते हैं । १६ ॥

दोहा

बहुत चित्त विभ्रांत हि मोह जाल युत होय काम भोग में सक्त है अशुचि नरक परैं सोय १६ ॥

आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः
यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकं १७ ॥

शांकरभाष्यटीका १

आत्मेति आत्मसंभाविताः सर्वगुणविशिष्टतयात्मनैवात्मनि संभा
विताः आत्मसंभाविताः नसाधुभिः स्तब्धा अप्रणतात्मानो धनमा
नमदान्विता धननिमित्तो मानो मदश्च ताभ्यां धनमानमदाभ्यामन्वि
ता यजन्ते नामयज्ञैर्नाममात्रैर्यज्ञैस्तेदंभेन धर्मध्वजितया अविधि
पूर्वकं विहिताङ्गेतिकर्तव्यतारहितैः १७ ॥

आनंदगिरिकृतटीका २

ननु तेषामपि केषांचिद्वैदिके कर्मणि यागदानादौ प्रवृत्तिप्रतीते
रयुक्तं वैतरण्यादौ पतनमिति चेत्तत्राह आत्मेति आसुरीं संपद
मभिजातैरधर्मज्ञानमेव संचीयते प्रवृत्तैरपि वैदिके कर्मणि
नैवगुणपमित्युक्तं १७ ॥

स्वामिकृतटीका ३

यद्येरतिचयस्तेषांमनोरथउक्तः सकेवलंदंभाहंकारादिप्रधानएव
नतुसात्त्विकइत्यभिप्रायेणाह आत्मसंभाविताइतिद्वाभ्यां आत्मनै
वसंभाविताः पूज्यतांनीता नतुसाधुभिः केश्चित्तएवस्तब्धा अन
म्राधनेनयोमानस्तमदस्ताभ्यामन्विताः सन्तः ते नाममात्रेणयेय
ज्ञास्तेनामयज्ञाः यद्वा दीक्षितःसोमयाजीत्येवमादिनाममात्रप्रसिद्ध
येयेयज्ञास्तैर्यजंतेकथंदंभेननतुश्रद्धयाविधिपूर्वकंचयथाभवति
तथा १७ ॥

पिशाचभाष्यटीका ४

आत्मनासंभाविताः पूजितास्तब्धाः गुरुदेवतेभ्यप्रणताः धननिमि
त्तोमानोधनमानस्तन्मदश्चधनमानमदौताभ्यामन्विताः यजंते पूजयं
तिनामयज्ञैः नामप्रधानायज्ञाः दंभोनधार्मिकत्वख्यापनेन अविधि
पूर्वकं १७ ॥

रामानुजभाष्यटीका ५

आत्मेति आत्मनैवसंभाविताः आत्मनैवात्मानंसंभावयंतीत्यर्थः
स्तब्धाः परिपूर्णंमन्याः नकिंचित्कुर्वाणाः कथंधनमानमदान्विताः

श्री· गी·टी· षो·

धनेन विद्याभिजनाभिमानेन च जनितमदान्विताः नामयज्ञैर्नाममप्र
योजनैर्यजन्ते यजनेन तदपि दंभेन यष्टृत्वख्यापनाय अविधिपूर्वकं अय
थोदितं यजन्ते ~~नचेदृक्कर्मफलायजनस्यात्~~ १७ ॥

अभिनवगुप्तटीका ६

स्पष्टार्थं १७ ॥

परमार्थप्रपाटी ७

अत्र मनोरथद्वयं संभावितोऽसंभावितश्च तत्र दैनंदिनान्नपानादिवि
षयभोगमनोरथः संभावितः सोऽपि दैवाधीनत्वात्तात्विकः असंभावि
तस्तु राज्यप्राप्त्यादिसकलभोगैर्मनोरंजनं एवमसन्मिथ्याभूतं च ॥
जानंतोऽपि मनोरथापरंपरामातन्वंति तेषामुद्धारः कदापि नास्तीत्यर्थः
तदुक्तं टिप्पणिकासु स्वाप्नसुखैः स्वमसन्मेव तथापि तस्यानुभव त्य^
स्तदानीं तथैव स्मृत्कौ रंजनं तस्मिन्मिथ्यामनोरथे त्वनेन विनानुभूतिं स
वेनत्वनुभूतामखिलापि स्यान्मनोरथमयो व्यवहारः युक्तितस्त्वनु
भवादनेवलेनस्पष्टमात्मदितं मनिवर्यैः स्त्रैववपतिकल्पितैरपि सैष
वसंभावितैर्मनोरथशतैः करोत्यनुदिनं मनोरंजनं तिजात्तविक
नार्थतां वद्विति तावतैवास्यधीः कथं तु परिवर्णितेन तनुभूतांम
होमूढतेति विस्मृतात्मसौभयो व्यानं मनोरथानां न समाप्तिर १
स्तिवर्षायुतैरप्यथ ॥ वापि लवैः । इतीश्वरोऽहमित्युक्तनेवानामुद्भव
यः संति मनोरथानां पश्चागतायैवतिनश्यजाताः दोषैश्च संयोग
मिताः प्रसक्ताः हृष्टाः स्वतास्तनत्त्ययमस्तितिदशंषुनर्वीक्ष्यतिमेतरा
त्मयज्ञैवतोऽनेव मनोरथानामेतोऽस्ति विज्ञातमिदं मया घमनोरथा
सक्तिपरस्य चित्तेनजायते वै परमार्थसंगतिः किंच आत्मनासैनेवसं
भाविताः पूज्यतां नीताः नान्यैः कैश्चित् तावैनेवस्तब्धा अनम्रधनमा
नाभ्यामदोगर्वस्तेनान्विताः संतो दंभेन यत्तेर्यजंते न तु परमार्थबुद्ध्या ॥
तथापि यत्तफलं प्राप्स्यामेवेति चेत्तत्राह अविधिपूर्वकमिति इद्धया
ज्ञाय शुद्धिरविधिस्तत्पूर्वकं कर्म फलाय न भवतीत्यर्थः १७ ॥

वनमालीटीका ८

ननु तेषामपि किंचिद्विद्यागदानादौ प्रवृत्तिदर्शनात्कथं सर्वथा नरकपात

स्तदाह आत्मेति सर्वगुणविशिष्टा वयमित्यात्मनैव संभाविताः पू-
ज्यतां प्रापिता न तु साधुभिः स्तब्धा अप्रणयिनो धनमानमदान्विताः
धननिमित्तो यो मान आत्मन्यतिशयत्वधीरूपस्तन्निमित्तश्च यो म-
दः परस्मिन्गुर्वादावप्यनम्रत्वाभिमानस्ताभ्यामन्विताः ते नाम यज्ञै-
र्नाममात्रयज्ञैर्न तात्विकैः दीक्षितः सोमयाजीत्यादिनामसंपादकैर्वा
यज्ञैरविधिपूर्वकम् विहितकर्तव्यतारहितैर्दंभेन धर्मध्वजितया न
तु श्रद्धया यजन्ते न तु तत्फलभाजो न भवंतीत्यर्थः १७ ॥

गसमवैजयंतीटीका ९

एवं तेषां दुष्टाचरणेन नरकप्राप्तिमुक्त्वेदानीमशास्त्रीयं यज्ञप्रका-
रमाह आत्मेति आत्मसंभाविताः आत्मनैवात्मानं संभावयंति श्ला-
घंते न तु शास्त्रैः सज्जनैः धनस्तब्धाः अनम्राः सकृतहृत्यमन्वानाः
किंचिदपि कर्माकुर्वाणा इत्यर्थः तदेव कुतो यतो धनमानमदान्विता
यतेन संपदा मानेन च श्रीमत्पादो महाशयो विस्तरमहत्स्तोमहाश्र-
मणो महाराक इत्याद्याय स्येवं लालनेन सत्कारेण यो मदो गर्वस्तेना-
न्विताः युक्ताः अतस्ते जना नाम यज्ञैरयं यजतीति नाममात्रप्रयोजनैर्यज्ञैः
दृष्टाविधिभिः स्वकल्पिताः पारशनार्थीहंतादिदेवताः दंभेन धर्म-
ध्वजितयाऽविधिना विधिपूर्वकमशास्त्रविहितं यथा भवति तथा यजं-
ते स्वयं विरक्तवेषाः संतः स्वसेवकानां गृहिणामभ्युदयाय पूजयं-
तीत्यर्थः १७ ॥

+ नत्रतेषामपि केषांचिद्वैदिके कर्मणि यागहन्तादोषप्रह-
निदर्शनादप्युक्तं नरके पतनमित्याह ॥

मधुसूदनीटीका १०

+ सर्वगुणविशिष्टा वयमित्यात्मनैव संभाविताः पूज्यतां प्रापिता न तु
साधुभिः कैश्चित् स्तब्धा अनम्रा यतो धनमानमदान्विताः धननि-
मित्तो यो मान आत्मनि पूज्यत्वातिशयाध्यासः तन्निमित्तो यो मदः पर-
स्मिन्गुर्वादावप्यपूज्यत्वाभिमानस्ताभ्यामन्विताः ते नाम यज्ञैर्नाममा-
त्रैर्यज्ञैर्न तात्विकैर्दीक्षितः सोमयाजीत्यादिनाममात्रसंपादकैर्वा यज्ञै-
रविधिपूर्वकं विहितांगेतिकर्तव्यतारहितैः दंभेन धर्मध्वजितया न
तु श्रद्धया यजंते अतस्तत्फलभाजो न भवंतीत्यर्थः

[illegible] १७ ॥

सदानंदटीका ११

तेषामपि हि केषांचिद्दे दिकेषु शुभकर्मणि प्रवृत्तिर्यागदानादौ दृश्यते तेन न साधनं १ नरके पतनं तेषामित्याशंकाहृ तत्रच सर्वगुणैर्विशिष्टाः स्मो वयमित्यात्मनैव ते २ पूज्यतां प्रापिताः न पुनः केश्चित्साधुभिः अनम्राः धनहेतवो मानस्तद्धेतुकोमदः ३ तेनान्विताम ऐर्वनीमममात्रैस्तु कांगवर्जितैः धर्मध्वजितया मूढा यजंते ते श्रद्धया न तु अतो न फलभाजस्ते यागैरविधिपूर्वकैः किं तं सत्तिमाजस्ते क्रूराः क्रूरविचेष्टिताः १७ ॥

नीलकंठटीका १२

आत्मनैवात्मानं महांतं मन्यंते ते आत्मसंभाविताः स्तब्धाः अप्रणताः धननिमित्तो मानो गर्वो मदश्च ताभ्यामन्विताः धनमानमदान्विताः नामयज्ञैर्नाममात्रैर्यज्ञैः दंभेन धर्मध्वजितया अविधिपूर्वकं यथोक्तधनज्ञानं स्वयमत्विक्पत्न्यादिविधिरहितं यजंते ॥ १७ ॥

आनंदटीका १३

आत्मसंभाविताः अस्माभिर्यदुक्तं तदेव प्रमाणमित्यहंकारिणः अनपवस्तब्धा परस्मिन्पदे इति न प्रणताः यजंते नाम नामैव लीकार्थमव्ययं यज्ञैर्यद्यपि दंभेनात्मप्रतिष्ठार्थं यजंते तथाप्यविधिपूर्वकं यजंते परमेश्वरबुद्ध्याने त्यर्थः १७ ॥

रामकंटीका १४

किंच ते पूर्वोक्तविशेषणा रजस्तमःप्रधानाः आसुरसर्गभाजो जनाः यजंते नामयज्ञैः लीकपर्यायः तेनालीकमेव निष्फलमेव यजंते यागक्रियामनुतिष्ठंतीत्यर्थः अतो निष्फलत्वमेव यत एवंविधाः संतो दंभेनोक्तलक्षणेन शास्त्रोक्तं विधिं परित्यज्य यजंते किंविधाः संत आत्मसंभाविताः ~~आत्मसंभाविताः~~ आत्मनैव स्वयमेव संभाविता

+ ननुयद्येवंतेषांयजनपरत्वात्कथंनरकेपतनमित्याशंक्याह ॥

वयमेवंविधगुणविशिष्टा इति गृहीताभिमानानतुगुणदोष
विचारनिपुणेनपरेणकेनचित्संभाविताः १७ ॥

लास्तिकी ~~[illegible]~~नीटीका १५

+ तेपूर्वोक्तविशेषणारजस्तमःप्रधानासुरसर्गभाजोजनायजंते
नाम नामशब्दोलीकपर्यायः यज्ञैरलीकमेवनिष्फलमेवय
जंतेयागक्रियामनुतिष्ठंतीत्यर्थः अथवानामयज्ञैर्नाममात्रे
णयोयज्ञस्तैः यथादीक्षितःसोमयाजीत्येवमादिनाममात्रसि
द्धयेयेयज्ञास्तैर्यजंते किंविधाःसंतःआत्मसंभाविताः आत्म
नैवस्वयमेवनतुकैश्चित्साधुभिःसंभाविता वयंसर्वगुणविशि
ष्टाइत्येवंपूज्यतांप्राप्ताः तथास्तब्धाःप्रणामविषयेऽनम्राः
यतोधननिमित्ताभ्यांमानमदाभ्यामन्विताः अविधिपूर्वकंवि
हितेकर्तव्यतारहितम् दम्भेनधर्मध्वजितयानतुश्रद्धयायजंते
अविधिपूर्वकत्वमेवप्रपंचयति १७ ॥

पंचोलेटीका

यस्त इति यस्तेषामभिमानउक्तः सकेवलंदंभाहंकारादिप्रधान
एवेति अभिनयेनाह आत्मेति द्वाभ्यां आत्मसंभाविताः सर्वगु
णविशिष्टतया आत्मनःएवसंभाविताः स्तब्धाअप्रणतात्मानः
धनमानमदान्विताः धनजनितोमानःमदस्ताभ्यांअन्विताः
तेदंभेनधर्मध्वजितया अविधिपूर्वकंनामयज्ञैः नाममात्रैर्यागै
नापूर्वकैर्यजंते १७ ॥

रणवीरसमिद्बोधिनी ॥

आत्मेति आत्मसंभाविता आत्मनैवस्वयमेवस्वस्मिन्संभाविताः
पूज्यावयमिति संभावनावंतो नपरैः स्तब्धा अनम्राधनमानम

दान्विता धननिमित्तो योमानो मदश्चताभ्यामन्विताःसंतो ना
मयज्ञैर्नाममात्रेण नतुतउपासनया येयज्ञाः प्रातिष्ठितास्तै
र्निमित्तभूतैः केवलंतु दंभेन धर्मध्वजितया नतुश्रद्धयातत एवा
विधिपूर्वकंयजंते इतिधर्मध्वजिनः संभाव्यंते इतिभावः १७

मधुभाष्य

१७

66

यज्ञ करिके औरोंसे हम बड़ी प्रतिष्ठा पावें ऐसे जो उनके मनो
रथ जो पीछे पंद्रहे श्लोकमे कहा है वह अभिलाष केवल दंभ
अहंकार आदि प्रधान है सतोगुण प्रधान नहीं है इस अभिप्रा
य पर दो श्लोक से कहते हैं कि आप अपने मनसे सम्भावित
कहे महात्मा बने हैं पर कोई साधु उनकी प्रतिष्ठा नहीं कर
ते हैं इसीसे वे शठ अर्थात् अनम्र स्वभाव कहे कठोरचित्त
मनुष्य धनादि से जो मान औ अहंकार तिससे युक्त होके य
ज्ञ दान आदि का तो केवल नाममात्रही है पर करते हैं इस वा
स्ते कि फलाना आदमी बड़ा यज्ञ करने वाला औ दानी है
ऐसे नाम प्रसिद्ध होय इस वासना से यज्ञ दान करते हैं व
ह यज्ञ करना कैसा है सो कहते हैं कि वे खाली अपनी अप
नी ख्याति लाभ के लिये छोड़ और कुछ श्रद्धा से नहीं कर
ते हैं तो अविधि पूर्वक यज्ञ दान जैसे है यह भी तैसे ही
निष्फल है यह जानो ।१७॥

दोहा

निज बड़ माने अनम्र हे धन मान मद सोंहि नामयज्ञसें यज
नसो दंभ अविधि करमोंहि १७॥

अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः
मामात्मपरदेहेषुप्रद्विषंतोभ्यसूयकाः

१८ शांकरभाष्यटीका १

अहमिति। अहंकारमहंकरणमहंकारः विद्यमानैरविद्य
मानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानमहमिति मन्य
ते सोहंकारोविद्याख्यः कष्टतमः सर्वदोषाणां मूलं सर्वानर्थ
प्रवृत्तीनांच मूलत्वे परिगृह्य तथा बलं पराभिभवनिमित्तं
कामरागान्वितं दर्पं दर्पोनाम यस्योद्भवे धर्ममति क्रामती
ति सोयमंतःकरणाश्रयोदोषविशेषः कामं स्त्र्यादिविषयं
क्रोधमनिष्टविषयं एतानन्यांश्च महतोदोषान् संश्रिताः किं
च ते मामीश्वरं आत्मपरदेहेषु स्वदेहे परदेहेषु च तद्बुद्धिकर्म
साक्षीभूतं मां प्रद्विषन्तोमच्छासनातिवर्तित्वं प्रद्वेषस्तं कुर्वन्तो
भ्यसूयकाः सन्मार्गस्थानां ~~सन्मार्गस्थानां~~ गुणेषु असहमानाः

१८ आनंदगिरिटीका २

ब्रह्मज्ञानात् पुनरासुरा दूरादेवोद्विजन्त इत्याह अहंकारमिति अ
हंकारमेव स्फोरयति विद्यमानैरिति अध्यारोपितवैशिष्ट्यविषय
का त्वादहंकारस्याविद्यामूलत्वेनाविद्यात्मत्वमाह अविद्याख्य इति विवेकि
भिस्त्याज्यत्वादेव हेयत्वं सूचयति कष्टतम इति तदेव स्पष्टय
ति सर्वेति तं संश्रिता इति संबंधः। कार्यकारणसामर्थ्यमकावि
शेषणं बलं अहंकार एव महदवधीरणापर्यंतत्वेन परिणतो द
र्पस्तं व्याकरोति दर्पोनामेत्यादिना। अन्यांश्च दोषान्मात्सर्या
दीन् केवलं ऊक्तमेव तेषां विशेषणं किंतु कष्टतममस्ति वि
शेषणांतर मित्याह किंचेति। यद्यपीश्वरंप्रति द्वेषस्तेषां संभाव्य
ते तथापि कथं स्वदेहे परदेहेषु च तं प्रति द्वेषः नहि तत्र भोक्ता
रमंतरेणेश्वरस्यावस्थानमित्याशंक्याह तद्बुद्धीति। तेषामीश्वरं

प्रति द्वेषमेव प्रकटयति मच्छासनेति ईश्वरस्य शासनं श्रुतिस्मृति
रूपं तदतिवर्तितं तदुक्तार्थज्ञानानुष्ठानपराङ्मुखत्वं १८ ॥

स्वामिकृतटीका ३ ॥

अविधिपूर्वकत्वमेव प्रपंचयति अहंकारमिति अहंकारादीन् संश्रिताः
सन्तः आत्मपरदेहेषु स्वदेहेषु परदेहेषु च विद्वेषेण स्थितं मां प्रद्विषन्तो य
जन्ते दम्भयज्ञेषु श्रद्धाया अभावात् आत्मनो हि द्वेष एव पीडा भवति तथा
पश्वादीनामपि श्रुतिविहितायां हिंसायां चैतन्यद्रोहमात्रमेवावशिष्यत इ
ति प्रद्विषन्त इत्युक्तं अभ्यसूयकाः सन्मार्गवर्तिनां गुणेषु दोषारोपकाः
१८

पिशाचभाष्यटीका ४

अविद्यमानैरपि गुणैरात्मन्यारोपितैरपि अहं गुणवानिति प्रतिप
त्तिरहंकारस्तमाश्रित्य मामीश्वरमात्मपरदेहेष्ववस्थितं प्रद्विषन्त
असहमानाः अभ्यसूयमानाः अभ्यसूयकाः आत्मपरदेहेष्वव
स्थितं ईश्वरेऽप्यसत्वान् गुणदोषानाविष्कुर्वन्ति १८ ॥

नैवेद्यं भूताय जंते भूत्वाहं

रामानुजभाष्यटीका ५

अहमिति अनन्यापेक्षोऽहमेव सर्वं करोमीत्येवंरूपमहंकारमाश्रि
ताः तथा सर्वस्य करणे मद्बलमेव पर्याप्तमिति च बलं अतो मत्सदृशो
न कश्चिदस्तीति दर्पं च संश्रिताः एवंभूतस्य मम कामसमात्रेण स
र्वं संपत्स्यत इति कामं ममये निष्टकरास्तान् सर्वान् हनिष्यामीति च
क्रोधं एवमेतान् संश्रिताः स्वदेहेषु परदेहेषु चावस्थितं सर्वस्य कार
यितारं पुरुषोत्तमं मां अभ्यसूयकाः द्विषन्तः कूटयुक्तिभिः मत्स्थि
तेदोषमाविष्कुर्वन्तो मामसहमानाः अहंकारादिकान् संश्रितायाया
गादिकं सर्वं क्रियाजातं कुर्वत इत्यर्थः १८ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं १८ ॥

परमार्थप्रपाटीका ७

तदेव प्रपंचयति अहंकारमिति अहंकारादीन् संश्रिताः आत्मपर
देहेषु विद्वेषात्मत्वेनावस्थितं मां प्रद्विषन्तः अविधिपूर्वकं यजंतोऽस्यैव

स्वदेहे क्लेशं पतिपक्षादिहिंसयापरदेहे अतएवोभयत्रमामेव
द्विषंतः अभ्यसूयकाः सन्मार्गवर्तिनां गुणदोषारोपकाः [illegible]
[illegible] ॥

वनमालीटीका ८

यद्देहस्वामीत्यादिसंकल्पेनदंभाहंकारादिप्राधान्येनप्रवृत्ताना
मसुराणांवहिरंगसाधनमपियागदानादिकंकर्मनसिध्यति अंतरं
गसाधनंतत्त्वज्ञानवैराग्यभगवद्भजनादिकंतेषांदूरापास्तमित्याह
अहमभिमानरूपोयोहंकारः ससर्वसाधारणः स्वस्यमहत्त्वाभिमा
नमहंकारंतथावलंपरपरिभवनिमित्तदेहसामर्थ्यं दर्पंपरावज्ञा
रूपंगुर्वाद्यतिक्रमहेतुंचित्तदोषविशेषं काममिष्टविषयाभिला
षंक्रोधमनिष्टविषयद्वेषमव मोक्षमहत्तादोषान्संश्रिताः एता
दृशाअपिपतितानाल्पभक्त्यामुक्ताभविष्यंतीतिचेत्तत्राह मामीश्व
रमात्मनं स्वस्यदेहेशेषभार्यापुत्रादीनांदेहेंतर्यामितयास्थितंप्र
कर्षेणाद्विषः द्वेषप्रकाशयंतिच यदीश्वरः सर्वप्रेरकः सर्वंकारयति
चेत्तर्हीदानींक्रियामस्मदीयाणांमामपिकारयतु अस्मदीयाणांमानिवारय
तुयदिफलंप्रयच्छतितर्हिकर्मविनाप्रयच्छतु अस्मत्तस्थितंतंनतुकार
यतिअर्वंतंचनतुनिवारयतिकर्मविनाचफलंनप्रयच्छतीति नास्त्ये
वेश्वरः पुनः श्रुतिस्मृतिरूपमदनुशासनानिप्रवर्तनंचमहद्वेषः
तपातालेचनमेवहितमद्वेषरतिप्रसिद्धंलोके नन्वगर्वादयस्ता
नजनतोनानुशासंति तत्राह अभ्यसूयकाः गुर्वादीनामसन्मार्गान
वर्तिनांकारुण्यादिगुणेषुप्रतारणादिदोषारोपकाः अतस्तमद्व
त्तानान्सर्वसाधनत्वप्रसन्नत्वाच्च नरकप्रपतंतीत्यर्थः अतोभगवती
येद्वेषाद्भक्त्यापूतन्तास्तेषामितिभावः १८ ॥

क्रमवैजयन्तीटीका ९

सर्वथानेसर्वशास्त्रप्रतिपाद्यमममशास्त्रस्यचदोषंनिंदांचकुर्वं
तामेषांकावार्तेत्याह अहंकारमिति अहंकारमहमेवस्वतंत्रोऽन्यो
तारस्तिनः सर्वकर्तृत्वमहमेवपवलंसर्वत्रसर्वकरणेमत्तोम
र्थमेवास्तिनास्मत्तोऽन्यःपरंदर्पमतत्त्वः पराक्रमीकोपिनास्तीति

+ यक्ष्ये दास्यामीत्यादिसंकल्पेन दंभाहंकारादिप्रधानेन प्रवृत्तानामासुराणां बहिरंगसाधनमपि यागदानादिकं कर्म न सिद्ध्यति अंतरंगसाधनं तत्त्वज्ञानवैराग्यभगवद्भजनादि तेषां दूरापास्तमेवेत्याह ॥

रूपकं कामं मदिच्छामात्रेणैव सर्वमिदं वस्तु संपद्यतामित्येवंरूपं क्रोधमहमेवमत्यनीचानहं निष्पादयामीत्याकारकमेतानहंकारादीन् संश्रितास्तद्युक्ताः संतस्ते आत्मपरदेहेषु स्वस्य परेषां च देहेषु शरीरेंद्रियादिष्वात्मतया तिष्ठंतं तत्तया भर्तृतया चावस्थितं सर्वेश्वरेश्वर सर्वकारणपुरुषोत्तमं मां च शास्त्रान्मद्विषयकैहिकामुष्मिकफलसाधनप्रतिपादकं शास्त्रं प्रति द्विषंतो वक्तृतयाऽपकुर्वंतो भवंति तथाऽभ्यसूयकाः सर्वेश्वरस्य मम सर्वशास्त्रस्य च गुणेषु कूटयुक्तिभिर्दोषानारोपयंतः १८ ॥

मधुसूदनीटीका ५ ॥

स + अहममभिमानरूपो योऽहंकारः सर्वसाधारणः एतैस्त्वराधितैर्गुणैरात्मनो महत्त्वाभिमानमहंकारं तथा बलं परपरिभवनिमित्तं शारीरगतसामर्थ्यविशेषं दर्पं परावधीरणारूपं गुरुन्यायातिक्रमकारणं चित्तदोषविशेषं काममभिष्टविषयाभिलाषं क्रोधमनिष्टविषयद्वेषं च कारणांतरगुणाः सहितस्तु तेन रूपं मात्सर्यमेवमन्यांश्च महतो दोषान्संश्रिताः एतादृशा अपि पतितास्तभक्त्यापूताः संतो नरके न पतिष्यंतीति चेन्नेत्याह मामीश्वरं भगवंतमात्मपरदेहेषु आत्मनो तेषामासुराणां परेषां च तत्पुत्रभार्यादीनां देहेषु प्रेमास्पदेषु तत्तद्बुद्धिकर्मसाक्षितया संतमपि प्रेमास्पदमपि दैवपरिपाकात्प्रद्विषंतः ईश्वरस्य मम शासनं श्रुतिस्मृतिरूपं तदुल्लंघ्यानुष्ठानपराङ्मुखतया तदतिक्रमणमेव प्रद्वेषः तेऽजवेतः स्पार्थस्ता लंघनमेव हि तत्प्रद्वेष इति प्रसिद्धं लोके ननु गुर्वादयः कथं ताभ्यां तु शासति तत्राहाभ्यसूयकाः गुर्वादीनां वैदिकमार्गस्थानां कारुण्यादिगुणेषु प्रतारणादिदोषारोपकाः अतस्ते सर्वसाधनशून्या नरक एव पतंतीत्यर्थः मामात्मपरदेहेष्विति पाठे परमात्मा स्वदेहेषु परदेहेषु च चिद्रूपेण स्थितं मां प्रद्विषंतो यजंते दंभयज्ञेषु प्रद्वेषो यागाभावात् दीक्षादिनात्मनो दुःखे सर्वपीडा भवति तथा पश्वादीनामपि अविधिना हिंसया चैतत्प्रदेहमात्रमवशिष्यत इति अपराऽऽव्याख्या स्वात्मदेहजीवानां विशिष्टे भगवल्लीलाविग्रहे वा सद्देवादिसमायाम

रेवा

न्दृष्ट्यादिभ्रमात्मानं प्रद्विषन्तः तथा परदेहेषु भक्तदेहेषु प्रह्लादादि
समाविष्टेषु सर्वदा प्रादुर्भूतं मां प्रद्विषन्त इति योजना उक्तं हि नव
मे अवजानन्ति मां मूढा मानुषीं तनुमाश्रिताः परं भावमजानन्तो
मम भूतमहेश्वरं मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः इति अभ्यसूयकाः क्षि
मापन्नमन्येन मामसूयन्तः इति चायत्रतथा च भजनीयेष्वेषान्न
भक्ताप्तन्त्तेषां संभवतीत्यर्थः [illegible]
[illegible] १८ ॥

सदानंदटीका ॥

यद्यप्यस्मादिसंकल्पैः प्रवृत्तानां विकर्मणां नैव क्रियायागादिर्धीशुद्धिहेतुः किं पुनरीश्वरे १ स्तिर्वेदवोधादिनो स्तीत्याह जगत्पतिः आरोपितगुणैः स्वस्य महत्त्वाभिमतिं श्रिताः २ बलं शरीरसामर्थ्यं पराभिभवकारणं परावधीरणारूपं दर्पं गुर्वाद्यतिक्रमं ३ काममिष्टाभिलाषं च क्रोधं द्वेषमनिष्टके परैश्वर्यासहिष्णुत्वं मात्सर्यं चाप्यथापरान् ४ संश्रिता महतो दोषान्नरकादिभयावहान् ईदृशा अपि ते भक्ताप्तताः संतो न नारकी ५ यान्तं तेन गमिष्यन्तीत्याशंक्याह रमापतिः मां श्रीनारायणं तेषामास्तरां तं वपुः ष्वपि ६ परेषां चैव तन्नुभार्यादीनां स्वरूपिणां प्रमास्वदेषु देहेषु तन्मदीकमसालेणं ७ परमं मास्वदं श्रीमद्भगवंतमथोत्तमं उदैवपरिपाकात्ते प्रद्विषन्तोभ्यसूयकाः ८ न्नु मानुष्यसमाहेदमस्तित्वपापमेषां भवेत् क्वचित्स्व तस्मिन्नेवासेने उल्लङ्घ्य प्रवर्तिते ९ आत्माभंगी ममद्वेषी त्यादिस्वत्मा तत्परित्तं अतः स्कन्धवैष्णवं मद्वेषो मम नापरः १० ननु गुर्वादयः शिष्टाः कथं ताः मानुषा भवति इत्यत्राहाभ्यसूयन्ति तत्रैवं नः संज्ञेष्वपि देवमार्गे स्थितानां तेनेकारुण्यादिगुणेष्वपि प्रतारणादिदोषाणामारोपणस्वभावकाः ११ स्वदेहे परदेहेषु विद्वेषेण स्थितं हि मां प्रद्विषन्तो यजन्ते ते दंभयज्ञेषु हिंसया १२ पश्वादेरयथाशास्त्रं सा तां हिंसकारिणः हृष्यादीन्नादिनापीडंस हन्तेत्थोस्त्ववानरैः यद्वा स्वदेहे भगवल्लीलाविग्रहेश्वरे वासुदेवसमाविष्टे नित्यं दृष्ट्यादिविभ्र

चात्मदेहदिः स्वर्वप्रवेशतः

श्री. गी. टी. षो.

मात् १५ द्विषांत्वत्कृपयाज्ञानात्तु निमित्तं अहंकारैश्च द्विषन्परदेहेषु मां हरिं प्रह्लादादिसमाख्येषु सदाविर्भूतमित्यपि १६।१८॥

नीलकंठीटीका १२ ॥

अहंकारोहमेव सर्वश्रेष्ठ इति बुद्धिः बलं शारीरं धनाभिजननिमित्तं च दर्पः परावज्ञा कामं क्रोधं च संश्रिताः मां सर्वदेहेषु प्रविष्टं आत्मदेहे स्वदेहशोषणेन कर्षयन्तः शरीरस्थं भूतग्राममचेतसः मां चैवान्तःशरीरस्थं तान्विध्यासुरनिश्चयानिति वस्यमाणदिशा परदेहे च हिंसादिना प्रद्विषन्तः अभ्यसूयकाः सर्वत्र गुणेषु वेदोक्तेषु शमादिषु अशक्तत्वादिलक्षणं दोषमारोपयन्तः ॥१८॥

आनंदीटीका १३

अविधिमेवाह मां परमेश्वरं स्वदेहे परदेहे च प्रद्विषन्तः नास्तीश्वरः कश्चनेह कृतस्य कर्मणः परलोके फलद इति द्वेषयुक्ता अभ्यसूयन्तो निंदन्तः १८ ॥

रामकंठीटीका १४

तथात्मव्याप्रणालिविषये प्रकृत्वरहिता यतो धनासंयुक्ता मानमदाभ्यामहंकारात्मकाभ्यां युक्ताः तथाहंकारादीन्संश्रिता इति गतार्थं तथाविधाः सन्तो मां परमात्मानं सर्वगतमज्ञानमोहितत्वादप्रत्यक्षमर्षेण प्रद्विषन्तोऽप्रीतिहेतुनाध्यवस्यन्तोऽयतोऽभ्यसूयका नास्तिकत्वान्निंदापरा एवंविधान् १८ ॥

नास्तिकी [illegible]टीका १५

अहंकारं अभिमानम् बलं दुराग्रहम् दर्पं धनादिमदम् कामम् इष्टविषयाभिलाषं क्रोधमनिष्टविषये द्वेषं च संश्रिताः सम्यगवष्टब्धाः आत्मपरदेहेषु स्वदेहेषु परदेहेषु च विद्वेशेन स्थितं मां प्रद्विषन्तो यजन्ते दम्भयज्ञेषु श्रद्धाया अभावादात्मनोऽहं प्रयैव प्रीतो भवति तथा पश्वादीनामप्यविधिना हिंसा या चैतन्मद्द्रोहमात्रमेवावशिष्यते इति प्रद्विषन्तः स्मृतम् ननु गुर्वादयः कथं तान्नानुशासति तत्राह अभ्यसूयकाः गुर्वादीनां सन्मार्गवर्तिनां कारुण्यादिगुणेषु प्रतारणादिदोषारोपकाः अतस्ते नरके पतन्ति

ति [illegible] ॥ १८ ॥

पैबोले टीका

अविधिपूर्वकत्वमेव प्रपंचयति अहंकारमिति विद्यमानैरवि
द्यमानैर्गुणैः आत्मन्यध्यारोपितैः विशिष्टमात्मानमहमि
ति मन्यते सोऽहंकारः तेषराभिभवनिमित्तं कामरागान्वितं सा
मर्थ्यं बलं यस्मोद्भवे धर्ममतिक्रामते सोयमेतः करणाश्रयो
दोषो दर्पः कामस्त्र्यादिविषयं क्रोधं अनिष्टविषयं यतान् अन्यां
श्च महतो दोषान् संश्रितास्ते आसुराः मामीश्वरं आत्मपरदेहेषु
तद्बुद्धिः कर्मसाक्षिभूतं मां प्रद्विषंतः मच्छासनातिवर्तित्वं प्र
द्वेषस्तं कुर्वंतः अभ्यसूयकाः सन्मार्गस्थानां गुणेष्वसह
मानाः १८

रगवीरसमिद्धोधिनी ॥

अहंकारमिति अहंकारादीन्संश्रिताः संत आत्मपरदेहेषु
आत्मनः परस्यच देहेषु देहेंद्रियादिषु स्थितमिति शेषः
मां प्रद्विषंतो प्रीतिं कुर्वंतो दंभयज्ञेषु यजंते श्रद्धाभावादात्म
नो हृष्येवपीडां कुर्वंतीति तथा चाभ्यसूयकाः सन्मार्गवर्तिना
मन्येषामसतामपि गुणेषु दोषारोपकाइत्यर्थः १८

मधुभाष्य

मामात्मपरदेहेष्विति नकस्यचिद्धि सुकारयितायऽ
दि स्यादन्यमपीडतो कारयितिस्यादि ईश्वरीयादिस
र्वस्यकारकः कारयीतमां प्रयेतिवादिनं स्रूयात्मस
ये आस्यतीति देति सामवेदेऽयास्कश्रुतिः १८ ॥

भाषा अनुवाद

अब अविधिपूर्वकत्वको प्रकाश करते हैं कि अभ्यसूयक कहे
निंदा करनेवाले मनुष्य अर्थात् भगवान कहते हैं कि मेरे
पथके अवलम्बी पुरुषों के गुणों मे दोष लगाने हारे मनु
ष्य अहंकारवल औ प्रगलभताजो ढीठापन तथा काम औ
क्रोध का आश्रय कर अर्थात् वश होय अपनी देह औ परकी
देह मे चेतन ज्ञानरूप से टिका जो मै हूं सो सम्पूर्ण रूपसे
मेरे प्रति द्रोहकारी यज्ञ आदि करते रहते हैं परन्तु मारे दम्भ
के यज्ञादि मे श्रद्धा के विना अपने को वृथा क्लेश देते हैं औ
र पशु आदिको का भी अविधिपूर्वक हिंसा करने से चेतन्य
जीवका द्रोह मात्र हीफल उत्पन्न होय है और तो कुछ हाथ
लगता नही इसी से य मनुष्य मेरे द्रोह करनेवाले मेरे शत्रु तु
ल्य हैं इससे इन हत्यारों को जो फल मिलेगा वह जानलो १८

दोहा

अहंकार बल वर्गसें कामक्रोधसें युक्त मोकों निज पर देह
मे द्वेष निंदकउक्त १८॥

तानहंद्विषतःक्रूरान्संसारेषुनराधमान्
क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु १९

शांकरभाष्यटीका १

तानहमिति तानहं सर्वान् सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणो द्विषतश्च मां क्रूरान् संसारेष्वेव नरकसंसरणमार्गेषु नराधमान् अधर्मदोषवत्वात् क्षिपामि प्रक्षिपामि अजस्रं सन्ततमशुभान् अशुभकर्मकारिण आसुरीष्वेव क्रूरकर्मप्रायासु व्याघ्रसिंहादियोनिषु क्षिपामीत्यनेन संबंधः ॥१९॥

आनंदगिरिकृतटीका २

तेषामुक्तविशेषणवतामासुराणां किं स्यादिति तदाह तानिति । भगवतो नैर्घृण्यप्रसंगं प्रत्यादिशति अधर्मेति १९ ॥

स्वामिकृतटीका ३

तेषां कदाचिदप्यासुरस्वभावप्रच्युतिर्न भवतीत्याह तानितिद्वाभ्यां तानहं मां द्विषतः क्रूरान् संसारेषु जन्ममृत्युमार्गेषु तत्राप्यासुरीष्वेवातिक्रूरासु व्याघ्रसर्पादियोनिषु अजस्रमनवरतं क्षिपामि तेषां पापकर्मणां तादृशं फलं ददामीत्यर्थः १९ ॥

पिशाचभाष्यटीका ४

सिंहव्याघ्रवराहादिषु १९ ॥

रामानुजभाष्यटीका ५

तानिति एवं मां ये द्विषंति तान् क्रूरान् नराधमान् अशुभान् अजस्रं संसारेषु जन्मजरामरणादिरूपेण परिवर्तमानेषु संतानेषु तत्राप्यासुरीष्वेव योनिषु क्षिपामि मदानुकूल्यप्रत्यनीकेषु क्षिपामि तज्जन्मप्राप्त्यनुगुणप्रवृत्तिहेतुभूतबुद्धिषु क्रूरासु अहमेव संयोजयामीत्यर्थः १९

अभिनवगुप्तटीका ६

स्पष्टार्थं १९

तेषां कदाचिदप्यासुरयोनिषु च्युतिर्न भवतीत्याह —

परमार्थप्रपाटीका ७ ॥

तानितिद्वाभ्यां तान्मां द्विषतः क्रूरान्नराधमानमनुष्ययोनिष्वधमान् संसारेषु जन्ममृत्युमार्गेषु तत्राप्यासुरीषु योनिषु व्याघ्रसर्पवृश्चिका

गी॰ दिहिंस्रयोनिष्वजस्रं निरंतरं क्षिपामि १९ ॥

टी॰ घा॰ वनमालीटीका ८

ननु तव कृपया कदाचित्तेषां निस्तारः स्यात्तत्राह तानिति तान्मन्मार्ग
प्रतिपन्नभूतान् द्विषतः साधून्मां च क्रूरान् हिंसापरान् अतो नरा
धमान् अतिनिंदितान् अजस्रं सततमशुभानशुभं कर्म कृत्वा पुनरप्य
शुभकर्मकारिणः अहं सर्वकर्मफलदातेश्वरः पूर्वजन्मकृतपा
पसंमूढेन संसारेष्वेव नरसंसरणमार्गेषु क्षिपामि पातयामि नर
कागताश्वासुरीष्वेवातिक्रूरासु व्याघ्रसर्पादियोनिषु सदा मद्द्वेषादि
परासु दैत्ययोनिषु वा तत्तत्कर्मवासनानुसारेण क्षिपामीत्यनुषज्यते पू
र्वपूर्वकर्मानुसारित्वान्नेश्वरस्य वैषम्यादि केवैषम्यनैर्घृण्ये न सापे
क्षत्वात् तथा हि दर्शयतीति सूत्रात् कारुणिकत्वेपि तेषां पापं न नाशय
ति तन्नाशकपुण्यं च याभावात् पुण्यं च यं च न कारयति तेषामयोग्य
त्वात् न हीश्वरः पाषाणादिषु यवांकुरान्करोतीति नन्वीश्वरत्वाद्योग्यता
पि योग्यतां संपादयितुं शक्नोतीति चेत् शक्नोत्येव सत्यसंकल्पत्वात्परि
संकल्पयेत् न तु संकल्पयति स्वाज्ञालंघिषु स्वभक्तद्रोहिषु उदास्य
स्वप्रसन्नत्वात् एष एव साधुकर्म कारयति तं यमानिनीषते एष एवा
साधुकर्म कारयति तमधो निनीषत इति श्रुत्युक्तसाध्वादिकर्मकार
यत्त्वमपि पूर्वकर्मापेक्षयैव येषु प्रसादकारणमस्त्याज्ञापालनादि
तेषु प्रसीदति साधुकर्म च कारयति येषु तु नैतद्विपरीतं तेषु न प्रसी
दति प्रत्युत क्रुध्यत्यसाधुकर्म च कारयतीति न वैषम्यादिदोषः १९

क्रमवैजयंतीटीका ९ ॥

एवं विधानामासुराणामकृत्स्नभावत्वेन नित्यसंसारित्वमाह तानह
मिति संसारेषु संसरंति जन्मजरामरणाद्यवस्थयाकुलालचक्रव
त्परिवर्तन्ते इति संसारे देहात्माभिमानिनो जीवास्तेषु तत्राप्यासुरीष्व
कामक्रोधलोभमोहहिंसासूयानाचारादियुक्तास्वासाय मत्सेच्छानन्यजा
तिषु वनतत्तमदिंशीनीयादिषु योनिषु त्यजंति भूमिषु तानकृत्स्नभावा
न् द्विषतो मम शास्त्रस्य च द्वेषं कुर्वतो अत एव क्रूरान् हिंसामत्स
रादिनैर्घृण्यस्वभावानत एव चाशुभानमहिमत्वेन नामंगलरूपा

ततदेवकृतानराधमान् नरंतिशास्त्रविहितं नयंप्राप्नुवंतीतिनराः
शास्त्रानुकूलवर्तिनोमनुष्यास्तेषांतेषुवामध्येयेधमाः नीचास्ता
नक्षिपाम्यजस्रंसंततयामन्नाप्नुमनहीन् अजस्रंनिरंतरंपुनःपुनरासु
र्यीआसुरीष्वेवनान्यास्वित्यर्थः अहंतत्तत्कर्मानुगुणफलदः स
र्वेश्वरः पुरुषोत्तमः क्षिपामिप्रेरयामितत्तज्जन्मप्राप्त्यनुगुणं
प्रहृतिरेतः सत्त्वंबुद्धिषुतत्तत्क्रूरत्वादिकमहमेवसंयोजयामी
तिभावः १९ +तेषांत्वत्कृपयाकदाचिन्निस्तारःस्यात्त्वेत्याह॥

मधुसूदनीटीका १९

+ तान्सन्मार्गप्रतिपक्षभूतान्द्विषतः साधून्मांच तथाक्रूरान्हिंसा
परान् अतोनराधमान् अतिनिंदितान् अजस्रंसंततमशुभान
अशुभकर्मकारिणः अहंसर्वकर्मफलदाताईश्वरः संसारेष्वेव
पामि नरकसंसरणमार्गेषुक्षिपामिपातयामि नरकगतांश्चआसुरीष्वेवा
तिक्रूरासुव्याघ्रसर्पादियोनिषुतत्तत्कर्मवासनानुसारेणक्षि
पामीत्यनुषज्यते एतादृशेषुद्वेषिषुनास्तिममेश्वरस्यकृपे
त्यर्थः तथाचश्रुतिः अथयइहकपूयचरणाअभ्याशोहयत्तेक
पूयांयोनिमापद्येरन्श्वयोनिंवासूकरयोनिंवाचंडालयोनिंवे
ति कपूयचरणाः कुत्सितकर्माणः अभ्याशोहशीघ्रमेवकपू
यांकुत्सितांयोनिमापद्यंते इतिश्रुतेः रर्थः अतएवपूर्वकर्मा
नुसारित्वान्नेश्वरस्यवैषम्यनैर्घृण्येना तथाचपारमर्षंसूत्रंवैषम्य
नैर्घृण्येनसापेक्षत्वात्तथाहिदर्शयतीति एवंचपापकर्माण्य
[illegible]वैतेषांकारयतिभगवान् [illegible]
यतितेषानु[illegible]नीषते[illegible]
[illegible]तेषुतद्बीजसत्त्वात्कारणकत्वेपितानिपा
पकर्माणिननाशयति तन्नाशकपुण्योपचयाभावात् पुण्यो
पचयंनकारयतितेषामयोग्यत्वात् नहीश्वरः पाषाणेषुयवां
कुरान्करोतिईश्वरत्वाद्योग्यस्यापियोग्यतांसंपादयितुंशक्नो
तीतिचेत् शक्नोतीवसत्यसंकल्पत्वात् यदिसंकल्पयेत् तत्

तत

श्री॰
गी॰टी॰
षो॰

74

संकल्पयति आज्ञालंघिषु स्वभक्तद्रोहिषु आत्मस्वप्रसन्नत्वात् अनयेवमूयते एषह्येव साधुकर्म कारयति तं यमुन्निनीषत इ(+) रीत्वं तेषु न प्रसीदति सति कारणे कार्य कारणाभावे कार्याभाव इति किमत्र वैषम्यपरान्तनलुतेरिति न्यायाच्च अततो गत्वा किं चिद्वैषम्यापादनेपि महामायत्वाद्दोषः [illegible] [illegible] १९ ॥

(+) एतेनैव एष उ एव साधुकर्म कारयति तं यमधोनिनीषत इति वेदेषु प्रसादकारणमस्या पालनादि तेषु सीदति वेषु नन

सदानंदीटीका ११

तेषां तत्कृपया जातनिस्तरः स्यादिहेति चेत् मैवं सन्मार्गशत्रूंस्तान्मा साधून्द्विषतः शठान् १ हिंसासत्तिंदिताचारान्नित्यं चाशुभकारिणः अहं सर्वेश्वरः कर्मफलदाता यथायथं २ संसारेषु संसरणमार्गेषु नरकेषु च पातयामि तनस्तांश्च व्याघ्रसर्पादियोनिषु ३ क्रूरास्त्वासुरीष्वेव नन्त्वकर्मानुसारतः एतादृशेषु दुष्टेषु मत्कृपा नास्ति कर्हिचित् ४ १९ ॥

नीलकंठीटीका १२ ॥

तेषां फलमाह तानिति सर्वभूतसमोप्यहं तान्वेदोक्तशासनातिगान्भूतद्रोहकर्तॄन् अहमंतरात्मा नतु नटस्थो येन मम वैषम्यं स्यात् पूर्वसंस्कारानेनैव पापं कुर्वतिनतदनुरूपं फलं च प्राप्नुवंतीत्यर्थः ॥ १९ ॥

आनंदीटीका १३

अहं कृतस्य कर्मणः फलदः १९ ॥

रामकंठीटीका १४

तानसुरपापशठान् क्रूरान्दारुणाचारान्ज्ञानीश्वरो नास्त्यात्मे स्यादिना मां द्विषतो मामन्यतॄ प्रतीतिचिह्नवाक्चेष्टाभिः प्रत्ययतः अजस्रं नित्यमेव संसारेषु कर्मभूमिषु अशुभान्दुष्टकर्माधिकारहेतुत्वादशुभानासुरीष्वेव योनिषु गर्भवासेषु क्षिपामि तत्र जामि तेनात्मिकत्वं दृष्टसंकल्पाः संतत एवंविधाः पुनः पुनर्जायंते इत्यर्थः तेच । १९ ॥

+ननुतेषांकदाचिन्निस्तारोपिस्यादितिनेत्याह ॥

लासिकी [illegible]टीका १५

तानशुभकारिणोनराधमान्क्रूरान्हिंसापराञ्जगतोद्विषतः संसारेषु जन्ममरणप्रवाहेषुमध्यात्मारंकीष्यामनुभाव आसुरीष्वेवक्रू रास्वेवव्याघ्रसर्पादियोनिषुनवरतंक्षिपामि [illegible] [illegible] ॥१९॥

पंचोलेटीका

अहमेतान्सन्मार्गप्रतिपक्षभूतान्साधुद्वेषिणः मांद्विषतश्च क्रूरान्नराधमानशुभकर्मकारिणः संसारेषुसंसारमार्गेषु आसुरीषुक्रूरकर्मप्रायासुसिंहव्याघ्रादिषुयोनिषुअजस्रंस ततंप्रक्षिपामि १९ ॥

रणवीरसमिद्धोधिनी

तानहमिति तानहंसंसारेषुलोकेषुमध्येनराधमानधमपुरु षान् क्रूरान्धर्मविमुखान्द्विषतोभक्तान्नतएवाशुभान्लोकेषु निष्ठान् एवम्भूतावयावर्णेआसुरेषुअसुरसंबंधिनीषुयोनि षुकीटादिषुअजस्रमाकल्पंयावत्क्षिपामि पापयोनयस्तेपाप योनिषुवोत्पद्यन्तेइतिभावः १९

मधुभाष्य

१९ ॥

भाषा अनुवाद १९

और उनका आसुरी स्वभाव कभी जाता नहीं यह दो श्लोक से कह
ते है कि सो हमसे द्वेष करने वाले क्रूर स्वरूप नराधमों को मै ज
न्म मृत्यु की मार्ग स्वरूप संसार मे आसुरी कहे अति क्रूर व्याघ्र
सर्प आदि दुष्ट योनि मे हमेसा फेंका करता हूं अर्थात् उनको
वही निषिद्ध योनि मिला करती हैं १९ ॥

दोहा

तिनहि दुष्टकठोर को मैं हि जगत हि मांहि पावों अशुभ नर
अधम को असुरयोनि में ताहि १९ ॥

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि
मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिं २०

शांकरभाष्यटीका १

आसुरीमिति आसुरीं योनिमापन्नाः प्रतिपन्ना मूढा जन्मनि ज न्मनि अविवेकिनः प्रतिजन्म तमोबहुलास्वेव योनिषु जायमा ना अधो गच्छंति ते मूढा मामीश्वरं अप्राप्य अनासाद्यैव हे कौंते य ततस्तस्मादपि यांति अधमां निकृष्टतमां गतिं मामप्राप्यैवेति न मत्प्राप्तौ काचिदप्याशंकाऽतो मदुपदिष्टसाधुमार्गप्राप्तिमप्रा प्येत्यर्थः॥२०॥

आनंदगिरिटीका २

ननु तेषामपि क्रमेण बहूनां जन्मनामंते श्रेयो भविष्यति नेत्याह आसुरीमिति। तेषामीश्वरप्राप्तिशंकाभावे कथं तद्विशेषः स्या दित्याशंक्याह मामित्यादिना। यस्मादासुरी संपदनर्थपरंप रायाः सर्वपुरुषार्थपरिपंथिनी तस्माद्यावत् पुरुषः सत्त्वेऽन कांचित् पारवश्यकरीं योनिमापन्नस्तावदेव तेनासौ परिहरणी येति समुदायार्थः २०॥

स्वामिकृतटीका ३

तेचासुरीमिति मामप्राप्यैवेत्येवकारेण मत्प्राप्तिशंकाकुतस्तेषां मत्प्राप्त्युपायं सन्मार्गमप्यप्राप्य ततोप्यधमां कृमिकीटादियो निं गतिं यांतीत्युक्तं शिष्टं स्पष्टार्थं २०॥

पिशाचभाष्यटीका ४

आपन्नाः प्राप्ताः मां सर्वज्ञमीश्वरं अधमां निकृष्टां नरकमित्यर्थः २०

रामानुजभाष्यटीका ५

आसुरीमिति मदानुकूल्यप्रत्यनीकजन्मापन्नाः पुनरपि जन्मनि जन्मनि मू ढाः विपरीतज्ञाना भगवानस्ति वासुदेवः सर्वे श्वर इति ज्ञानमप्राप्य ततस्ततो जन्मनः अधमामेव गतिं यान्ति स

श्री· गी· टी· पौ·

~~[illegible] संदेहमाह~~ २०॥

अभिनवगुप्तटीका ६

स्पष्टार्थं २० ॥

परमार्थप्रपाटीका ७

अथासुरयोनिसंस्कारवशान्नीचनीचतरयोनिष्वपि यंतइत्याह आ
सुरीमिति आसुरीयोनिमापन्नाः प्राप्ताः जन्मनिजन्मनि मूढाः ता
नलवस्थाः भवंति अतोमामप्राप्यैवाधमांगतिंयांति श्रुतिरपी
शावास्योपनिषत्सु असुर्यानामते लोका अंधेन तमसावृताः तां
स्ते प्रेत्याभिगच्छंति येके चात्महनो जनाइति ॥ भाष्य ये लोका
असुर्यानाम असुराणां स्वभूता असुर्याः ते अंधेन तमसा निविड
तराज्ञानेनावृता आच्छिन्नाः संति अथ ते के पि आत्महनः आत्मघात
काः पश्वादिहिंसारताः ते प्रेत्य देहं त्यक्त्वा तान् सर्वान् लोकान् अभि
गच्छंति यतः पुनर्निस्तारो नास्तीत्यर्थः ॥ २० ॥

वनमालीटीका ८ ॥

ननु तेषामपि बहूनां जन्मनामंते श्रेयो भविष्यतीत्यत आह ते मूढा
स्तमः स्वभावाः जन्मनिजन्मनि प्रति आसुरीं योनिमसुरजनस्वरूपता त^
योग्यतामापन्नाः सतो मामनुपायमप्राप्यैव ततोसुरयोनिजन्मां
तरमधमां गतिं नित्यनरकरूपां यांति यतो यतामिस्रादिनरकास्व
महत्यितिर्भवति नाहं ज्ञानरकं प्राप्नुवंतीत्यर्थः अत्रेदं तत्वमह
त^ मिचैत्यादिनोक्तेषु बहुष्वासुरलक्षणेषु वेदविरुद्धवक्तृत्वेन हिंसका
नुष्ठानत्वं च मुख्यमासुरलक्षणं अन्यानि लक्षणानि च न सर्वाणि स
र्वत्र संभवंति यथायोग्यमल्पपादकत्वाद निरीश्वरसांख्ययोगबौ
द्धजैनचार्वाकपाशुपतशाक्तसौरगाणपत्यप्रच्छन्नबौद्धमतानु
सारिणां पुरुषाणां केषांचित्सर्वाणि केषांचित्कतिपयानि लक्षणा
निसंति नच व्यासादिमहर्षिमतस्य कथमासुरत्वं यावंतं शं भगव
ता व्यासेन समयपादे हृष्यते तावदंशस्यासुरत्वात् वेदविरुद्धांशस्य
महर्षिकृतस्याप्यासुरत्वाच्चेति ॥ २० ॥

ननुनेकस्मिंश्चिदपिजन्मनित्वांप्राप्स्यतिनेवतेशांकानेवप्राप्यंतीत्याह
आसुरीमितिजन्मनिजन्मनीतिवीप्सयानेषांनित्यवद्धतासूचिता आसु
रीयोनिंमदानुकूलप्रत्यनीकजन्मापन्नाआमामूढाः मत्प्राप्तिपादक
शास्त्रानादरतयाविपरीतज्ञानास्तआसुराजनाः हेकौंतेयमामप्राप्य
सर्वेश्वरंपरममाप्तमप्राप्यानुपलभ्यएवकारेणतेषुमहद्वेषकृतत्वमंल्क
पाभावेनायंभगवान्वासुदेवः परमेश्वरःपुरुषोत्तमः सर्वात्मसेवंम
ज्ञानंतज्ञायतेः नतेमोहिनाआप्नुवंतीतिसूचितंयद्येवंतर्हिकिंफलंआ
प्नुवंतीत्यपेक्षायामाह ततोयांत्यधमांगतिमिति ततोजन्मनःसका
शादधमांश्वश्वकरादिरूपनिकृष्टांगतिंयोनिंयांतिप्राप्नुवंति तथाश्रु
तिरप्याह अथकपूयचरणा अभ्याशोहयत्तेकपूयांयोनिमापद्ये
रन्श्वयोनिंवासूकरयोनिंवाचांडालयोनिंवाइत्यादिका अयंभावःआ
स्तिकनास्तिकभेदेनासुराद्विविधास्तत्रयेआस्तिकास्तेकस्माच्चिच्छ्रा
यादिनिमित्तादिति तेदनुजमनुजयक्षराक्षसादिषुप्रपन्नाःसन्तःस्व
स्यादीश्वरेद्वेषयुक्तातिनकासहानिरुपनरेवेरकृत्वानरूपेणसा
यनेनतमीश्वरंप्राप्नुवंतियेतुनास्तिकास्तेपरमेश्वरंदेवंचमन्यंमम
मानाःसंतोमत्स्यरूपविग्रहादिकस्यानादरंकृत्वापुनःपुनःसंसार
मेवप्राप्नुवंतिनतन्मोक्षमिति कौंतेयेत्यनेनयेषांकुंत्याःसदृशामात
रस्तेएवास्तिकास्तेतोमोक्षंप्राप्नुवंतिनान्येइतिसूचितं २०॥

+ननुतेषामपिक्रमेणबहूनांजन्मना मधुसूदनीटीका १०॥ मंतेश्रेयोभविष्यतीत्याह॥

+येकदाचिदासुरीयोनिमापन्नास्तेजन्मनिजन्मनिप्रतिजन्ममूढास्त
मोवहुलत्वेनाविवेकिनः ततस्तस्मादपियांत्यधमांगतिंनिकृष्ट
तमांगतिंमामप्राप्यैवेति ततस्तेषांकदाचिदाशंकाप्यस्तियतोमद्
पदिष्टवेदमार्गमप्राप्येत्यर्थः एवकारस्तिर्यक्स्थावरादिषुवेदमा
र्गप्राप्तिस्वरूपायोग्यतांदर्शयति तेनात्रतेतमोवहुलत्वेनवेदमा
र्गप्राप्तिस्वरूपायोग्याभूत्वापूर्वपूर्वनिकृष्टयोनितोतिकृष्टतमाम
धमयोनिमनुष्यत्रयंगच्छंतीत्यर्थः हेकौंतेयतिनिजसंवंधकथनेन
नत्वमितोनिस्तीर्णाइतिसूचयति यस्मादेकदासुरीयोनिमापन्ना

नाधमत्वेनाधमतरं निकृष्टतरं निकृष्टतमयोनिलाभो न तु तत्प्रतीकारसामर्थ्य
मसंततमोबहुलत्वात् तस्माद्यावन्मनुष्यदेहलाभोऽस्ति तावन्महता
पि प्रयत्नेनासुर्याः संपदः परमनिकृष्टतमायाः परिहाराय त्वरयैव
यथाशक्ति दैवी संपदनुष्ठेया श्रेयोऽर्थिभिरन्यथा तिर्यगादिदेहप्राप्तौ
साधनानुष्ठानायोग्यत्वान्न कदापि निस्तारोऽस्तीति महत्संकटमापद्ये
तेति समुदायार्थः तदुक्तं इहैव नरकव्याधेश्चिकित्सां न करोति यः गत्वा
निरौषधं स्थानं सरुजः किं करिष्यतीति [illegible]
[illegible] २०

सदानंदीटीका ११

बहूनां जन्मनामंते ह्यासुराणां क्रमाद्दपि नास्ति श्रेय इति निंद्यत्वादि
माह भगवान्स्वयं १ येन त्वात्वासुरीं योनिमापन्नाः प्रतिजन्मनि मू
ढास्तमसव्याधिक्याद्विवेकिन एव च तस्मादधमां योनिमामप्रा
प्यैव यांतीति २ अतो मदुपदिष्टेन वेदमार्गेण नाप्यपि ३ अप्राप्यैवम
त्कावधिकारं प्रयांत्यपि तस्माद्यावन्नृदेहेन संबंधस्तावद्देववहि ४
परिहृत्यासुरीं हृष्टां संपदं नरकावहां महतापि प्रयत्नेन दैवीं संपदमा
श्रिताः ५ भगवंतं भजेत्प्राज्ञो यावत्स्मृतुर्न चापतेत् तदृतेन कदाप्य
स्ति निस्तारः संसृतेरिति ६ सुविवितहरिणा साक्षात्तदुक्तं च स्मृतावपि
इहैव नरकव्याधेश्चिकित्सां न करोति यः गत्वा निरौषधं स्थानं सरुजः
किं करिष्यति २० ॥

नीलकंठीटीका १२

आसुरयोनिप्राप्तेरपि फलमाह आसुरीमिति अधमां नारकीं तिर्य
क्स्थावरादिरूपां वा ॥२० ॥

आनंदीटीका १३

ततः पूर्वस्या योनेरधमां नीचां योनिं यांतीत्यर्थः २० ॥

रामकंठीटीका १४

एवंविधा जना एते आसुरीं यथोक्तां योनिं जन्मभूमिं भूयो भूयः प्रा
प्ताः प्रतिजन्म पूर्वसंस्कारदार्ढ्यान्मूढा ज्ञानरहिताः संतो मां परमा
त्मानमनधिगम्यैव ततो योनेरधमां निकृष्टां गतिं यांति प्राप्नुवंति [illegible]
[illegible] २० ।

+ नन्वतांपापयोनिमतिक्रम्यतेषांकिंचिच्छ्रेयोभवेदितिनेत्याह ॥

लासिकी वल्लभीटीका २० ॥

+ नैवमूढाअविवेकिनोयथोक्तामासुरींपरपीडावहांयोनिंप्रति
जन्मप्राप्ताः सन्तः मामप्राप्यैवेत्येवकारेणमत्प्राप्तिशंकाना
स्त्येवेतिव्यज्यते ततोयोनेरनन्तरमधमांनिकृष्टांकृमिकीटा
दियोनिंयांति [illegible]
[illegible] ॥२० ॥

पंबोलेटीका

हेकौंतेयमूढाः अविवेकिनः आसुरींतमोबहुलांयोनिमा
पन्नाप्राप्ताजन्मनिजन्मनिमामप्राप्यमदुपदिष्टसाधुमार्ग
मपिअप्राप्यततस्तस्याअपियोनेर्निकृष्टतमांयोनिंप्राप्नुवंति २०

मनवीरसमिद्धांथिनी ॥

आसुरीमिति आसुरींयोनिंप्रपन्ना जन्मजन्मनिमूढामांम
द्भक्तिमप्राप्यैव ततएवकारणादधमांगतिंयांतीति २०॥

मधुभाष्य

२०॥

और एव कहने से इस श्लोक मे यह कहा गया कि हे कौंतेय अ
र्जुन बहुत जन्म आसुरी योनिमे प्राप्त जो मूढजन उनको मेरी
प्राप्तिकी शंका कहांहै बल्कि मेरी प्राप्तिकी उपाय जो सतमार्ग
उसकोभी न पायके असुरादि योनिसे भी अधम जो कृमि कीटा
दि गति तिस दुर्गतिको वे जात है । २० ॥

दोहा

असुर योनिको पात है जन्मजन्म सो मूढ मोपापबिनऊं
तिसतनीच गति लहैं मूढ २०॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः काः
मः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् २१

शांकरभाष्यटीका १

सर्वस्याः आसुर्याः संपदः संक्षेपोयमुच्यते यस्मिंस्त्रिविधे स
र्वआसुरीसम्पद्भेदोनन्तोप्यन्तर्भवति यत्परिहारेण परिहृतश्च
भवति यन्मूलं सर्वस्यानर्थस्य तदेतदुच्यते त्रिविधमिति। त्रिविधं
नरकद्वारं त्रिःप्रकारं नरकस्य प्राप्तिद्वारं नाशनमात्मनः यद्द्वारं प्र
विशन्नेव नश्यत्यात्मा कस्मैचित् पुरुषार्थाय योग्योन भवती
त्येतदुच्यते द्वारं नाशनमात्मनइति किं तत् कामः क्रोधस्तथालो
भस्तस्मादेतत्त्रयं त्यजेत् यतएतत् द्वारं नाशनमात्मनस्तस्मात् का
मादित्रयमेतत् त्यजेत् त्यागस्तुतिरियं २१॥

आनंदगिरिटीका २

कथमासुरी सम्पदनन्तभेदवती पुरुषायुषेणापि परिहर्त्तुंशक्यते
त्याशंक्याह सर्वस्येति। संक्षेपोक्तिफलमाह यस्मिन्निति। कामादौ
त्रिविधे सर्वस्यासुरसम्पद्भेदस्यान्तर्भावेपि कथमसौ परिह्रियते
तत्राह यत्परिहारेणेति। ~~कामादौ त्रिविधे सर्वस्यासुरसम्पद्भेदस्या
न्तर्भावेपि कथमसौ परिह्रियते तत्राह यत्परिहारेणेति~~। कामादि
परिहारेणासुरीसम्पद्भेदपरिहारेपि कथं सर्वानर्थपरिवर्जनमित्याश
क्याह यन्मूलमिति। कथमात्मनो नित्यस्य नाशनाशंकेति। तत्राह क
स्मैचिदिति त्रिविधमपि सामान्यतो दर्शितमाकांक्षाद्वारा विशेषतो व
र्णयति किं तदिति। तस्मादिति व्याचष्टे यत इति। कामादित्यागे सति
अनर्थाचरणाच्छ्रेयः प्रतिबंधनिवृत्ती स्यातामिति भावः।२१॥

स्वामिकृतटीका ३

उक्तानामासुरदोषाणाममपि मध्ये सकलदोषमूलभूतं दोषत्रयं सर्व
थावर्जनीयमित्याह त्रिविधमिति कामः क्रोधो लोभ इतीदं त्रिविधं न
रकस्य द्वारमतएवात्मनो नाशनं नीचयोनिप्रापकं तस्मादेतत्त्रयं सर्वात्म
नात्यजेत् २१॥

श्री॰
गी॰ टी॰
षो॰

असुरस्वभावस्य नाश
स्यमूलं हेतुमाह

पैशाचभाष्यटीका ४

त्रिविधं त्रिप्रकारं द्वारं पंथाः आत्मनो नाशकारणं एतत्त्रयं जहि २१

रामानुजभाष्यटीका ५

त्रिविधमिति असुरस्वभावरूपस्य नरकस्यैतत्त्रिविधं द्वारं तच्चात्मनो नाशनं कामः क्रोधो लोभः इति त्रयाणां स्वरूपं पूर्वमेव व्याख्यातं द्वारं मार्गो हेतुरित्यर्थः तस्मादेतत्त्रयं त्यजेत् तस्मादतिघोरनरकहेतुत्वात्कामक्रोधलोभानामेतत्त्रितयं दूरतः परित्यज २१ ॥

अभिनवगुप्तटीका ६

स्पष्टार्थं २१ ॥ ॥

परमार्थप्रपाटीका ७

अथोक्तानामसुरदोषाणां मध्ये सकलदोषमूलभूतं दोषत्रयं सर्वथा वर्जनीयमित्याह त्रिविधमिति इदं वक्ष्यमाणं नरकस्य निरयस्यामेध्यं द्वारं त्रिविधमस्ति तत्किं कामः क्रोधस्तथा लोभः तत्र कामनया विषयी क्रियते येनासौ कामोऽभिलाषः तस्याप्रयत्नावाप्तौ क्रोधः आ मैव प्राणादप्यधिकयत्नेन संरक्षणं लोभः एतत्त्रयं किंभूतमात्मनो नाशनं अधमयोनिप्रापकं तस्मात्सर्वप्रयत्नेनैतत्त्रयं त्यजेत् २१ नी१

वनमालीटीका ८

आसुरलक्षणेनोक्तानां दोषाणां मध्ये कामादित्रयमवश्यं त्याज्यं पुमर्थस्यातिविरोधित्वादित्याह त्रिविधमिति इदं त्रिविधं त्रिप्रकारं नरकस्य द्वारं तत्प्राप्तेः साधनं सर्वस्या आसुर्याः संपदो मूलं आत्मनो नाशनं सर्वपुरुषार्थयोग्यतासंपादनेनात्यंताधोगतिप्रापकम् किं तदित्यत आह कामः क्रोधस्तथा लोभ इति प्राग्व्याख्यातं यस्मादेतत्त्रयमेव सर्वानर्थमूलं तस्मादेतत्त्रयं त्यजेत् एतत्त्रयत्यागेनैव सर्वाप्यासुरसंपत्त्यक्ता भवति एतत्त्रयस्यात्यागे तु अन्यस्य विवेकेन कार्यप्रतिबंधस्ततः परं कान्त्यतिरिति २१ ॥

ज्ञसमवैजयंतीटीका ९ ॥

नन्वासुरजननानरकं यांतीत्युक्तं तेषु मनस्यकोवा मार्गो
यच्चपि दैवसम्पद्धनो मुमुक्षवस्ते किं किं त्यजेयुरित्यपेक्षायामा
ह त्रिविधमिति नरकस्य निरयस्यासुरस्वभावरूपस्य वा इद
१ मेतत्त्रिविधं त्रयं द्वारं हेतुर्भवति कीदृशं आत्मनाशनं तस्या
त्मसंसारप्राप्तिकरत्वेन नाशकरं त्रिविधत्वं दर्शयति कामः
क्रोधस्तथा लोभ इत्येतेषां स्वरूपं पूर्वमेव व्याख्यातं यतएतद्द्वो
परम्पते यस्मादेतत्त्रयं निरयप्राप्तिहेतुस्तस्माद्दैवीसम्पद्वानु
पुरुषः एतत्त्रयं त्यजेत् दूरतः परिहरेत् २१ ॥

+ नन्वासुरीसंपद्वंतं तत्भेदवती कथं पुरुषायुषेण पिपरिहर्त्तुं शक्येत्याशंक्यांतं संक्षिप्याह ॥

मधुसूदनीटीका १० ॥

+ इदं त्रिविधं त्रिप्रकारं नरकस्य प्राप्तौ द्वारं साधनं सर्वस्या आसुर्याः सं
पदो मूलभूतमात्मनो नाशनं सर्वपुरुषार्थायोग्यतासंपाद
नेनात्यंताधमयोनिप्रापकं किं तदित्यत आह कामः क्रोधस्त
था लोभ इति प्राग्व्याख्यातं यस्मादेतत्त्रयमेव सर्वानर्थमूल
मूलं तस्मादेतत्त्रयं त्यजेत् [illegible] एतत्त्रयत्यागेनैव
सर्वाप्यासुरीसंपत्त्यक्ता भवति एतत्त्रयत्यागश्चात्मन्रस्य विवे
केन कार्यप्रतिबंधः ततः परं चानुत्पत्तिरिति द्रष्टव्यं २१
[illegible] ॥

सदानंदीटीका ११

ननु वर्षशतेनापि परिहर्तुं नचासुरी शक्यतेऽनेन भेदाषा
शंक्याह समासतः १ साधनं नरकप्राप्तौ त्रिः प्रकारमिदं स्प
ष्टं आसुर्याः संपदो मूलं पुरुषार्थैकघातकं २ यस्मादेत
त्त्रयं सर्वानर्थमूलमदीरितं तस्मादेतत्त्रयत्यागात्त्यक्ता स
र्वासुरी भवेत् २ ३ तत्रस्य त्रयस्यास्य विवेकेन विरागतः कार्य
स्य प्रतिबंधो हि त्यागोऽनुत्पत्तिरेव च २१ ॥

नीलकंठीटीका १२

संक्षेपमासुर्याः संपन्नेराह त्रिविधमिति ॥ २१ ॥

आनंदीटीका १२ ॥

अत्रहेतुंसिद्धांतयति आत्मनःस्वस्यनाशनंनीचातिनीचजन्म
दमित्यर्थः २१ ॥

रामकंठीटीका १४ कस्मात्तेएवंविधास्त्यानप्राप्नुवंतीत्या

ह आत्मनःपरस्यतत्वस्यनाशनमदर्शनकरणंयेनहेतुभूतेना
त्मानएवतिनरकस्यपंतेन त्रिप्रकारंनरकस्यकर्मभूमिफलभेदे
नत्रिप्रकारस्यनिरयस्येदंद्वारंप्रवेशकमिह्लत् कामःसखो
नुशायीरागलक्षणः क्लेशस्तथाक्रोधोद्वेषलक्षणोलोभउत्त
रोत्तरविषयेष्णुगर्धोयतएतेसर्वेआसुराजना एतैःकामादि
भिर्युक्ताःसंतोमामप्राप्यैवतपतवद्रगतिंगच्छंति तस्माद्धेतो
स्त्वमेतत्त्रयंपरिहर देवसर्गसंभवत्वादेतद्युक्तमात्मानंमामं
स्थाः यस्मात् २१

+उक्तदोषाणांमध्यात्सर्वथावर्जनी
यदोषत्रयमित्याह॥

लाक्षिकी धनपतीटीका १५

+कामोविषयाभिलाषः क्रोधोद्वेषः लोभउत्तरोत्तरंगर्वः एतत्त्रि
विधंनरकस्यद्वारंप्रवेशाह्लत् आत्मनस्त्रपरतत्वस्यनाशनम
दर्शनकारकम् तस्मादात्मनःश्रेयोर्थीएतत्त्रमनर्थमूलेसर्वा य
त्मनात्यजेत् [illegible] २१।

पंचोले टीका

उक्तानामासुरदोषाणांमध्येसकलदोषमूलभूतंदोषत्रयं
सर्वथावर्जनीयमित्याह त्रिविधमिति इदमात्मनःनाशने
त्रिविधंनरकस्यद्वारंनरकप्राप्तिमार्गःकामक्रोधलोभाख्यं
त्रिविधंनरकद्वारंत्यजेत् २१

रत्नावीरमतसिद्धोधिनी॥

त्रिविधमिति त्रिविधंत्रिप्रकारंनरकस्यप्राप्ताविति शेषः द्वार

सिद्धमात्मनोनाशनंस्वधर्मप्रच्यावकत्वाद्द्वारं प्रविशन्नेवस्व
धर्मात्प्रच्युतोभूत्वानकस्मैचित्पुरुषार्थाययोग्योभवतीति
तस्मात्कामःक्रोधस्तथालोभएतत्त्रयंत्यजेदेतेषांसक्तिंन
कुर्यादित्यर्थः २१॥

मधुभाष्य

२१॥

भाषा अनुवाद २१

पूर्व कहे भये सब आसुरी दोषों के मध्यमे सकल दोष के कारण स्वरूप जो तीनि दोष तिन को सदाही त्याग करना योग्य हैं कि काम क्रोध औ लोभ ये तीन दोष नरक के द्वार स्वरूप हैं तो कौन नीच योनि प्राप्ति कारक होय इसीसे मनुष्य करके मुक्तिकी इच्छा रखने वाले इन तीनो दोषों को सब तरहसे त्यागकरैं ये अनर्थके मूलहैं औ देखो दुख दाई हैं ॥ २१ ॥

दोहा

त्रिविध नरकके द्वार यह आत्मनाशक जोय काम क्रोध उ
नलोभ है तातें तिहुं तजे सोय २१॥

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः आ
चरत्यात्मनः श्रेयस्ततो याति परां गतिं २२

शांकरभाष्यटीका १

एतैरिति। एतैर्विमुक्तः कौंतेय तमोद्वारैस्तमसो नरकस्य दुः
खमोहात्मकस्य द्वाराणि कामादयस्तैरेतैस्त्रिभिर्विमुक्तो नर
आचरत्यनुतिष्ठति किमात्मनः श्रेयो यत्प्रतिबद्धः पूर्वं नाचर
ति तदपगमादाचरति ततस्तदाचरणतया याति परां गतिं मो
क्षमपि इति। २२॥

आनंदगिरिटीका २

नकेवलं श्रेयः समाचरन्नासुरीं च संपदं वर्जयन्मोक्षमेव सम्य
ग्धीद्वारा लभते किंतु लौकिकमपि सुखमित्यपेरर्थः। २२॥

स्वामिकृतटीका ३

त्यागे च विशिष्टफलमाह एतैरिति तमसो नरकस्य द्वारभूतैस्त्रि
भिः कामादिभिर्मुक्तो नर आत्मनः श्रेयः साधनं तपोयोगादि
कमाचरति ततश्च मोक्षं प्राप्नोति २२॥

पैशाचभाष्यटीका ४

एतत्त्रयत्यागे किंफलमित्यत आह एतैस्तमोद्वारैर्नरकद्वारैः वि
मुक्तः आचरति निष्पत्तिमनुगच्छतीति सिद्धिं पुरुषार्थसाम्पयोगप
तौ २२॥

रामानुजभाष्यटीका ५

एतैरिति एतैः कामक्रोधलोभैस्तमोद्वारैर्मद्विपरीतज्ञानहेतु
भिर्विमुक्तो नर आत्मनः श्रेय आचरति लब्धमद्विषयज्ञानो म
दानुकूल्ये प्रयतते ततो मामेव परां गतिं याति शास्त्रानादरो न
रकस्य प्रधानहेतुरित्याह २२॥

अभिनवगुप्तकृतटीका ६

प्रवृत्तिः कृतमिदमत्यन्तमिति निहतिः क्षयं लीयते इति किंचिद्
दृष्टादृष्टकार्यविघ्ने यत्नेऽपि किंचित्कं चिन्तामेषामलयं तानावि

रतं संस्वनिमलयाप्युपरमात् एतावदिति कामोपभोगएव परं कु
त्वनत्राशाश्च परं क्रोधः अतएवं हि कामक्रोधपरायणाः इति अनेक
चित्तारतिनिश्चयाभावात् अशुचौ निरये वीच्यादौ जन्ममरणसंता
नेच यज्ञैर्यजंते नाममात्रनिष्फलमित्यर्थः क्रोधनहिंसवं नष्णतीत्यर्थः
यज्ञानामयज्ञैः संज्ञामात्रेणये यज्ञास्तथ्यवानामार्थं प्रसिद्ध्यर्थं
ये यज्ञायेनयज्ञत्याज्ञयामितिव्यपदेशो जायते तेदंभश्चैकाएवत
नफलेतिक्रोधादिरूपितत्वादेव लोकाद्विषंतो मामेव द्विषंति यद्वा
वासुदेवो हि सर्ववासः आत्मनि च देहेषु च तं त आत्मनोपिहितं निरयपा
तहेतत्वपापाचरंति तांश्चाह मासुरीष्वेव योनिषु क्षिपामि यतः का
मादिकं त्रियं नरकस्यैव द्वारं तस्मादेतत्त्यजेत् २२ ॥

परमार्थप्रपा टीका ७

प्रागेव विशिष्टं फलमाह एतैरिति तमसो नरकस्य द्वारभूतैरेतै
स्त्रिभिः कामादिभिर्मुक्तो नरस्त्वात्मनः श्रेयः साधनं तपोयोगादि
आचरति ततः परां शांतिं याति ॥ [illegible]
[illegible] २२ ॥

वनमाली टीका ८

एतत्त्रयं त्यजतः किं स्यात्तत्राह एतैरिति एतैः कामक्रोधैस्त्रिभिस्तमो
द्वारैर्नरकसाधनैर्विमुक्तो विरहितः पुरुषः आचरत्यात्मनः श्रेयोय
द्धितं वेदबोधितं सर्वं हि कामादीनां सत्त्वं यावच्छ्रेयो नाचरति येन पु
रुषार्थः सिद्ध्येत् अश्रेयश्चाचरति येन निरयपातः स्यात् एवं त्वात्म
निवंधरहितः सन् श्रेयो नाचरति श्रेयश्चाचरति ततः ऐहिकं सर्व
मनुभूय सम्यग्ज्ञानभक्तिद्वारा याति परां गतिं मुक्तिं २२ ॥

रसमवैजयंती टीका ९

नन्वेतत्कामादित्रयं यस्त्यजति तस्य किं फलं भवतीत्यपेक्षायामा
ह एतैरिति हे कौंतेय तमोद्वारैर्निरयप्राप्तिहेतुभूतैरेतैरुक्तस्व
रूपैस्त्रिभिः कामक्रोधलोभरूपैर्यो विमुक्तो रहितः स एव न
रो मनुष्यो भवति स एवात्मनः स्वस्य श्रेयो वर्णाश्रमाचारपूर्वकं

मदाराधनलक्षणं ज्ञानं भक्त्यादिमत्किंसाधनमाचरति यत्नं करोति ततः साधनाचरणात्स्वर्गब्रह्मलोकादिभ्यो महत्कृष्टां गतिं मत्किं याति प्राप्नोति नरस्येकवचनेन कामादित्यागकर्त्तैक एव कश्चिन्न तु बहवः इति सूचितम् कौन्तेयेत्यनेन यथाहं नारायणस्तथा त्वमपि नरावतारोऽस्यतो मत्सहायेन साधनमाचर्य मत्किं प्राप्स्यसीति सूचितम् २२ ॥

मधुसूदनीटीका ९

+एतत्त्रयं त्यजतः किं स्यादिति तत्राह ॥

+एतैः कामक्रोधलोभैस्त्रिभिस्तमोद्वारैर्नरकसाधनैर्विमुक्तो विरहितः पुरुष आचरत्यात्मनः श्रेयो यद्धितं वेदबोधितं हे कौन्तेय पूर्वं हि कामादिप्रतिबंधः सन् श्रेयो नाचरति येन पुरुषार्थः सिध्येत् अश्रेयश्चाचरति येन निरयपातः स्यात् अधुना तत्प्रतिबंधरहितः सन् श्रेयो नाचरति श्रेयश्चाचरति ततश्च हि कं सत्त्वमनुभूय सम्यग्धीद्वारा याति परां गतिं मोक्षं [illegible]

[illegible] २२ ॥

हि

सदानंदीटीका ११

किंस्यादेतत्त्रयत्यागात्संसृपत्नं [illegible] स्फुटं एतैः कामादिभिर्दोषैस्त्रिभिर्नरकसाधनैः पुमान्विरहितः श्रेयो यद्धितं वेदबोधितं आचरत्यात्मनः सम्यग्धीद्वारैति परां गतिं २ कामादिप्रतिबद्धाः प्राक् श्रेयो नाचरन्ति स्वयं अश्रेयस्त्वाचरन्त्येव येन स्यान्निरये स्थितिः ३ कामादिमुक्तः पुरुषो नाश्रेयश्चरति स्वयं श्रेयः सम्यक्चरत्येव ततो याति परां गतिं २२ ॥

नीलकंठीटीका १२

कामादित्रयत्यागे किं स्यात्तत्राह एतैरिति तमोद्वारैः तमसो नरकस्य दुःखमोहात्मकस्य द्वारभूतैर्विमुक्तः सन् आत्मनः श्रेयः कल्याणं भगवदाराधनादिकमाचरति ततः परां गतिं मोक्षं याति तस्मात्कामादित्रयं त्यजेदिति ॥ २२ ॥

आनंदीटीका २२

~~[illegible]~~ ।

तमसो मिथ्याज्ञानस्य द्वारैः प्रसरणमार्गैस्त्रिभिः कामाद्यैर्मुक्तः आत्मनः श्रेयः शास्त्रविहितज्ञानकर्मसमुच्चयानुष्ठानरूपमाचरति ततः क्रमेण परां गतिं मुक्तिं याति २२ ॥

रामकंठीटीका १४

एतैः कामादिभिर्गुणात्मकैर्दोषैर्निर्गुणस्वभावेन निसर्गशुद्धेनात्मना संतासंवद्धैरहैतज्ञानोपलक्षणैस्तिमिराविर्भावमार्गैस्त्रिभिर्विप्रमुक्तो हृदयतया मतिरेतैः संघैः पृथग्भूतैर्नरो मनुष्यदैवसर्गभाक्पुरुषोर्हितं यथोक्तज्ञानकर्मानुष्ठानरूपमाचरति ततः परां प्रकृष्टां परमात्मसमापत्तिरूपां गतिं सिद्धिमाप्नोत्येवं विधस्य च श्रेयसस्त्वरणं शास्त्रोक्तविधानद्वयमन्तरेण न भवितव्यमित्याह २२ ॥

+ तत्त्यागे च विशिष्टं फलमित्याह ॥

लासिकी [illegible]टीका १५

+ एतैस्त्रिभिर्यथोक्तैस्तमोद्वारैरज्ञानलक्षणमहान्धप्रवेशकारणैर्विमुक्तः पृथग्भूतः पुरुषः आत्मनः स्वस्य श्रेयः साधनं तपोयोगाद्यनुष्ठानरूपमाचरति ततोऽनुष्ठानतारतम्येन परां गतिं मोक्षाख्यां प्राप्नोति श्रेयआचरणे च मार्गदर्शकं शास्त्रमेव प्रमाणमित्याह ॥ २२ ॥

पैठोले टीका

त्यागे फलमाह एतैरिति हे कौंतेय एतैस्त्रिभिस्तमसो नरकस्य द्वारैः तमोहात्मकस्य द्वारैः कामादिभिर्विमुक्तो नरः आत्मनः श्रेयः कल्याणं आचरति ततः श्रेयसः आचरणात्परां मोक्षाख्यां गतिं याति २२

रणवीरसमिद्धोधिनी ॥

एतैरिति एतैः कामादिभिस्त्रिभिस्तमोद्वारैस्तमसो नरकस्य द्वारभूतैर्विमुक्त एतेष्वनासक्तो नर आत्मनः श्रेयः श्रेयः साधनं च

धर्मपरिपालनं चेत्करोति ततस्तर्हि स्वधर्माचरणादेव परां
गतिं मत्प्राप्तिलक्षणां यातीति तस्मात्स्वधर्मनिष्ठो भवेतिभा
वः २२॥

मधुभाष्य

२२॥

87

भाषा अनुवाद २२

अब इन तीन दोषोके त्याग करने मे विशेष फल कहते हैं कि हे कौंतेय अर्जुन नम कहे नरक के द्वार रूप काम आदि तीन दोष से अछीनरहे मक्त पुरुष अपने कल्याणके साधन स्वरूप तप योग आदि आचरण करते हैं और तिस के अनंतर मुक्ति पावते हैं २२

दोहा

इनसें मुक्त हो कौंतिसुत तिहुं नरकद्वार में नरजोहि करत
आत्म कल्याण हि जात परमगति सोहि २२॥

यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः न
स सिद्धिमवाप्नोति न सुखं न परां गतिं २३ ॥

शांकरभाष्यटीका १

सर्वस्यैतस्यासुरीसम्पत्परिवर्जनस्य श्रेयआचरणस्य शास्त्रं कारणं शास्त्रप्रमाणादुभयं शक्यं कर्त्तुं नान्यथा अतः यः शास्त्रेति यः शास्त्रविधिं शास्त्रं वेदः तस्य विधिं कर्त्तव्याकर्त्तव्यज्ञानकारणं विधिप्रतिषेधाख्यमुत्सृज्य त्यक्त्वा वर्त्तते कामकारतः कामप्रयुक्तः सन् न स सिद्धिं पुरुषार्थयोग्यतामवाप्नोति । नाप्यस्मिन् लोके सुखं नापि परां प्रकृष्टां गतिं स्वर्गं मोक्षं वा । २३ ॥

आनंदगिरिकृतटीका २

आसुर्याः सम्पदो वर्जने श्रेयसश्च करणे किं कारणं तदाह सर्वस्येति तस्य कारणत्वं साधयति शास्त्रेति उक्तमुपजीव्यानन्तरश्लोकं प्रवर्त्तयति अत इति । शिष्यते बोध्यते तेनानागतोऽर्थ इति शास्त्रं तच्च विधिनिषेधात्मकमित्युपेत्य व्याचष्टे कर्त्तव्येति । कामस्य करणं कामकारः तस्माद्धेतोरित्युपेत्य कामाधीना शास्त्रविमुखस्य प्रवृत्तिरित्याह कामेति । कामाधीनप्रवृत्तेः सदा पुमर्थायोग्यस्य सर्वपुरुषार्थासिद्धिरित्याह नापीति । २३ ॥

स्वामिकृतटीका ३

कामादित्यागश्च स्वधर्माचरणं विना न भवतीत्याह य इति शास्त्रविधिं वेदविहितं धर्ममुत्सृज्य यः कामकारतो यथेष्टं वर्त्तते स सिद्धिं तत्त्वज्ञानं न प्राप्नोति न च सुखमुपशमं न च परां गतिं मुक्तिं प्राप्नोति २३

पिशाचभाष्यटीका ४

सुखं स्वर्गं परां गतिं मोक्षं २३ ॥

रामानुजभाष्यटीका ५

शास्त्रस्यानादरो नरकस्य हेतुरित्याह

यत इति शास्त्रं वेदाख्यं विधिरनुशासनं वेदाख्यमदनुशासनमुत्सृज्य यः कामकारेणा वर्त्तते स्वच्छंदानुगुणमार्गेषु वर्त्तते न स सिद्धिमवाप्नोति न कामप्याममुष्मिकीं सिद्धिमवाप्नोति २३ ॥

+शास्त्रविधिं त्यजतः स्वमनीषयैव कार्याकार्यविचारं कुर्वतः प्रत्युत नरकपातः ॥ २३ ॥

श्री॰
गी॰टी॰
पा॰

अभिनवगुप्तकृतटीका ६

न चैतत्पुरुषवचनमित्यनादरणीयमपि तु अनादिशास्त्रमत्र प्रमाणमि त्युच्यते [illegible] ॥

परमार्थप्रपाटीका ७

+कामादित्यागश्च स्वधर्माचरणं विना न भवतीत्याह ॥

+य इति शास्त्रविधिं वेदधर्ममुत्सृज्य यः कामकारतः स्वेच्छाचारेणैव र्तते स सिद्धिं तत्त्वज्ञानं न प्राप्नोति न सुखं तत्त्वज्ञानस्य फलरूपमात्म सुखं तत्फलरूपां परां गतिं मोक्षं च न प्राप्नोति २३ ॥

वनमालीटीका ८

कामादित्यागश्च स्वधर्माचरणं विना न भवतीत्याह य इति यः शा स्त्रविधिं श्रुतिस्मृत्यादिविहितं स्वधर्ममुत्सृज्य अज्ञानादिनास्य का कामकारतः कामाद्यनुसारात् स्वाचारेणैव वर्तते स सिद्धिं पुरुषा र्थप्राप्तियोग्यताम् अन्तःकरणशुद्धिं कर्मणि लिङ्गं वापि नाप्नोति न सुखमैहिकं नापि परलोकगतिं स्वर्गमोक्षं वा २३ ॥

जसमवैजयंतीटीका ९

धर्माचरणं विना कामादित्यागो न भवेत् शास्त्रं विना धर्मो न सिद्ध्य तस्मादैहिकामुष्मिकसुखेच्छुना पुरुषेण शास्त्रमेवाश्रयणीयमित्या ह द्वाभ्याम् यः शास्त्रविधिमिति यः स्वच्छन्दवर्ती नास्तिको ज नः शास्त्रविधिं शास्त्राज्ञामुत्सृज्य परित्यज्य कामकारतः स्वा च्छन्द्येन वर्तते शास्त्रविहितं कर्म त्यक्त्वा अशास्त्रीयं करोतीत्यर्थः स जनः सिद्धिमैहिकीमामुष्मिकीं यत्नरूपामन्तःकरणशुद्धिरूपां वा नावाप्नोति सुखमैहिकामुष्मिकं नैवाप्नोति मुक्तिं नावाप्नोतीत्य हो यदि सो हि कमपि सुखं स नाप्नोति तर्ह्यामुष्मिकीं सिद्धिं स्वर्गसु खं प्राप्नोति परां गतिं वा प्राप्नोतीति को भवतः कथं किं न प्राप्नोत्येवेत्य र्थः २३ ॥

+यस्मादश्रेयो नाचरणस्य श्रे याश्चाचरणस्य च शास्त्रमेव नि मित्तं तयोः शास्त्रैकगम्य त्वात् ॥

मधुसूदनीटीका १०

+शिष्यतेऽनुशिष्यते अपूर्वोऽर्थो बोध्यतेऽनेनेति शास्त्रं वेदः तदु पजीविस्मृतिपुराणादि च तत्संबंधी विधिः लिङादिशब्दः कु र्यान्न कुर्यादित्येवं प्रवर्तनानिवर्तनात्मकः कर्तव्याकर्तव्यज्ञान हेतुर्विधिनिषेधाख्यः तं शास्त्रविधिं विधिनिषेधातिक्रममपि व

त्त्वप्रतिपादकंशास्त्रमस्तीतिसूचयितुंविधिशब्दः उत्सृज्यग्रन्थद्वयाप
रित्यज्य कामकारतः स्वेच्छामात्रेणवर्तनेविहितमपिनाचरतिनिष
द्धमपि[illegible]आचरतियः ससिद्धिंपुरुषार्थप्राप्तियोग्यतामंतःक
रणशुद्धिंकर्मणाकुर्वन्नपिनाप्नोतिनसुखमैहिकं नापिपरांप्र
कृष्टांगतिंस्वर्गमोक्षंवा २३ ॥

सदानंदीटीका ११

शिष्यतेबोध्यतेनेनापूर्वोर्थइतिशास्त्रंकं वेदस्तदुपजीव्येनतस्य
स्यायपितदेवच १ तत्संबंधिविधिंयस्तुपरित्यज्यातिनास्तिकः
स्वेच्छामात्रेणविहितंनकरोतिनिषिद्धंकरोति २ ससिद्धिंचेतसः
शुद्धिंपुमर्थप्राप्तियोग्यतां नाप्नोतिनैहिकंसौख्यंनस्वर्गंनाप
वर्गंकं २३ ॥

नीलकंठीटीका १२ ॥

नकेवलंकाष्टतपस्विवत्कामादित्यागमात्रेणउच्छास्त्रवर्तीसि
ध्यतीत्याह यइति शास्त्रविधिंशास्त्रेणइष्टसाधनतयाःनिष्ट
साधनतयाचज्ञापितंब्राह्मणोयजेतनसुरांपिबेदित्यादिनावि
हितंनिषिद्धंचउत्सृज्यविहितमकरणेननिषिद्धमाचरणेनच
उत्सृज्ययोवर्ततेकामकारतइच्छया सःसिद्धिंचित्तशुद्धिंसुखंवै
राग्यादिजनितंतत्परंगतिंमोक्षंचनावाप्नोति ॥ २३ ॥

आनंदीटीका १३

कामकारतःकामस्यविषयाभिलाषस्येवकरणीयताकामकार
त आत्मसंभावनयास्वेच्छयाचसिद्धिंप्रारब्धस्यकर्मणोनिष्पत्तिं
नाप्नोतितत्फलंसुखादिकंचनाप्नोति २३ ॥

रामकंठीटीका १४

यःपुरुषस्तत्फलनिष्पत्तिहेतुतत्क्रियादिविषयंशास्त्रेणचो
दितंविधिंतत्तदितिकर्तव्यतारूपंविधानमुत्सृज्य[illegible]कामकारतः
स्वाच्छंद्याद्वर्ततेव्यवहरतेसोनारब्धक्रियानिष्पत्तिरूपांसिद्धिंनलभ
ते नतस्यतत्फलभूतंसुखंस्वर्गादिभोगप्राप्तिर्हितमपिनलभतेनचपरांगति
मपवर्गंलभते २३ ।

यः पुरुषः शास्त्रविधिमितिकर्तव्यतारूपमुत्सृज्य श्रद्धयापरित्यज्य कामकारतः स्वाछंद्याद्वर्तते प्रवर्तते भजते स सिद्धिमारब्धक्रियानिष्पत्तिं सत्वमैहिकीमामुष्मिकीं परतत्वात्मिकां वा निर्वृतिं परां गतिं मोक्षाख्यां च न प्राप्नोति [illegible] ।२३॥

९०

पंचोले टीका

कामक्रोधादित्यागस्य स्वधर्माचरणं विना न भवतीत्याह यइति यः शास्त्रविधिं शास्त्रस्य विधिं वेदस्य विधिं कर्तव्याकर्तव्यज्ञानकारणमुत्सृज्य त्यक्त्वा कामकारतः यथेच्छं कामप्रयुक्तः सन् प्रवर्तते स सिद्धिं पुरुषार्थं न प्राप्नोति २३

मतावीरसमसिद्धायिनी॥

इदानीं स्वधर्माचरणमेव सिद्धिकरमित्याह यइति यः पुमान् शास्त्रविधिं यथावर्णाश्रमोदितं स्वस्वधर्माचरणं ब्राह्मणादीनां वेदाध्ययनादिरूपं उत्सृज्य परित्यज्य कामकारतो यथेच्छं वर्तते स हि पुमान् सिद्धिमैहिकीमामुष्मिकीं वा न प्राप्नोति न सुखमैहिकमामुष्मिकं वा न यां च परां गतिं निःश्रेयसप्राप्तिलक्षणां न प्राप्नोति इति सर्वथा स्वधर्मपरित्यागाच्चतुर्वर्गसिद्धिनिष्पत्तिरिति भावः २३॥

मधुभाष्य

२३॥

भाषा अनुवाद २३

कामादित्याग करना भी स्वधर्म आचरण के विना नहीं होसके
है यही कहते हैं कि शास्त्र की विधि कहे वेद विहित धर्मत्या
ग करके जो मनुष्य अपनी इच्छा के अनुसार कर्म करते हैं वे
सिद्धि कहे तत्व ज्ञान को नही पावते हैं और उपशम अर्थात्
शांतिरूप सुख भी नही पावते और न उत्तम गति जो मुक्ति ति
सको पावते हैं २३ ॥

दोहा

शास्त्रविधि कहुं त्यागके जो करैं स्वेच्छाचार नासो सिद्धि पाव
हिं ना सुख परम उधार २३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसं
पत्तियोगो नाम षोडशोऽध्यायः १६ ॥

शंकरभाष्यटीका १

तस्मादिति । तस्मात् शास्त्रं प्रमाणं ज्ञानं साधनं ते तव कार्या
कार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायाम् अतो ज्ञात्वा बुद्ध्वा शास्त्र
विधानोक्तं विधिर्विधानं शास्त्रमेव विधानं शास्त्रविधानं कुर्या
न्न कुर्यादित्येवं लक्षणं तेनोक्तं स्वकर्म यत्तत् कर्तुमिहार्हसीति इ
ह इति कर्माधिकारभूमिप्रदर्शनार्थं इति २४ इति षोडशोऽध्या
यः १६ ॥

आनंदगिरिकृतटीका २

शास्त्राहते कर्मणो निष्फलत्वे फलितमाह तस्मादिति । कर्तव्याक
र्तव्यौ धर्माधर्मौ तत्र शास्त्रस्य प्रमाणत्वेपि । मम किं कर्तव्यमि
त्याशंक्याह अत इति । स्वकर्मक्षत्रियस्य युद्धादि इति शाह्रोध्याय
समाप्त्यर्थः । तदनेनाध्यायेन प्राग्भवीयकर्मवासनानुसारेणा
भिव्यज्यमानसात्त्विकादिप्रकृतित्रयविभागेन दैव्यासुरीति सं
पद्वयमादानहानाभ्यामुपदिश्य कामक्रोधलोभानपहाय पुरु
षार्थिना शास्त्रश्रवणेन तदनुकारिणा भवितव्यमिति निर्धारि
तं २४ ॥ इति षोडशोऽध्यायः १६ ॥

स्वामिकृतटीका ३

फलितमाह तस्मादिति इदं कार्यमिदमकार्यमित्यस्यां व्यवस्थायां ते
तव शास्त्रं श्रुतिस्मृतिपुराणादिकमेव प्रमाणं अतः शास्त्रविधानो
क्तं ज्ञात्वेह कर्माधिकारे वर्तमानो यथाधिकारं कर्म कर्तुमर्हसि त
त्फलत्वात्सत्त्वशुद्धिसम्यग्ज्ञानमुक्तीमित्यर्थः २४ दैवदैतेयसंप
ना

त्रिसंविभागेनषोडशे तत्त्वज्ञानोधिकारस्तुसात्विकस्येतिदर्शितं २४
इतिश्रीभगवत्तात्पर्यबोधिन्यांटीकायांषोडशोध्यायः १६ ॥

पैशाचभाष्यटीका ४ ॥

तस्माच्छास्त्रंप्रमाणंतेनव्यवस्थायांशास्त्रविधानोक्तंविधानंविधिः
शास्त्रमेवविधानंतेनोक्तंकर्मक्रियामिहसंसारेऽर्हसियोगोसि २४
इतिपैशाचभाष्येषोडशोध्यायः १६ ॥

रामानुजभाष्यटीका ५

दैवासुरविभागोक्तिमुखेनप्राप्यतत्त्वज्ञानंतत्प्राप्त्युपायज्ञानंचवेदैकमू
लमित्युक्तं इदानीमशास्त्रविहितस्यासुरत्वेनाफलत्वंशास्त्रविहितस्य
गुणतस्त्रैविध्यंतस्यलक्षणंत्रैविध्यंतस्यलक्षणंचोच्यतेतत्राशास्त्रवि
हितस्यनिष्फलत्वमजानन्तःशास्त्रविहितेश्रद्धासंयुक्तायागादौतत्र
विधिविकलत्वेऽश्रद्धयुक्तास्तानर्जुनःपृच्छति अर्जुनउवाच येइति प्रा
स्तरयोरैहिककर्मणितत्त्वंकिंविदिति [illegible] प्रश्नतात्पर्यार्थः
तस्मादितितस्मात्कार्याकार्यव्यवस्थितावुपादेयानुपादेयव्यवस्थायां
तवशास्त्रमेवप्रमाणं धर्मशास्त्रेतिहासपुराणोपबृंहितावेदाः यदेव
पुरुषोत्तमाख्यंपरंतत्वं तत्समाराधनरूपंतत्प्राप्त्युपायभूतंकर्मचवबोध
यंति तच्छास्त्रविधानोक्तंतत्वंकर्मचज्ञात्वाकर्तुमर्हसितदेवोपादातु
मर्हसि देवासुरविभागोक्तिपूर्विकाशास्त्रवश्यतातदनुष्ठानविज्ञाना
स्थैर्यायषोडशोऽच्यते इतिश्रीभगवद्रामानुजमुनिविरचितेगीताभा
ष्येषोडशोध्यायः १६ ॥

श्रीमदभिनवगुप्तकृतटीका ६

= शास्त्रविधिंत्यजतःस्वमनीषयैवकार्याकार्यविचारंकुर्वतःप्रसृत
नरकपातः तस्मादात्मबुद्ध्याशास्त्रमनुसृत्यकार्याकार्यव्यवस्था
माकार्षीरित्यर्थः २४ संग्रहोत्र स्वबोधेस्वात्मबुद्ध्यैवकार्यंनैवविचा
रयेत् किंतुशास्त्रोक्तविधिनाशास्त्रबोधविवर्धनम् इतिशिवे श्रीभग
वद्गीतार्थसंग्रहेषोडशोध्यायः १६ ॥

परमार्थप्रपाटीका ७

फलितमर्थमाहतस्मादिति इदंकार्यमिदमकार्यमिदमकार्यमिम
स्यांव्यवस्थायांतेनतवप्रकृतिस्वरूपंप्रशासनाच्छास्त्रंप्रमाणं नान्यत्

अतः शास्त्रविधानोक्तं कर्म कर्तुमर्हसि तच्च लक्षणानन्तरं बुद्धिपूर्वकं
तत्त्वज्ञानं भविष्यतीत्यर्थः २४ अध्यायाध्यायनार्थ दैवी संपद्विमुक्त्यै
शमदमसमताक्षान्तिवैराग्यरूपा कामक्रोधाभिमानानृतकपटमयी चा
सुरी बंधहेतुः उक्त्वा दैवसंपद्युतजनहृदितामासुरीं कान्तेनतान्नात्वमा
भैषीः किरीटिन्निति मधुरिपुरगोषोडशाध्योक्तमासीत् इति श्रीमद्देवकु
ण्डिनस्वर्णविरचितायां भगवद्गीताटीकायां षोडशोऽध्यायः १६ ॥

वनमालीटीका ८

यस्माच्छास्त्रविमुखत्वेन याकेवलकामाधीनप्रवृत्तेरैहिकपारत्रिकसर्व
पुरुषार्थायोग्यस्तस्मात्त्वं श्रेयोर्थिनः कार्याकार्यव्यवस्थितौ किं का
र्यं किमकार्यमिति विषये शास्त्रं वेदस्तदुपजीविस्मृतिपुराणादिक
मेव बोधकं प्रमाणं नान्यत्स्वानुभवाद्युक्तं वाक्यादिकमिति भावः ए
वं चाहं कर्माधिकारभूमौ शास्त्रविधानोक्तं यागादि नेवं प्रवर्तनाविवर्त (कुर्यान्न)
नात्मकं वैदिकलिङ्गादिपदेनोक्तं कर्म विहितं प्रतिषिद्धं च सगद्गु
विहितं सर्वविधिदेवतोपासनादिरूपं तद्विषयस्य यज्ञादिकं कर्तुमर्हसि स
त्त्वशुद्धिपर्यन्तमित्यर्थः तदेवमस्मिन्नध्याये सर्वस्यापि प्रास्त्रयाः संपदो मू
लभूतान् सर्वश्रेयः प्रतिबंधकान् महादोषान् कामक्रोधलोभान् परि
त्यज्य श्रेयोर्थिना श्रद्दधानेन तया शास्त्रप्रमाणेन तदुपदिष्टार्थानुष्ठान
परेण भवितव्यमिति संपद्द्वयविभागप्रदर्शनमुखेन निर्दिष्टमिति २४
इति वनमालीगीतायां षोडशोऽध्यायः १६ ॥

अथ वैजयन्तीटीका ९ ॥

किंच तस्मादिति यस्माच्छास्त्रैकमुख्येन कस्यापि सिद्ध्यादयो न सिद्ध्यन्ति
तस्मात्तेनैव कार्याकार्यव्यवस्थितौ किं कर्तव्यं किमकर्तव्यमित्यस्मिन्नि
र्णये शास्त्रं श्रुतिस्मृतीतिहासपुराणादिरूपकं परब्रह्मपुरुषोत्तमस्व
रूपगुणशक्त्यादिरूपकं तत्प्राप्त्युपायभूतकर्मज्ञानभक्तिप्रपत्ति
प्रतिपादकमेव प्रमाणं नान्यत् भ्रमादिदोषवत्पुरुषप्रणीतं तत्
विनष्टादिकं तर्कपरवाक्यं अतः शास्त्रविधानेनोक्तं कर्तव्यमिदं तत्

शास्त्रविधानेनोक्तं

कर्त्तव्यमिति विधिनिषेधात्मकेन लिङ्. तव्यानीयर्[illegible]दिपदेनोक्तं क
र्मस्ववर्णाश्रमोचितं स्वहितं ज्ञात्वा व्यासादिमुखेभ्यः श्रवणेन स्वयं तद्विचा
रेण वा बुद्ध्वा त्वं निषिद्धं त्यजन् सन् इह कर्मभूमौ कर्म स्वोचितमग्निहोत्र
युद्धादिकं कर्तुं लोकसंग्रहार्थमपि कर्तुमर्हसि योग्यो भवसि २४ दैवा
यान्ति दिवो मुक्तिं वासुरा नरकं प्रति इति संक्षेपवदध्यायस्तु षोडशे शोकसमा
श्रये इति श्रीनियमानंदवंशावतंसश्रीकृष्णदासस्यान्तेवासिना
गिरिधारिदासेन विरचितायां भगवद्गीतार्थकुसुमवैजयन्त्यां षोड
शोऽध्यायः १६ ॥

मधुसूदनीटीका ।

यस्माच्छास्त्रविमुखेन यथाकामाधीनप्रवृत्तिरैहिकपारत्रिकसर्व
पुरुषार्थायोग्यस्तस्माच्छ्रेयोर्थिना ते कार्याकार्यव्यवस्थि
तौ किं कार्यं किमकार्यमिति विषये शास्त्रं वेदः तदुपजीवि स्मृति
पुराणादिकमेव बोधकं प्रमाणं नान्यत् स्वोत्प्रेक्षा बुद्धवाक्यादीत्य
भिप्रायः एवं चेह कर्माधिकारभूमौ शास्त्रविधानेन ज्ञात्वा कार्यादि
त्येवं प्रवर्त्तनानिवर्तनात्मकविधिनिषेधरूपेण वैदिकलिंगादिपदेनोक्तं
कर्म विहितं प्रतिषिद्धं च ज्ञात्वा निषिद्धं वर्जयन् विहितं क्षत्रियस्य
युद्धादिकर्म त्वं कर्तुमर्हसि सत्त्वशुद्धिपर्यन्तमित्यर्थः तदेवम
स्मिन्नध्याये सर्वसाधनसाध्याः संपदो मूलभूतास्सर्वश्रेयःप्राप
कास्तथा श्रेयःप्रतिबंधकान्महादोषान्कामक्रोधलोभान्परिहा
य श्रेयोर्थिना श्रद्दधानेन तया शास्त्रश्रवणेन तदुपदिष्टार्थानुष्ठा
नपरेण भवितव्यमिति सम्यग्[illegible]विभागप्रदर्शनेन निर्धारितं
२४ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसर
स्वतीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां श्रीभ
गवद्गीतागूढार्थदीपिकायां दैवासुरसंपद्विभागयोगो नाम षो
डशोऽध्यायः १६ ॥

सदानंदीटीका ११

यस्माच्छास्त्रबहिर्भूतः कामाधीनप्रवृत्तिभाक् नैहिकामुष्मि
कश्रेयोयोग्यस्तस्मात्त्वमधुना ॥ किंकार्यं किमकार्यं चेत्यत्र शास्त्रं
हि बोधकं श्रुतिस्मृतिपुराणादिप्रमाणं नात्मकल्पना इत्यधि
कारभूमौ तं ज्ञात्वा शास्त्रविधानतः कुर्यात्त्वं कार्यादि स्वनिषिद्धवि
हितं तथा ३ निषिद्धं वर्जयन्कर्म विहितं तत्त्रियस्य यत् बुद्ध्यादिशु
द्धिपर्यन्तं कर्तुं योग्योऽसि सर्वदा तदेवमस्मिन्नध्याये आसुर्याः संपदो
पायं मूलं भूतांस्त्रीन्कामादींस्त्यक्त्वा दैवीं समाश्रयेत् ५ तेनापवर्ग
सिद्धिः स्यान्नान्यथा चेत्सदाहृतं २४ दैवीसंपद्धि मोक्षं जनयति स
धियामासुरीत्वहेतुर्यासर्वासंत्यागहेतुर्हरिचरणरतिर्नास्य
त्यातोऽप्यनन्यः स्वांतप्रेमणैव कृत्स्नस्सरभजसततं स्वात्मभूतं महेशं
भक्तिस्ते नैव सिद्धा भवति हरिचेवामानमज्ञानवंधं १ यद्यस्त्यपे
देव ज्ञानवत्संपदि विभेषि वेदासुरं संपदस्तिदा समाश्रयत्वं वसुदेवनं
दने रतिं मतिं भ्रांतिमपोह्य सर्वतः २ इति श्रीभावप्रकाशे श्री
सदानंदविरचिते दैवासुरविभागोऽयं षोडशः पूर्णतां गतः १६

नीलकंठीटीका १२

यस्माच्छास्त्रातिगः सुखादिकं त्रयं नाप्नोति तस्मात्ते तव श्रेयआदि
कार्यस्य शास्त्रमेव प्रमाणं ॥ किंकार्यं किंनकार्यमित्यस्यां व्यवस्थायां
एवं ज्ञात्वा शास्त्रं इदं कर्तव्यमिदं न कर्तव्यमिति शासनं वेदाज्ञारू
पं विधानं च तदुक्तं च नेतुमिति समाधानं अग्निहोत्राद्यकरणेनायं
दोषस्तत्परिहारार्थमिदं कृच्छ्रादिकं प्रायश्चित्तं ब्रह्महत्यादिकर
णेऽयं दोषस्तत्परिहारार्थमिदमश्वमेधादि अन्यद्वा प्रायश्चित्तं शा
स्त्रविधानं च ज्ञात्वा प्रमुक्तं कर्म इह मनुष्यलोके कर्तुमर्हसि लो
कांतरे कर्मस्वनधिकारं दर्शयितुमिहेत्युक्तं तदेवं शास्त्रानुवर्ति
नएव त्रिविधनरकद्वारादिकं नान्यस्येति सिद्धं २४ इति नीलकंठीये भा
रतभावदीपे षोडशोऽध्यायः १६ ॥ ॥

श्री॰
गी॰ टी॰
षो॰

९५

इत्यनुपदिश्य भगवानध्यायार्थमुपसंजिहीर्षुरर्जुनं प्रस्तुतेषु
द्धकरणे नियोजयति तस्मादुक्ताद्धेतोस्त्वं दैवीं संपदमभिजान
स्व इदं कार्यमिदं न कार्यमित्यस्यां व्यवस्थायां शास्त्रमाप्तोपदेशप
दं प्रमाणं न तु कल्पिता स्वबुद्धिरित्यर्थः अत एव कार्याकार्यव्य
वस्थायां शास्त्रं प्रमाणीकृत्य शास्त्रेण यद्विधानं युद्धादि तत्तद्वि
षयस्य युद्धावश्यकर्तव्यतालक्षणं विधिवाक्यं तेन शास्त्रविधाने
नोक्तं कर्म स्वजात्युक्तमिहास्मिन्समये कर्तुमर्हसीत्युपदेशः सि
द्धान्तः सिद्धः ॥ २४ ॥ इति श्रीभगवद्गीताव्याख्यायां दैवासुरस
म्पत्तियोगोपदेशः षोडशोऽध्यायः १६ ॥

कंठीटीका १४

तस्मादुक्तकारणादिदं कार्यमिदं न कार्यमिति व्यवस्थया शा
स्त्रमेवैकं ते प्रमाणं शास्त्रं हि नाम सदा साक्षात्कृतयथास्थितता
र्थेन तस्य परमगुरोः परस्यात्मनस्य वचनमतस्तदेव विसंवादत्वा
त्प्रमाणं कृत्वा शास्त्रोक्तेन विधिना चोदितं कर्म त्वमिह कर्मभूमौ
कर्तुं स्वजातिविहितं कर्मानुष्ठातुमर्हसि श्लोकः पतितः २४
इति श्रीराजानकरामविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्र
नाम्नि गीताविवरणे षोडशोऽध्यायः १६ ॥

तिकी नीटीका १५

फलितमित्याह —
यस्मादेवं तस्मादिदं कार्यमिदमकार्यमित्यस्यां व्यवस्थायां तु वशा
स्त्रमेव बोधकं प्रमाणं अतः शास्त्रोक्तं न विधानेन चोदितं कर्म ज्ञा
त्वा यथावत्स्वार्थापर्येणपर्यालोच्य इह कर्मभूमौ स्वाधिकारे यो
गीतार्थावबोधने तदन्यस्यानधिकृतिं षोडशे प्राह तं नमः २४
इति श्रीभगवद्गीताटीकायां वासन्याख्यायां दैवासुरसंपद्विभा
गो नाम षोडशोऽध्यायः १६ ॥

[illegible]

पैंचोले टीका

फलितमाह तस्मादिति [illegible] तस्मात्तेतव कार्याकार्यव्यवस्थि
तौ कर्तव्याकर्तव्यव्यवस्थायां शास्त्रं प्रमाणं ज्ञानाधीनं भवति तस्मा
च्छास्त्रविधानोक्तं कर्म ज्ञात्वा कर्तुमर्हसि २४ ॥ इतिश्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां दैवासुरसंपत्तियोगो नाम पैंचोले
टीकायां षोडशोध्यायः १६ ॥

रसवीरसमिद्धोधिनी ॥

तस्मादिति तस्मात्सर्वत्र शास्त्रमेव प्रमाणं तस्मात्कार्याकार्यव्यव-
स्थितौ कार्यं स्वधर्मं अकार्यं परधर्मं तत्र या व्यवस्थितिर्व्यवसायात्मि
का स्थितिः कर्तव्यमेव स्वधर्ममित्येवंरूपा तस्यां तु तत्प्रमाणं ज्ञात्वा
प्रवर्तकत्वादिति शास्त्रविधानोक्तं शास्त्रेण विधिमुखेन चोदितं
यत्कर्म क्षत्रियं प्रति यथा युद्धादिकर्म तत्कर्तुमिहास्मिन्नेव समर
स्थले अर्हसि इति फलितोर्थः इति सिद्धं २४ इति श्रीभगवद्गीता-
व्याख्यायां रसवीरसमिद्धोधिन्यां षोडशोध्यायः १६ ॥

मधुभाष्य

२४ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते गीता
भाष्ये षोडशोध्यायः १६ ॥

95

भाषा अनुवाद २४

अब तात्पर्य कहते हैं कि यह काज औ यह अकाज इसकी व
वस्थाकहे निर्णय मे तुमको शास्त्र औ वेद स्मृति वाले धर्म्म
शास्त्र पुराण प्रमाण स्वरूप हैं इस से शास्त्र की विधिमे क
हे जो कर्म्म तिनको जानि कर इस कर्म्म अधिकार मे वर्तमा
न तुम अपने अधिकार के अनुरूप कर्म करने को योग्य होउ
जिस हेतु सत्वशुद्धि औ सम्यक् ज्ञान औ मुक्ति के विषयमे
भी कर्म्महीं मूल कहे कारण स्वरूप है २४ ॥

दोहा

तातें शास्त्र प्रमाणको कार्य अकार्य स्थिति माहि ज्ञान शास्त्र
विधि कथितको योग्य कर्म करण हंताहि २४ ॥